आचरण का विचार उच्छिष्ट भोजन के प्रसंग में भी किया गया है। यदि पिता या बड़े भाई का भी आचरण धर्म के विपरीत हो तो उनका छोड़ा हुआ भोजन नहीं ग्रहण करना चाहिए। १.४.११, १२। आचार से भ्रष्ट होने पर कठोर व्रत का विधान किया गया है। गुरु की हत्या, गुरुपत्नीगमन, सुवर्ण की चोरी, सुरापान आदि के प्रायश्चित्त अत्यन्त कठिन और भयावह है। आपस्तम्बधर्मसूत्र ने प्रचलित आचार की अपेक्षा श्रुति के नियम को अधिक प्रामाणिक माना है—

"श्रुतिर्हि बलीयस्यानुमानिकादाचारात्" १.४.८

नैतिकता के सम्बन्ध में आपस्तम्बधर्मसूत्र में अभिव्यक्त विचार गौतमधर्मसूत्र के विचारों से बहुत भिन्न नहीं है। निकट संबन्ध की या निकट संबन्ध जैसी स्त्रियों के साथ यौन संबन्ध पतन का कारण है, तो दूसरी ओर आपस्तम्ब ने अन्य आचार्यों का मत भी दिया है, जिसके अनुसार गुरुपत्नियों के अतिरिक्त अन्य विवाहिता स्त्रियों से मैथुन पतन का कारण नहीं होता।

"नाऽगुरुतल्पगे पततीत्येके।" १. २०-१०

क्रोध, हर्ष, रोष आदि को भूतदाहीय कहा गया है, ये प्राणियों का नाश करनेवाले दोष हैं—

'क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः।" (पृ० १७५)

इसके विपरीत क्रोधहीनता, हर्ष का अभाव, रोष न करना, अलोभ, मोह का अभाव, दम्भ का न होना, द्रोह न करना, सत्यवचन, भोजन में संयम,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर दोष कथन से विमुख होना, असूया का अभाव, स्वार्थहीन उदारता, दान आदि न लेना, सरलता, कोमलता, भावावेगों का शमन, इन्द्रियों को वश में करना, सभी प्राणियों के साथ प्रेम, आत्मा के चिन्तन में मन को समाहित करना, आर्यों के नियम के अनुसार आचरण करना, क्रूरता का त्याग, सन्तोष—ये उत्तम गुण सभी आश्रमों के लिए हैं। इनके आचरण से विश्वात्मा की प्राप्ति होती है।

जिस प्रकार जान बूझकर वध करने से उसका अधिक पाप होता है, उसी प्रकार जान बूझकर उत्तम कर्म करने पर उसका अधिक पुण्य होता है। वध के लिए प्रायश्चित्त स्वरूप दान देना भी पर्याप्त माना गया है। क्षत्रिय की हत्या में एक सहस्र, वैश्य की हत्या पर सौ, शूद्र की हत्या पर दस गायों का दान देने से प्रायश्चित्त हो जाता है। ये विचार मानवतावादी दृष्टिकोण के कितने विरोधी हैं। हिंसक की हिंसा धर्मसूत्र में निन्दित नहीं है। इस प्रकार की हिंसा से कोई पाप नहीं होता, क्योंकि उसमें क्रोध ही क्रोध का स्पर्श करता है।

इस धर्मसूत्र में यौनविषयक नैतिकता के नियमों में कुछ और अधिक कठोरता दिखायी पड़ती है किन्तु इन नियमों पर भी वर्णव्यवस्थाहावी है। यदि तीन उच्च वर्णों में से किसी वर्ण का पुरुष शूद्र स्त्री से मैथुन करे तो उसका देश से निष्कासन होना चाहिए। शूद्र वर्ण का पुरुष उच्च वर्णों की स्त्रियों के साथ सम्बन्ध करे तो वह मृत्युदण्ड का भागी होता है—'वध्यश्शूद्र आर्यायाम् २-२७९ ब्राह्मण के लिए पर स्त्री गमन का तीन वर्ष का प्रायश्चित्त कर्म निर्दिष्ट है और जितनी बार अपराध किया जाता है उतनी बार प्रायश्चित्त करना होता है। यदि शूद्र तीन उच्च वर्ण के व्यक्ति के प्रति अपशब्द कहता है तो उसकी जीभ कटवा लेनी चाहिए।

"वाचि पथि शय्यायामासन इति समीभवतो दण्डताऽनम्।" २-२७-१५

यदि शूद्र किसी पुरुष का वध करे या चोरी करे, अथवा भूमि पर बलपूर्वक कब्जा करे तो उसकी सम्पूर्ण सम्पत्ति का अपहरण भी विहित है। किन्तु इन्हीं अपराधों के लिए ब्राह्मण को जीवन भर आँखों पर पट्टी बँधाकर रहना पड़ता था "चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य" २.२७.१७.

आपस्तम्बधर्मसूत्र में धर्म के उद्देश्य की स्पष्ट मीमांसा की गयी है। धर्म का आचरण केवल सांसारिक उद्देश्य से ही नहीं करना चाहिए। यश, लाभ और सम्मान की प्राप्ति ही धर्म का प्रमुख लक्ष्य नहीं है। "नेमं लौकिकमर्थं पुरस्कृत्य धर्मांश्चरेत्।" १.२०.१ जब धर्म का आचरण लौकिक उद्देश्य से किया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जाता है तब वह व्यर्थ हो जाता है। लौकिक फल धर्माचरण का गौणफल है, जैसे फल के लिए आम का पेड़ लगाने पर छाया और सुगन्धि भी प्राप्त होती है, उसी प्रकार धर्म का आचरण करने पर लौकिक फल भी गौण रूप से प्राप्त होता है—"तद्यथाऽऽम्रे फलार्थे निमित्ते छाया गन्ध इत्यनूत्पद्येते, एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्ते।"

यदि धर्म का कोई लौकिक फल भी नहीं होता तो भी कोई हानि नहीं होती है। स्वयं धर्म के लिए भी धर्म का आचरण करना चाहिए। धर्मसूत्र ने इस बात की चेतावनी दी है कि धर्म का आडम्बर करने वालों से सतर्क और सावधान रहना चाहिए। धर्म और अधर्म को पहचानने के लिए विवेक की आवश्यकता है। धर्म का स्वरूप जानने के लिये वेद का ही आश्रय लेना चाहिए। वस्तुतः धर्म वही आचरण है, जिसे आर्य लोग उत्तम कहकर प्रशंसित करते हैं और जिसकी वे निन्दा करते हैं वह अधर्म है।

"यं त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मो यं गर्हन्ते सोऽधर्मः।" १.२०.७

किन्तु धर्म उस आचार को माना गया है जिसे सभी स्थानों पर विनयशील, वृद्ध, जितेन्द्रिय, लोभहीन, दम्भहीन आर्यों द्वारा एकमत से स्वीकार किया गया हो।

× × ×

आपस्तम्बधर्मसूत्र के प्रथम प्रश्न के आठवें पटल में आत्मा के स्वरूप पर विचार किया गया है। इस पटल का नाम अध्यात्मपटल है और इसमें अभिव्यक्त विचार उपनिषद् ही प्रभावित है। योग पर विशेष बल दिया गया है।

चित्त के समाधान का हेतु योग है। चित्त का समाधान करने पर इन्द्रियों का निश्चार या बाहर की ओर विक्षेप समाप्त होता जाता है। आत्मा का ज्ञान सबसे बड़ा लाभ है—

"आत्मलाभान्न परं विद्यते।" आत्मा सभी प्राणियों में नित्य अर्थात् अनश्वर शाश्वत रूप में विद्यमान है, अमर और ध्रुव है, विकार रहित, ज्ञानस्वरूप, अङ्गहीन, शब्द और स्पर्श गुण से परे है। आत्मा ही सम्पूर्ण विश्व है, परम लक्ष्य है। विद्वान् वही है जो सभी प्राणियों को अपने में देखता है। जो आत्मा का दर्शन सभी वस्तुओं में करता है वह ब्राह्मण स्वर्गलोक में प्रतिष्ठित और देदीप्यमान होता है।

"आत्मन पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः। आत्मानं चैव सर्वत्र यः पश्यत्स वै ब्रह्मा नाकपृष्ठे विराजति"। १०८. २३. १.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मतत्त्व के विषय में कहा गया है कि वह ज्ञानवान् है, विसतन्तु से भी सूक्ष्म है, जो सम्पूर्ण विश्व को व्याप्त कर स्थित है। पृथ्वी से अधिक भारी है, नित्य है, सम्पूर्ण विश्व को अपने में समाविष्ट कर स्थित है। वह इन्द्रियों से उत्पन्न होने वाले संसार के ज्ञान से भिन्न है, जो ज्ञान इन्द्रिय-विषयों से अभिन्न हैं। वह अपने परम प्रकृष्ट लोक में स्थित होता है, वह सम्पूर्ण संसार को विविध रूपों में विभक्त करता है। उसी परमात्मा से ही शरीर उत्पन्न होते हैं, अतः वह सृष्टि का मूल कारण है, नित्य है, विकार रहित है।'

निपुणोऽणीयान् विसोर्षाया यस्सर्वमावृत्य तिष्ठति। वर्षीयाश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति। स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विराजः। तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः।

१. ८. २३.२ (पृ० १७२)

किन्तु आचार ही सभी प्रकार की सिद्धि का मूल है। मानसिक विकारों को वश में किये विना धर्म का प्रयोजन सिद्ध नहीं होता और न ही दार्शनिक चिन्तन का कोई उपयोग रह॰ जाता है। चित्तवृत्ति के निरोध रूपी योग से ही मनुष्य के दोषों का विनाश होता है और प्राणियों को जलाने वाले दोषों का विनाश हो जाने पर पण्डित या ब्रह्मवेत्ता कल्याण प्राप्त करता है—

दोषाणां तु निर्घातो योगमूल इह जीविते।
निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः॥ (पृ० १७३)

आधुनिक युग की संत्रस्त और दिग्भ्रमित मानवता के लिए धर्मसूत्र का सन्देश अब भी सुमतिदायी सविता का आलोक देकर सन्मार्ग में प्रवृत्त होने की प्रेरणा दे रहा है और इसके नैतिक मूल्यों के बोध में ही हमारी जातीय संस्कृति के भावी अस्तित्व की आशा है।

—उमेशचन्द्र पाण्डेय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयानुक्रमणिका

प्रथम प्रश्न

प्रथम पटल

सामयाचारिक धर्म १
सामयाचारिक धर्म के प्रमाण ३
वर्ण ४
वर्णों के कर्त्तव्य ५
उपनयन ६
उपनयन में आचार्य ७
आचार्य की व्युत्पत्ति और महत्ता ९
उपनयन के काल १०
उपनयन के अभाव में पतन १२
अनुपेत का प्रायश्चित्त १४
गृहस्थाश्रम के धर्म १६
ब्रह्मचारी का आचार्य कुल में निवास १६
आचार्य कुल में निवास की अवधि १७
ब्रह्मचर्य की विधि एवं ब्रह्मचारी के नियम १८
ब्रह्मचारी की मेखला, दण्ड और वस्त्र और मृगचर्म २१–२३
भिक्षाचरण की विधि २७
उच्छिष्ट भोजन ३१
समिदाधान की विधि ३३

द्वितीय पटल

तप का अर्थ ३८
वेद के अध्ययन का फल ४०
ब्रह्मचारी के धर्म-अभिवादन, गुरु की सेवा ४१
गुरु के प्रति शिष्टाचार के नियम ४८
पादोपसङ्ग्रहण के नियम ५८
समावर्तन के उपरान्त नियम ५९
गुरु के प्रति यात्राकालीन शिष्टाचार ६१

तृतीय पटल

अनध्याय के अवसर एवं अवधि ६८
मृत्युनिमित्तक अनध्याय ७४
भोजननिमित्तक अनध्याय ७८
अध्ययनकालीन सामान्य नियम ८२
दैनिक अध्ययन की विधि ८४
प्राकृतिक निमित्तों से अनध्याय ८५

चतुर्थ पटल

स्वाध्याय का महत्त्व ८९
महायज्ञ ९५
'ओम्' के प्रयोग का नियम ९९
शुश्रूषा का नियम १०१
गृहस्थाश्रम के कर्म १०३
गुरुजनों का अभिवादन १०५

पञ्चम पटल

आचमन का नियम ११०
अभोज्य अन्न १२२
अपेय वस्तुएँ १२९
मांस भक्षण में भक्ष्याभक्ष्य १३०

षष्ठ पटल

वस्तुओं के ग्रहण में वर्ण का विचार १३५
समावर्तन के बाद भोजन-ग्रहण का नियम १३७
अग्राह्य भोजन १३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तम पटल

धर्म के आचरण का प्रयोजन	१४८
धर्म और अधर्म का भेद	१५०
न बेचने योग्य वस्तुएँ	१५२
विनिमय का नियम	१५३
पतनीय कर्म	१५४
अशुचिकर कर्म	१५६

अष्टम पटल

योग का उपदेश	१५८
आत्मज्ञान की महत्ता	१६२
आत्मा का स्वरूप	१६५
नाश के निमित्तभूत दोष	१७५
उत्तम आचरण के नियम	१७७

नवम पटल

वध करने पर दान का नियम	१७९
अभिशस्त का प्रायश्चित्त	१८१
गुरु की हत्या का प्रायश्चित्त	१८४
गुरुतल्पगमन का प्रायश्चित्त	१८५
स्तेन का प्रायश्चित्त	१८६
पशुवध का प्रायश्चित्त	१८९
अवकीर्णी का प्रायश्चित्त	१९२

दशम पटल

स्तेन की परिभाषा	१९८
माता की शुश्रूषा का नियम	२००
गुरुतल्पगमन का प्रायश्चित्त	२०१
पतित का पुत्र	२०६

एकादश पटल

ब्रह्मचर्य की अवधि	२०९
स्नातक के व्रत	२१०
अध्यापक के नियम	२२०
गुरु के प्रति शिष्य का कर्त्तव्य	२२१

द्वितीय प्रश्न

प्रथम पटल

गृहस्थाश्रम के व्रत	२२५
पत्नीगमन के नियम	२३०
वर्णधर्म और स्वर्गफल	२३३

द्वितीय पटल

वैश्वदेव कर्म	२३६
होमकर्म के नियम	२३८
वैश्वदेव बलि के मन्त्र	२४०
भोजन कराने के विषय में नियम	२४४
वर्ण के अनुसार अभिवादन के नियम	२४६
वस्त्र धारण करने का नियम	२४७
आचार्य की योग्यता और उनके कर्त्तव्य	२४८
गुरु के प्रति शिष्य के कर्त्तव्य	२५०

तृतीय पटल

शिष्य के वर्ण के विषय में विचार	२५४
श्रोत्रिय की परिभाषा	२५५
अतिथि-सत्कार का नियम	२५६
असमावृत्त अतिथि के प्रति कर्त्तव्य	२५७
अतिथि का महत्त्व	२५९

चतुर्थ पटल

अनेक दिन रहनेवाला अतिथि	२६४
मधुपर्क के अधिकारी	२६५
वेदाङ्ग	२६६
भोजन और दक्षिणा के नियम	२६९

पञ्चम पटल

भिक्षा के निमित्त	२७१
वर्णों के धर्म एवं कर्त्तव्य	२७२
न्याय एवं राजा का कर्त्तव्य	२७४
दण्ड-विधान	२७५
दूसरों के लिए मार्गत्याग	२७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूसरा विवाह करने का नियम २७७
विवाह में गोत्र का विचार २७९
विवाह के प्रकार २८२
ब्राह्मण और अग्नि के प्रति सामान्य नियम २८४
दैनिक आचार-नियम २८५
प्राणायाम के नियम २८६

षष्ठ पटल

विवाह योग्य कन्या २८९
पुत्र के विषय में विचार २९०
पुत्रों में दायविभाजन २९५
उत्तराधिकार का प्रश्न ३०३
ज्येष्ठ पुत्र का विशेष भाग ३०४
पति और पत्नी में विभाजन का अभाव ३०५
मृत्यु के उपरान्त आशौच ३०७
हवन के विषय में नियम ३११

सप्तम पटल

श्राद्धकालीन भोजन ३१४
श्राद्ध की तिथि का फल ३१५
श्राद्ध-भोजन की वस्तुओं का फल ३१७
श्राद्ध-भोजन के लिए ब्राह्मणों की योग्यता ३२०
श्राद्धकालीन होम ३२२

अष्टम पटल

श्राद्धभोजन की वस्तुएँ और आचरण ३२५
श्रेयस् प्राप्ति के निमित्त आचरण ३२६
श्राद्ध के समय भोजन का नियम ३३१
श्राद्धभोजन में ब्राह्मणों की संख्या ३३३

नवम पटल

चार आश्रम ३३६
परिव्राजक ३३७
संन्यासी के नियम ३३८
आत्मज्ञान से मोक्ष प्राप्ति ३४१
वानप्रस्थ के नियम ३४२
ऊर्ध्वरेता ब्रह्मचारी की प्रशंसा ३४८
गृहस्थाश्रम की श्रेष्ठता ३४९

दशम पटल

राजा के कर्त्तव्य ३५५
द्यूत की व्यवस्था ३५७
उत्तम राजा ३५८
सेवकों की योग्यता ३५९
करग्रहण के नियम ३६०
व्यभिचार का दण्ड ३६२
नियोग का नियम ३६३
शूद्र के लिए व्यभिचार निमित्तक दण्ड ३६५
ब्राह्मण को व्यभिचार के लिए दण्ड ३६६
दण्ड से मुक्ति ३६८

एकादश पटल

कृषिकर्म न करने का दण्ड ३६९
चरवाहे के लिए दण्ड विधान ३६९
चोरी का दण्ड ३७१
दुष्कर्म के उत्तेजक को दण्ड ३७२
दण्ड के निर्णायक तथ्य ३७३
साक्षी का विचार ३७४
धर्म के आचरण का महत्त्व ३७५
धर्म के विषय में प्रमाण ३७५
सूत्र में आए हुए नामों एवं विषयों की अनुक्रमणिका ३७७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमदापस्तम्बमहर्षिप्रणीतं

आपस्तम्ब-धर्मसूत्रम्

सानुवाद-'उज्ज्वला'वृत्तिसहितम्

प्रथमः प्रश्नः

अथातस्सामयाचारिकान् धर्मान् व्याख्यास्यामः ॥ १ ॥

[1]प्रणिपत्य महादेवं हरदत्तेन धीमता।
धर्माख्यप्रश्नयोरेषा क्रियते वृत्तिरुज्ज्वला ॥ १ ॥

अथशब्द आनन्तर्ये। अतश्शब्दो हेतौ। उक्तानि श्रौतानि गार्ह्याणि च कर्माणि। तानि च वक्ष्यमाणान्धर्मानपेक्षन्ते। कथम्? आचान्तेन कर्म कर्तव्यं, शुचिना कर्तव्य'मिति वचनादाचमनशौचादीनपेक्षन्ते।

'[2]सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु'।

इति वचनात् सन्ध्यावन्दनम्। एवं 'अशुचिकरनिर्वेषः,''[3]द्विजातिकर्मभ्यो हानिः पतनम्' इति वचनात् ब्रह्महत्यादिप्रायश्चित्तानि च। एवमन्येष्वपि यथासम्भवमपेक्षा द्रष्टव्या। अतस्तदनन्तरं सामयाचारिकान् धर्मान् व्याख्यास्यामः। पौरुषेयी व्यवस्था समयः। स च त्रिविधः—विधिर्नियमः प्रतिषेधश्चेति। तत्र प्रवृत्तिप्रयोजनो विधिः— '[4]सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्चेत्यादिः।

१. मातामहमहाशैलं महस्तदपितामहम्। कारणं जगतां वन्दे कण्ठादुपरि वारणम्। इत्यधिकः पाठः क० पु०।

२. दक्षस्मृ० अ० २. श्लो. २९. 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत्' इति तस्योत्तरार्धम्।

३. गौ० ध० २१. ४. "अशुचेर्द्विजाती'ति. घ० पु० ४. आप० ध० १. ३०.८.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निवृत्तिप्रयोजनावितरौ।[१] 'प्राङ्मुखोऽन्नानि भुञ्जीते'ति नियमविधिः। क्षुदुपघातार्था भोजने प्रवृत्तिः। शक्यं च [२]यत्किञ्चिद्दिङ्मुखेनापि भुञ्जानेन क्षुदुपहन्तुम्। तत्र नियमः क्रियते-प्राङ्मुख एव भुञ्जीत, न दक्षिणादिमुख इति। [३]परिसङ्ख्या तु नियमस्यैव कियानपि भेदः। एवं द्रव्यार्जने रागात्प्रवृत्तं प्रति नियमः क्रियते—'याजनाध्यापनप्रतिग्रहैरेव ब्राह्मणो द्रव्यमार्जयेत्, न कृषिवाणिज्यादिने'ति। [४]ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जये'दित्यादिः प्रतिषेधः। समयमूला आचारास्समयाचाराः तेषु भवाः सामयाचारिकाः। एवम्भूतान् धर्मानिति। [५]कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणोधर्मः। तद्धेतुभूतकर्मव्याख्यानमेव तद्व्याख्यानम्। तत्र विधिषु तावद्विषयानुष्ठानाद्धर्म इति नास्ति विप्रतिपत्तिः। नियमेष्वपि [६]नियमानुष्ठानाद्धर्मः, प्रतिषेधेष्वपि [७]नञर्थानुष्ठानाद्धर्म इति केचित्। अतएव धर्मानित्यविशेषेणाह।

अन्ये तु—विधिष्वेव धर्मः, इतरयोस्तु विपरीतानुष्ठानादधर्मः केवलम्, न तु विषयानुष्ठानात् कश्चिद्धर्मः। न ह्यप्रतिगृह्णन्नपिबन्वा सुरां धार्मिक इति लोके प्रसिद्धः। सूत्रे तु धर्मग्रहणमधर्मस्याप्युपलक्षणमिति स्थितिः—इति ॥१॥

अनुवाद— अब (श्रौत तथा गृह्यकर्मों का विवेचन करने के बाद) हम सामयाचारिक धर्मों की व्याख्या करेंगे।

टिप्पणी—सामयाचारिक, पुरुषकृत व्यवस्था को समय कहते हैं। 'पौरुषेयी व्यवस्था'। समय तीन प्रकार का होता है : विधि, नियम, प्रतिषेध। सामयाचारिक की व्युत्पत्ति है : 'समयमूला आचारास्समयाचाराः तेषु भवाः, सामयाचारिकाः। समय–पौरुषेयी

---

१. आप० ध० १. ३१. १. २. यत्किञ्चनदिङ्मुखेन इति क० पु०।

३. प्रतिषेधः परिसंख्येत्यनर्थान्तरम्। परिसंख्या वर्जनबुद्धिः। तद्विषयको विधिः परिसंख्याविधिः! स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकानां मतम्। अत एव विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते॥ इत्येव वार्तिककारैरुक्तम्। ग्रन्थकारस्त्वयं परिसंख्यां नियमविधावेवान्तर्भावयति॥

४. आप० ध० १. ३१. ६.

५. इदं च तार्किकादिमतमनुसृत्य प्रभाकरमतञ्च। भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात्। उक्तं हि भट्टपादैः—

श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः।
चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता॥ इति श्लो. वा. १२. १९१.

६. पक्षेऽप्राप्तांशस्य पूरणकरणादित्यर्थः।

७. तत्तन्निषेध्यक्रियाप्रागभावपरिपालनादिति यावत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवस्था पर आधारित आचारों को समयाचार कहते हैं, सामयाचारिक धर्म इन आचारों से उदभूत होता है। धर्म इस प्रकार के कर्म को कहते हैं जो अपूर्व के माध्यम से स्वर्ग और मोक्ष का कारण बनता है: 'कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः'। इस प्रकार सामयाचारिक का अर्थ हुआ। धर्मज्ञ लोगों की सहमति से व्यवस्थापित दैनिक आचार। ॥१॥

किं भोः समयोऽपि प्रमाणम्, ? [1]यदि स्यादिदमपि प्रमाणं भवितुमर्हति—'चैत्यं वन्देत स्वर्गकामः। प्रगे भुञ्जीत। केशानुल्लुँञ्छेत्। तिष्ठन् भुञ्जीत। न स्नाया'दिति। तत्राह—

धर्मज्ञसमयः प्रमाणम् ॥ २ ॥

न हि ब्रूमः समयमात्रं प्रमाणमिति। किं तर्हि ? धर्मज्ञा ये मन्वादयस्तेषां समयः प्रमाणं धर्माधर्मयोः ॥ २ ॥

अनुवाद— धर्म के ज्ञाताओं (मनु आदि) के समय ही इन आचारों के लए प्रमाण है।

टिप्पणी— केवल समयमात्र को प्रमाण नहीं कहा गया है अपितु धर्मज्ञों के समय को, मनु आदि की व्यवस्था को ही धर्म और अधर्म के विषय में प्रमाण माना गया हैं॥ २ ॥

कथं पुनरिद[2]मवगतं मन्वादयो धर्मज्ञा न बुद्धादय इति ? यद्युच्यते—बुद्धादीनामतीन्द्रियेऽर्थे ज्ञानं न सम्भवतीति, तन्मन्वादिष्वपि समानम्। अथ तेषां धर्मज्ञानातिशयादतीन्द्रियेऽपि ज्ञानं सम्भवतीति, तत् बुद्धादिष्वपि समानम्। यथाऽऽहुः—

[3]'सुगतो यदि धर्मज्ञः कपिलो नेति का प्रमा।
तावुभौ यदि धर्मज्ञौ मतभेदः कथं तयोः॥ इति।

वक्तव्यो वा विशेषः, तमाह—

वेदाश्च ॥ ३ ॥

चोऽवधारणे। वेदा एव मूलप्रमाणं धर्माधर्मयोः। [4]न च नित्यनिर्दोषेषु वेदेषूक्तोपालम्भसम्भवः। [5]स्वतःप्रमाणस्य हि शब्दस्य न वक्तृदोषनिबन्धनम-

१. यदि प्रमाणमिदमपि प्रमाणं इति क० पु० २. अवगम्यते इति ख० पु०

३. अष्टसहस्री० पृ० ५. श्लोकोऽयं कौमारिल इति अष्टसहस्रीटिप्पण्याम्।

४. नित्येषु निर्दोषेषु, इति ख० पु०। अपौरुषेयेषु इति घ० पु०

५. मीमांसकमते तावत् वैदिकानां वाक्यानां नित्यत्वाभ्युपगमात् तत्र कर्तृतया पुरुषसम्बन्धाभावात् स्वत एव प्रामाण्यमङ्गीकृतम्। तदभिप्रेत्याह—स्वतः प्रमाणस्येति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रामाण्यम् । तदिहास्मदादीनां धर्मज्ञसमयः प्रमाणम् , धर्मज्ञानां तु वेदाः प्रमाणम् । मनुरप्याह—

[१]'वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

गौतमोऽपि—[२]"वेदो धर्ममूलं, तद्विदां च स्मृतिशीले ।' इति । यद्यप्यप्रत्यक्षो वेदो मूलभूतोऽस्मदादिभिर्नोपलभ्यते । तथापि [३]मन्वादय उपलब्धवन्तः इत्यनुमीयते । वक्ष्यति—[४]'तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते' इति ॥ ३ ॥

अनुवाद— वेद ही प्रमाण हैं ।

टिप्पणी— पूर्वोक्त सूत्र में उल्लिखित धर्मज्ञों के लिए भी वेद ही प्रमाण हैं । हमारे लिए धर्मज्ञसमय' प्रमाण है और धर्मज्ञों के लिए वेद प्रमाण है । इस प्रकार वेद ही धर्म और अधर्म के विषय में मूलप्रमाण है । वेद को मनु और गौतम ने भी धर्म का मूल माना है । मनुस्मृति २.६; गौतमधर्मसूत्र १. १. २. ॥ ३ ॥

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः ॥ ४ ॥

ब्राह्मणाद्याश्चत्वारो वर्णसंज्ञिकाः । ते च सामयाचारिकैर्धर्मैरधिक्रियन्ते [५]चतुर्णामेवोपदेशेऽपि पुनश्चतुर्ग्रहणं [६]यथाकथञ्चित् चतुर्ष्वन्तर्भूतानामपि ग्रहणार्थम् । ततश्च [७]'ब्राह्मणः क्षत्रियो वैश्य' इति बौधायनादिभिरुक्तानामनुलोमादीनामप्यत्र ग्रहणं मतम् । तथा च गौतमः प्रतिलोमानामेव धर्मेऽनधिकारमाह—[८]"प्रतिलोमास्तु धर्महीना" इति ॥ ४ ॥

अनुवाद— वर्ण चार हैंः ब्राह्मण, क्षत्रिय, वैश्य और शूद्र ।

टिप्पणी—ये चारों ही वर्ण सामयाचारिक धर्मों के अधिकारी हैं । चार संख्या से इन चारो के अन्तर्गत अन्तर्भूत वर्णों का भी ग्रहण होगा । गौतमने प्रतिलोम वर्णों को धर्महीन माना हैं ॥ ४ ॥

तेषां पूर्वः पूर्वो जन्मतश्श्रेयान् ॥ ५ ॥

जन्मत इति वचनात् सद्वृत्तादपि शूद्राद्वैश्यब्रुवोऽपि श्रेयान् । एवं वैश्यात् क्षत्रियः क्षत्रियात् ब्राह्मणः ॥ ५ ॥

अनुवाद—इनमें से पूर्ववर्ती वर्ण अपने बाद वाले वर्ण से जन्मतः श्रेष्ठ होता है॥५॥

---

१. मनु० स्मृ० २.६. २. गौ० ध० १. १; २.
३. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख० पु० । ४ आप० ध० १.१२.१०.
५. 'वर्णानामुपदेशेऽपि पुनश्चतुर्ग्रहणं यथाकथञ्चिचतुर्ष्वन्तर्भूतानामपी'ति ख० पु०
६. यथाक्रमं इति क० पु० ७. बौ० ध० १. ७. १. ८. गौ० ध० ४० २५.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशूद्राणामदुष्टकर्मणामुपायनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि ॥ ६ ॥

शूद्रवर्जितानां त्रयाणां वर्णानामदुष्टकर्मणामुपायनादयो धर्माः। उपायनमुपनयनम्। नात्र त्रैवर्णिकानामुपनयनादि विधीयते, प्राप्तत्वात्। नापि शूद्राणां प्रतिषिध्यते,। प्राप्त्यभावात् तथा हि—उपनयनं तावद्गृह्ये [1]"गर्भाष्टमेषु ब्राह्मणमुपनयीते'त्यादिना त्रैवर्णिकानामेव विहितम्। इहापि तथैव विधास्यते। अध्ययनमपि [2]"उपेतस्याचार्यकुले ब्रह्मचारिवास' इत्यारभ्य विधानात् अनुपनीतस्य शूद्रस्याप्राप्तमेव। किं च [3]"श्मशानवच्छूद्रपतिता'विति [4]अध्ययननिषेधो वक्ष्यते [5]यस्य समीपे नाध्येयं स कथं स्वयमध्येतुमर्हति।

अग्न्याधेयमपि [6]"वसन्ता ब्राह्मण' इत्यादि त्रैवर्णिकानामेव विहितम्। फलवन्ति चाग्निहोत्रादीनि कर्माणि[7] 'स त्रयाणां वर्णाना' मित्युक्तत्वात् त्रैवर्णिकानामेव नियतानि। विद्याग्न्यभावाच्च शूद्राणामप्रसक्तानि। उक्तो विद्याग्न्यभावः। तस्माददुष्टकर्मप्रतिषेधार्थं सूत्रम्। यथा शास्त्रान्तरे- "द्विजातिकर्मभ्यो हानिः पतन'मिति। अप्रतिषेधे तु दुष्टकर्मणामप्यधिकारोभवत्येव। 'फलवन्ति च कर्माणी'त्यभिधानात्, क्रियते इति कर्मेति निर्वचनात्। [9]"प्रागुपपनयनात् कामचारवादभक्ष' इति गौतमस्मरणं ब्रह्महत्यादिमहापातकव्यतिरिक्तविषयमित्यनुपेतस्यापि दुष्टकर्मत्वसम्भवाद् अदुष्टकर्मणा[10]मित्युक्तम्। शूद्रप्रतिषेधस्तु प्राप्तानुवादः॥ ६॥

अनुवाद–शूद्रवर्ण को छोड़कर तथा दुष्टकर्म करनेवालों को छोड़कर शेष के लिऐ उपनयन, वेद का अध्ययन, अग्नि का आधान विहित किया गया है, तथा उनके कर्म इस लोक तथा परलोक में पुण्यफल देने वाले होते हैं।

टिप्पणी— शूद्र वर्ण को छोडकर शेष तीन वर्णों में भी दुष्टकर्म न करने वालों के लिए ही उपनयन आदि धर्म विवक्षित हैं। गृह्यसूत्र में उपनयन का विधान तीन वर्णों के लिए तो किया हो गया है यहाँ भी वही विधान किया गया है। आगे आपस्तम्ब ध.सू. में शूद्र और पतित को श्मशानवत् समझा गया है। जिस व्यक्ति के

---

१. आप० गृ० ८. २. २. आप० ध० १. २. ११. ३. आप० ध० १. ९. ६
४. अध्ययनप्रतिषेधप्रकरणे वक्ष्यत इति ख० पु०
५. यस्य यस्य, स सः इति द्विरुक्तिः क० पु० ६. तै०. ब्रा. १. १. २.
७. आप० परि० १. २. ८. गौ० ध० २१. ४.
९. गौ० ध० २. १. १०. उपनयनमुक्तं इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समीप वेदाध्ययन नहीं किया जा सकता, वह व्यक्ति स्वयं कैसे वेदाध्ययन का अधिकारी हो सकता है ? अग्न्याधेय भी तीन वर्णों के लिए विहित है। पतन का कारण द्विजातिकर्म से हानि है : 'द्विजातिकर्मभ्यो हानिः पतनम्' ॥ ६ ॥

यथा ब्राह्मणादीनामुपनयनादयो धर्माः प्रधानभूताः तादृशं शूद्रस्य कर्माऽऽह-

शुश्रूषा शूद्रस्येतरेषां वर्णानाम् ॥ ७ ॥

इतरेषां ब्राह्मणादीनां वर्णानां या शुश्रूषा सा शूद्रस्य परमो धर्मः ॥ ७ ॥

अनुवाद—शूद वर्ण के लिए ब्राह्मणादि अन्य तीन वर्णों की सेवा ही धर्म है ॥७॥

[1]तत्र विशेषमाह—

पूर्वस्मिन् पूर्वस्मिन् वर्णे निश्श्रेयसं भूयः ॥ ८ ॥

सर्वप्रकारं कृताया अपि वैश्यशुश्रूषायाः मात्रयापि कृता क्षत्रियशुश्रूषा बहुतरं फलं साधयति । एवं क्षत्रियशुश्रूषाया ब्राह्मणशुश्रूषा ॥ ८ ॥

अनुवाद–क्रमशःपूर्ववर्ती वर्ण की सेवा से उत्तरोत्तर अधिक फल मिलता है। अर्थात् वैश्य की सेवा से क्षत्रिय की सेवा और उसकी अपेक्षा ब्रह्मण की सेवा अधिक पुण्य उत्पन्न करती है ॥ ८ ॥

उपायनं वेदाध्ययनमित्यादि यदुक्तं अस्मिन् क्रमे उपनयने विशेषमाह—

उपनयनं विद्यार्थस्य श्रुतितस्संस्कारः ॥ ९ ॥

विद्या अर्थः प्रयोजनं यस्य स विद्यार्थः । तस्यायं श्रुतिविहितस्संस्कारः उपनयनं नाम । 'विद्यार्थस्ये'ति वचनात् मूकादेर्न भवति । तथा च शङ्खलिखितौ [2]'नोन्मत्तमूकान् संस्कुर्यात्' इति । [3]लिङ्गस्य विवक्षितत्वात् स्त्रिया अपि न भवति यद्यपि तस्याः [4]'अग्ने गृहपते' इत्यादिकया विद्यया अर्थः । 'श्रुतित' इति वचनं तदतिक्रमे श्रौतातिक्रमप्रायश्चित्तप्राप्त्यर्थम् ॥ ९ ॥

अनुवाद–उपनयन विद्या ग्रहण करने के प्रयोजनवाले का वेद के नियम के अनुसार किया जाने वाला संस्कार है ।

टिप्पणी—विद्यार्थः, विद्या अर्थः प्रयोजनम् यस्य सः , कहने से गूँगे आदि के लिए उपनय संस्कार नहीं होता । यही बात शङ्खलिखित० में भी कही गयी है । विद्यार्थ में पुल्लिग होने से स्त्रियों के लिए संस्कार नहीं है ॥ ९ ॥

अनेकवेदाध्यायिनां वेदव्रतवदुपनयनमपि प्रतिवेदं भेदेन कर्तव्यमिति प्राप्ते उच्यते—

---

१. तत्र विशेषः, इति क० पु०

२. इदानीमुपलभ्यमानमुद्रितशङ्खलिखितस्मृतिपुस्तकेषु श्लोकोऽयं नोपलभ्यते ।

३. विद्यार्थस्येत्यत्र पुंलिङ्गस्य विवक्षितत्वात् इत्यर्थः । ४. तै. सं० १. ५. ६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेभ्यो वै वेदेभ्यस्सावित्र्यनूच्यत इति हि ब्राह्मणम् ॥ १० ॥

[1]'त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्यास्सावित्र्याः परमेष्ठी प्रजापतिः ॥' इति [2]मनुः ।

ततश्चोपनयने यत्सावित्र्या अनुवचनं तन्मुखेन सर्वे वेदा अनूक्ता भवन्तीत्यगृह्यमाणविशेषत्वादेकमेवोपनयनं सर्वार्थमिति । अस्मिन्नर्थे ब्राह्मणमपि भवति [3]ब्राह्मणमेव वा पठितम् । आर्थवणस्य वेदस्य पृथगुपनयनं कर्तव्यम् । तथा च तत्रैव श्रुतम्—[4]नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीते'ति ॥१०॥

अनुवाद—ब्राह्मण में कहा गया है कि गायत्री मन्त्र का (उपनयन में) अध्ययन सभी वेदों के अध्ययन के प्रयोजन से किया जाता है ।

टिप्पणी—इस सूत्र के द्वारा इस शंका का समाधान किया गया है कि क्या भिन्न-भिन्न वेद का अध्ययन करने के लिये पृथक्-पृथक् उपनयन होना चाहिए ? बार-बार उपनयन अनावश्यक है । एक ही बार गायत्री मन्त्र ग्रहण करना सभी वेदों का अध्ययन करने के लिए पर्याप्त है ॥ १० ॥

विद्वानेवोपनेताऽभिगम्यत इति विधातुमविदुषो निन्दामाह—

तमसो वा एष तमः प्रविशति यमविद्वानुपनयते
यश्चाऽविद्वानिति हि ब्राह्मणम् ॥ ११ ॥

यथा कश्चित् तमसस्सकाशात्तम एव प्रविष्टो न किञ्चिज्जानाति एवमेवैषः यं माणवकमविद्वानुपनयते, तथा यश्चाविद्वान् । उपनीयते इत्यपेक्ष्यते । यश्च स्वयमविद्वान् सन्नुपनीयते सोऽपि तमस एव तमः प्रविशति । अस्मिन्नर्थे ब्राह्मणमपि भवतीति ॥ ११ ॥

अनुवाद –जिसका उपनयन ऐसा व्यक्ति करता है जिसने वेदों का अध्ययन नहीं किया है' वह इस प्रकार से उपनीत व्यक्ति मानों अन्धकार से निकलकर अन्धकार में ही प्रवेश करता है और उपनयन करने वाला वेदशास्त्रानभिज्ञ व्यक्ति भी अन्धकार से निकलकर अन्धकार मे प्रवेश करता है । यह ब्राह्मण की उक्ति है ॥ ११ ॥

कीदृशस्तर्ह्युपनेताऽभिगम्यः ? तमाह—

तस्मिन्नभिजनविद्यासमुदेतं समाहितं
संस्कर्तारमीप्सेत् ॥ १२ ॥

अविच्छिन्न [5]वेदवेदिसम्बन्धे कुले जन्म अभिजनः । षड्भिरङ्गैस्सहैव

---

१. मनु, स्मृ. २. ७७.   २. मनुवचनम् इति. ख० पु०
३. प्रमाणं भवति, ब्राह्मणमिति हि वाचा पठितम्, इत्यशुद्धः पाठः ख० पु०
४. गोप० ब्रा० १. २९.   ५. वेदवित्सम्बन्धे इति. क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथावदर्थज्ञानपर्यन्तमधीतो वेदो विद्या। सर्वासम्भवे वेद एव वा। तस्मिन्नुपनयने कर्तव्ये ताभ्यां अभिजनविद्याभ्यां समुदेतं सम्पन्नम्, समाहितं विहितप्रतिषिद्धेष्ववहितमनसम्, संस्कर्तारमाचार्यमीप्सेत्। इच्छया करणं लक्ष्यते। आप्नुयादभिगच्छेदिति ॥ १२ ॥

अनुवाद—उपनयन संस्कारको कराने वाला आचार्य ऐसे व्यक्तिको बनाना चाहिए जिसका जन्म वेदविद्याध्ययन की अविच्छिन्न परम्परा वाले कुल में हुआ हो, जो छः अंगों में सहित सभी वेदों के यथावत् अर्थज्ञान से युक्त हो, समाहित (निषिद्ध कर्मों से विरत तथा विहित कर्मों में मन लगाने वाला) हो ॥ १२ ॥

तस्मिश्चैव विद्याकर्माऽऽन्तमविप्रतिपन्ने धर्मेभ्यः ॥ १३ ॥

तस्मिन्नेव चोपनेतरि विद्याकर्म विद्याग्रहणं कर्तव्यम्। आन्तमासमाप्तेः, अविप्रतिपन्ने धर्मेभ्यः यद्यसावाचार्यो धर्मेभ्यो न प्रच्युतो भवति। प्रच्युते तु तस्मिन्नसम्पर्कार्हे अन्यतोऽपि विद्याकर्म भवत्येव।

येषां चाचार्यकरणविधिप्रयुक्तमध्ययनं तेषामेतन्नोपपद्यते कथम्? उपनीयाध्यापनेनाचार्यकं भावयेदिति। सकृदुपनीतस्य माणवकस्य न पुनरुपनयनसंस्कारः सम्भवति। तं कथमन्योऽध्यापयेत्? एतेन मध्ये आचार्यमरणे माणवकस्य तदध्ययनं नाचार्यान्तरात् सम्भवतीति द्रष्टव्यम् ॥ १३ ॥

अनुवाद—यदि वह उपनयन कराने वाला आचार्य धर्म के मार्ग से भ्रष्ट नहीं होता तो उसी से समाप्तिपर्यन्त विद्या ग्रहण करनी चाहिए।

टिप्पणी—उपनयन करने वाले आचार्य के धर्मभ्रष्ट हो जाने पर दूसरे गुरु से भी विद्या ग्रहण की जा सकती है। आचार्य वही है जो उपनयन कराकर विद्या पढ़ाता है। जब बालक एक आचार्य से उपनयन कराने के बाद दूसरे के समीप अध्ययन के लिए जाता है तो क्या उसका पुनः उपनयन होना चाहिए? नहीं, तो फिर दूसरा आचार्य रूप में अध्यापन कैसे कर सकता है? इससे यही समझना चाहिए कि एक आचार्य के शिष्यत्व में आरम्भ किया गया अध्ययन दूसरे आचार्य से विद्या ग्रहण कर पूर्ण न किया जाय। यह विचार हरदत्त ने व्यक्त किया है ॥ १३ ॥

---

*. एतच्चिह्नान्तर्गतो भागः प्रक्षिप्त इति Mysore पुस्तके। परन्तु क. ग. पुस्तकयोरुपलभ्यते पाठः। एतच्च गुरुमतानुसारेण। गुरवो हि "अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयीत" इति विधिनाऽऽचार्यत्वसिध्यर्थमध्यापनं विदधताऽध्ययनमपि प्रयुज्यते, अतोऽध्यापनान्यथानुपपत्त्यैव सिध्यदध्ययनं न स्वविधिना 'स्वाध्यायोऽध्येतव्य" इत्यनेन विधीयते इति ब्रुवते। अतस्तन्मतखण्डनमिदम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]आचार्यशब्दं निराह—

यस्माद्धर्मानाचिनोति स आचार्यः ॥ १४ ॥

यस्मात्पुरुषादयं माणवकः धर्मानाचिनोति आत्मनः प्रचिनोति शिक्षते स आचार्यः [2]'अप्यक्षरसाम्यान्निर्ब्रूयादि'ति चकारमात्रेणेदं निर्वचनम्। अनेन प्रकारेण माणवकमाचार्यः शौचाचारांश्च शिक्षयेदित्युक्तं भवति ॥१४॥

अनुवाद–आचार्य वह हैं जिससे (उपनीत बालक) धर्म का चयन करता है, धर्म का ज्ञान करता है ॥ १४ ॥

तस्मै न द्रुह्येत्कदाचन ॥ १५ ॥

तस्मै एवंभूताचार्याय कदाचन कदाचिदपि न द्रुह्येत् तद्विषयमपकारं न कुर्यात् ॥ १५ ॥

अनुवाद–उस आचार्य से कभी द्रोह न करे। उसका अपकार न करे ॥ १५ ॥

कस्मादित्यत आह—

स हि विद्यातस्तं जनयति ॥ १६ ॥

स ह्याचार्यः तं माणवकं विद्यातो जनयति, यथा पिता मातृतः।

[3]अत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥

इति शास्त्रान्तरम् ॥ १६ ॥

अनुवाद—वह आचार्य उस बालक को विद्या से उत्पन्न करता है (जिस प्रकार पिता ने माता से उत्पन्न किया है) ॥ १६ ॥

तच्छ्रेष्ठं जन्म ॥ १७ ॥

तद्विद्यातो जन्म श्रेष्ठं प्रशस्ततमम्' अभ्युदयनिःश्रेयसहेतुत्वात् ॥ १७ ॥

अनुवाद–विद्या से होने वाला यह जन्म श्रेष्ठ होता है।

टिप्पणी—यह जन्म इस कारण श्रेष्ठ होता है कि वह अभ्युदय स्वर्गसुख तथा निःश्रेयस् मोक्ष का हेतु होता है ॥ १७ ॥

मातापितृभ्यामाचार्यः श्रेष्ठ इत्याह—

शरीरमेव मातापितरौ जनयतः ॥ १८ ॥

मातापितरौ शरीरमात्रमेव काष्ठकुड्यादिसमं जनयतः। आचार्यस्तु सर्वपुरुषार्थक्षमरूपं जनयति [4]"आचार्यः श्रेष्ठो गुरूणा"मिति गौतमः ॥१८॥

---

१. आचार्यशब्दनिर्वचनमाह. इति क० ग० पु० २. निरु० २. १. १.

३. मनु० स्मृ० २. १७०. ४. गौ० ध० २.५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुवाद—माता और पिता तो शरीरमात्र ही उत्पन्न करते हैं।

टिप्पणी—साधारण पदार्थों जैसे शरीर मात्र को उत्पन्न करने वाले माता-पिता की अपेक्षा आचार्य का कार्य अधिक महान् है, क्योंकि आचार्य सभी पुरुषार्थों की प्राप्ति के लिए समर्थ बनाकर उत्पन्न करता है। अतएव गौतम धर्मसूत्र में आचार्य को श्रेष्ठ माना गया है ॥ १८ ॥

वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदि वैश्यं, गर्भाष्टमेषु ब्राह्मणं, गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यम् ॥ १९ ॥

[1]वसन्ते ब्राह्मणमित्यादि गृह्ये गतम् ॥ १९ ॥

अनुवाद—वसन्त ऋतुमें ब्राह्मण बालक को उपनयन करना चाहिए, ग्रीष्ममें क्षत्रिय का तथा शरद् ऋतु में वैश्य का। ब्राह्मण वालक का उपनयन गर्भ के आठवें वर्ष में, राजन्य का गर्भ के ग्यारहवें वर्ष में तथा वैश्य का गर्भ के बारहवें वर्ष में उपनयन करना चाहिए ॥ १९ ॥

अथ काम्यानि ॥ २० ॥

कामनिमित्तान्युपनयनानि वक्ष्यन्ते ॥ २० ॥

अनुवाद—अब किसी विशेष अभिलाषा के उद्देश्य से उपनयन के वर्ष का निर्देश किया जाता है ॥ २० ॥

[2]सप्तमे ब्रह्मवर्चसकामम् ॥ २१ ॥ अष्टम आयुष्कामम् ॥ २२ ॥ नवमे तेजस्कामम् ॥ २३ ॥ दशमेऽन्नाद्यकामम् ॥ २४ ॥ एकादश इन्द्रियकामम् ॥ २५ ॥ द्वादशे पशुकामम् ॥ २६ ॥

'ब्रह्मवर्चसकाम' मित्यादीनि षट् सूत्राणि स्पष्टार्थानि। सर्वत्रोपनयीतेत्यपेक्ष्यते ॥ २१-२६ ॥

अनुवाद—ब्रह्मवर्चस् अर्थात् विद्या में उत्कर्ष प्राप्त करने की अभिलाषा वाले का सातवें वर्ष में, दीर्घजीवन की इच्छा वाले का आठवें वर्ष में, तेज या पौरुष शक्ति की इच्छा वाले व्यक्तिका नवें वर्ष में, अन्न की कामना वाले का दसवें वर्ष में, इन्द्रियशक्ति चाहने वाले का ग्यारहवें वर्ष में और पशुसम्पत्ति के अभिलाषी का उसके बारहवें वर्ष में उपनयन करना चाहिए ॥ २१–२६ ॥

[3] 'आचार्याधीनस्स्या' दित्यादीनि यानि ब्रह्मचारिणो व्रतानि वक्ष्यन्ते तेष्वसमर्थानां कुमाराणां वर्णक्रमेणानुकल्पमाह—

---

१. आप० गृ० ११. २. २. इतः प्रभृति सूत्रषट्कमेकसूत्रतया लिखितं क. पुस्तके।

३. आप० ध० १. २. १९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आषोडशाद्ब्राह्मणस्यानात्यय आद्वाविंशात्क्षत्रियस्याऽऽचतुर्विंशाद्वैश्य-
स्य यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः ॥ २७ ॥

आकारोऽभिविधौ। अत्ययोऽतिक्रमः। स एवाऽऽत्ययः तदभावोऽनात्ययः। यादृच्छिको दीर्घः, आङो वा प्रश्लेषः। प्रकरणादुपनयनकालस्येति गम्यते। यथा व्रतेषु समर्थः स्यात् तथैतावान् कालः प्रतीक्ष्यः। पूर्वमेव तु सामर्थ्ये सत्यष्टमवर्षाद्यतिक्रमे वक्ष्यमाणं प्रायश्चित्तमेव भवति। एवं षोडशादिभ्य उर्ध्वं कियन्तञ्चित्कालमसमर्थानां पश्चात्सामर्थ्ये सति प्रायश्चित्तं भवत्येव ॥२७॥

अनुवाद–यदि ब्राह्मण का उपनयन उसके सोलहवें वर्ष पूरा होने से पूर्व, क्षत्रिय का बाइसवे वर्ष पूरा होने से पूर्व और वैश्य का चौबीसवें वर्ष पूरा होनेसे पूर्व उपनयन संस्कार हो जाय, तो धर्म का उल्लंघन नहीं होता। उपनयन संस्कार ऐसी अवस्था में हो जब वह आगे उल्लिखित व्रतों को करने में समर्थ हो।

टिप्पणी—इस सूत्र का तात्पर्य यह है कि जैसे ही बालक वेद का अध्ययन आरम्भ करने योग्य अवस्था प्राप्त करे उसका उपनयन होना चाहिए। जब उपनयन संस्कार किसी ऐसे समय पर न हो जब होना चाहिये अर्थात् जब वह वेदाध्ययन करने के लिए समर्थ रहा हो, तो आगे के सूत्रों में उल्लिखित प्रायश्चित्त कर्म करना चाहिए। ब्राह्मण के लिए सोलह वर्ष की, राजन्य के लिए बाइस तथा वैश्य के लिए चौबीस वर्ष की अवस्था यज्ञोपवीत की अन्तिम अवधि बतायी गई है, इस समय तक उपनयन अवश्य होना चाहिए। उसके बाद प्रायश्चित्त का विधान है ॥ २७ ॥

तदानीं प्रायश्चित्तमाह—

अतिक्रान्ते सावित्र्याः ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् ॥२८॥

यस्य यः सावित्र्याः काल उक्तः तदतिक्रमे त्रैविद्यकं त्र्यवयवा विद्या तामधीयते ये ते त्रैविद्याः, तेषमिदं त्रैविद्यकम्। [1]गोत्रचरणाद्वुञ्। 'चरणाद्धर्माम्नाययोरि'रिति वुञ्। एवंभूतं ब्रह्मचर्यम्, अग्निपरिचर्यामध्ययनं गुरुशुश्रूषामिति परिहाप्य, सकलं ब्रह्मचारिधर्मं चरेत्। कियन्तं कालम्? ऋतुं, कालध्वनो' रिति द्वितीया। ऋतुमिति वचनादृत्वारम्भे प्रायश्चित्तारम्भमिच्छन्ति ॥ २८ ॥

अनुवाद—यदि सावित्रीग्रहण अर्थात् उपनयन का काल बीत गया है तो एक ऋतु तक अर्थात् दो मास तीन वेदों का अध्ययन करने वालों की तरह ब्रह्मचर्य का व्रत धारण करे।

टिप्पणी—इस समय में ब्रह्मचर्य आदि के उन सभी नियमों के पालन का निर्देश किया गया है जो तीनों वेदों का अध्ययन करने वाले विद्यार्थी के लिए विहित

१. पा॰ सू॰ ४.३.१२६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

है किन्तु इस व्रत के काल में वह तीन वेदों के अध्येता ब्रह्मचारी के समान अग्निकर्म, अध्ययन और गुरुशुश्रूषा न करे ॥ २८ ॥

अथोपनयनम् ॥ २९ ॥

एवं चरितव्रत उपनेतव्यः ॥ २९ ॥

अनुवाद—इस प्रकार प्रायश्चित व्रत कर लेने पर उसका उपनयन संस्कार किया जाय ॥ २९ ॥

ततस्संवत्सरमुदकोपस्पर्शनम् ॥ ३० ॥

ततः उपनयनादारभ्य संवत्सरमुदकोपस्पर्शनं स्नानं कर्तव्यम्। शक्तस्य त्रिषवणं स्नानम् [1]अशक्तस्य यथाशक्ति ॥ ३० ॥

अनुवाद—उपनयन के बाद एक वर्ष तक प्रतिदिन स्नान करे।

टिप्पणी—यदि सम्भव हो तो प्रतिदिन तीन बार स्नान करे—हरदत्त ॥ ३० ॥

अथाऽध्याप्यः ॥ ३१ ॥

एवं चरितव्रतः पश्चादध्याप्यः ॥ ३१ ॥

अनुवाद—इस प्रकार व्रत कर लेने वाले को वेद का अध्यापन करे ॥३१॥

अथ यस्य पिता पितामह इत्यनुपेतौ स्यातां ते ब्रह्महसंस्तुताः ॥३२॥

यस्य माणवकस्य पिता पितामहश्चानुपेतौ स्यातां स्वयं च, ते तथाविधास्स माणवका ब्रह्महसंस्तुताः ब्रह्महण इत्येव कीर्तिताः ब्रह्मवादिभिः। अतस्मिन् तच्छब्दयोगस्तद्धर्मप्राप्त्यर्थः। एवं च [2]'श्मशानवच्छूद्रपतिता'वित्यध्ययननिषेधप्रकरणे वक्ष्यते। ततश्च ब्रह्म यथा ब्रह्महसमीपे नाध्येयमेवमेषामपीति ॥३२॥

अनुवाद—जिसके पिता और पितामह का उपनयन संस्कार नहीं हुआ है,तथा स्वयं का भी उपनयन नहीं हुआ है उसे तथा उसके पिता, पितामह को ब्रह्महण कहा गया है।

टिप्पणी—ब्रह्मन् का अर्थ यहाँ वेद से है और उपनयन संस्कार न कराकर वेदाध्ययन की उपेक्षा करने वाला वेद की हत्या करता है और इस प्रकार वह ब्रह्महण है और इस प्रकार का व्यक्ति पतित होता है। पतित शूद्र को श्मशान के समान माना गया है ॥ ३२ ॥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् ॥ ३३ ॥

तेषामेतेषामभ्यागमनमाभिमुख्येन गमनम्, मातापितृपुत्रदारशरीररक्षणार्थमपि वर्जयेत्। यद्यपि भिक्षा सर्वतः प्रतिग्राह्येति वक्ष्यते भोजनमुद्यतमपि

१. अन्यस्य' क. ख. पु.   २. आप घ० १. ९. ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्जयेत् [1]'अपि दुष्कृतकारिण' इति सत्यपि वचने। विवाहं च वर्जयेत् यद्यपि [2]'स्त्रीरत्नं दुष्कुलादपी'ति मानवस्मरणम् ॥ ३३ ॥

अनुवाद—ऐसे ब्रह्मण लोगों के साथ मिलने-जुलने, भोजन करने तथा विवाह संबन्ध करने का वर्जन करे।

टिप्पणी—यद्यपि भिक्षा के विषय में कहा गया है कि भिक्षा कहीं से भी ली जा सकती है और विवाह के विषय में भी कहा गया हैं कि स्त्रीरत्न दुष्कुल से भी ग्राह्य है, तथापि यह सूत्र इन सबका वेदाध्ययन न करने वाले ब्रह्मन् के सम्बन्ध में निषेध करता है ॥ ३३ ॥

तेषामिच्छतां प्रायश्चित्तम् ॥ ३४ ॥

इच्छतामिति वचनान्न बलात्कारेण प्रायश्चित्तं कारयितव्यम् ॥ ३४ ॥

अनुवाद—यदि वे चाहें तो यह प्रायश्चित करें (बलपूर्वक उनसे प्रायश्चित न कराया जाय) ॥ ३४ ॥

यथा प्रथमेऽतिक्रम ऋतुरेवं संवत्सरः ॥ ३५ ॥

यथा प्रथमेऽतिक्रमे ब्रह्मचर्यस्य ऋतुः कालः एवमन्यस्मिन्नतिक्रमे संवत्सरः कालः ॥ ३५ ॥

अनुवाद—वेदाध्ययन की उपेक्षा के लिए पहले एक ऋतु अर्थात् दो मास का जैसा प्रायश्चित्त बताया गया है वैसा ही प्रायश्चित एक वर्ष करे ॥ ३५ ॥

अथोपनयनम् ॥ ३६ ॥ तत उदकोपस्पर्शनम् ॥ ३७ ॥

गते ॥ ३६–३७ ॥

अनुवाद—उसके बाद उनका उपनयन हो और वे स्नान् करें ॥ ३६–३७ ॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने प्रथमा [3]कण्डिका।

—:o:—

प्रतिपूरुषं संख्याय संवत्सरान् यावन्तोऽनुपेताः स्युः ॥ १ ॥

यदि पितैवानुपेतः ततस्संवत्सरमेकम्। अथ पितामहोऽपि, ततो द्वौ। अथ स्वयमपि यथाकालमनुपेतः, ततः संवत्सराननिति ॥ १ ॥

अनुवाद—जितने पूर्वज अनुपेत हों, उनमें प्रत्येक के लिए एक एक वर्ष जोड़कर (तथा अपने लिए भी एक वर्ष जोड़कर) उतने वर्ष तक ब्रह्मचर्य व्रत का प्रायश्चित करे ॥ १ ॥

---

१. आप० ध० १.१९.१३ २. मनु० स्मृ० २.२३८.

३. खण्डिका इति. क. पुस्तके। खण्डः इति ख. पुस्तके। एवमेव प्रतिखण्डसमाप्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथोदकोपस्पर्शने मन्त्राः—

सप्तभिः पावमानीभि"र्यदन्ति यच्च दूरक' इत्येताभिर्यजुष्पवित्रेण सामपवित्रेणाऽऽङ्गिरसेनेति ॥ २ ॥

पवमानः सोमो देवता यासां ताः [1]पावमान्यः। यजुष्यवित्रेण [2]आपो अस्मान्मातरः शुन्धन्त्वि' त्यनेन, सामपवित्रेण 'कया नश्चित्र आभुवदि' त्यादिगीतेन वामदेव्येन साम्ना, आङ्गिरसेन [3]'हंसःशुचिषदि'त्यनेन एतैरञ्जलिना शिरस्यपोऽवसिञ्चेत् ॥ २ ॥

अनुवाद—वह प्रतिदिन यजुष्पवित्र के 'यदन्ति यच्च दूरक' आदि सात पवमान मन्त्रों द्वारा, सामपवित्र के 'कया नश्चित्र आभुवत्' आदि वामदेव के साम से तथा अङ्गिरस के तैत्तिरीयसंहितान्तर्गत 'हंसश्शुचिषद्वसुरन्तरिक्षसद्धोता आदि ४. २. १. ४ से अञ्जलि से जल लेकर सिर पर सिञ्चन करे ॥ २ ॥

अपि वा व्याहृतिभिरेव ॥ ३ ॥

पूर्वैः सह व्याहृतीनां विकल्पः ॥ ३ ॥

अनुवाद—अथवा पूर्वोक्त मन्त्रों के साथ व्याहृतियों का भी प्रयोग करते हुए सिंचन करे ॥ ३॥

अथाऽध्याप्यः ॥ ४ ॥

गतम् ॥ ४ ॥

---

१. यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमान वितज्जहि ॥ १ ॥
पवमानस्सोऽद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु नः ॥ २ ॥
यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा। ब्रह्म तेन पुनीहि नः ॥ ३ ॥
यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः। ब्रह्म सवैः पुनीहि नः ॥ ४ ॥
उभाभ्यां देव सवितः पवित्रेण सवेन च। मां पुनीहि विश्वतः ॥ ५ ॥
त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः। अग्ने दक्षैः पुनीहि नः ॥ ६ ॥
पुनन्तु मां देवजनाः पुनन्तु वसवो धिया। विश्वे देवाः पुनीतन मा जातवेदः पुनीहि मा ॥७॥ (ऋ० सं० ७.२.१७ १८.) इति सप्त पावमान्यः ॥

२. आपो अस्मान् मातरश्शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु विश्वमस्मत्प्रवहन्तु रिप्रम्" (तै. स. १.२.१) इति यजुःपवित्रम्। 'कया नश्चित्र आ भुवदूती सदावृधस्सखा। कया शचिष्ठया वृता' इत्यस्यामृचि गीयमानं वामदेव्याख्यं साम सामपवित्रम् ॥

३. 'हꣳसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्" (तै. सं. ४. २. १.४.) इत्याङ्गिरसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र 'यस्य पिता पितामह' इत्युपक्रमे 'यस्ये' त्येकवचनमन्तेऽप्यध्याप्य' इति। मध्ये तु 'ब्रह्महसंस्तुताः' तेषामभ्यागमनं' 'तेषामिच्छता'मिति बहुवचनम्। तत्रोपक्रमोपसंहारानुसारेण माणवकस्यैव प्रायश्चित्तमुपनयनमध्यापनं च। बहुवचनं तु तथाविधमाणवकबहुत्वापेक्षमित्यवोचाम ॥ ४ ॥

अनुवाद—इस प्रायश्चित के बाद ऐसे व्यक्ति का अध्यापन किया जाता है ॥४॥

अथ यस्य प्रपितामहादि नानुस्मर्यंत उपनयनं ते श्मशानसंस्तुताः ॥ ५ ॥

प्रपितामहादि प्रपितामहादारभ्य प्रपितामहः पितामहः पिता स्वयं च यथाकालमिति। ते तथाविधा माणवकाः श्मशानसंस्तुताः। एतेन [1]'श्मशाने सर्वतः शम्याप्रासा' दित्यध्ययननिषेध एषामपि सन्निधौ भवति ॥ ५ ॥

अनुवाद—किन्तु जिनके प्रपितामह आदि का (अर्थात् प्रपितामह, पितामह, पिता और स्वयं का) उपनयन होने का स्मरण नहीं है। वे श्मशान कहे जाते हैं ॥ ५ ॥

टिप्पणी—अर्थात् वे पतित होते हैं और जिस प्रकार श्मशान के समीप वेदाध्ययन नहीं किया जाता उसी प्रकार ऐसे पतित लोगों के समीप वेद का उच्चारण नही किया जाता, उनके द्वारा वेद का अध्ययन तो दूर रहा ॥ ५ ॥

तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत्तेषामिच्छतां प्रायश्चित्तं द्वादशवर्षाणि त्रैविद्यकं ब्रह्मचर्यं चरेदथोपनयनं [2]तत उदकोपस्पर्शनं पावमान्यादिभिः ॥ ६ ॥

गतम्। पावमान्यादिभिरित्यनेनैव प्रतिपूरुषं सङ्ख्याय संवत्सरानित्येतदपि द्रष्टव्यम् ॥ ६ ॥

अनुवाद—उनके साथ मिलने-जुलने, भोजन और विवाह का वर्जन करना चाहिए। यदि वे प्रायश्चित्त करना चाहें तो बारह वर्ष तक तीन वेदों के अध्येता ब्रह्मचारी के व्रत का (अग्निकर्म, अध्ययन और गुरुशुश्रूषा को छोड़कर) पालन करें, उसके बाद उनका उपनयन हो और तदुपरान्त वे पवमान आदि मन्त्रों से (जिनका उल्लेख इस कण्डिका के दूसरे मन्त्र में किया गया है) स्नान करे ॥६॥

अथ गृहमेधोपदेशनम ॥ ७ ॥

गृहमेधो गृह्यशास्त्रं गृहस्थधर्मो वा ॥ ७ ॥

---

१. आप. ध. १. ९. ६. २. ततस्संवत्सरमुदकोपस्पर्शनम्. इति ग. पु.।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुवाद—तत्र उसे गृहस्थ के नियमों का उपदेश दिया जाय ॥ ७ ॥

नाध्यापनम् ॥ ८ ॥

नाध्यापनं कृत्स्नस्य वेदस्य । किं तु गृह्यमन्त्राणामेवेति ॥ ८ ॥

अनुवाद—उसे सम्पूर्ण वेद की शिक्षा न दी जाय ।

टिप्पणी—अपितु केवल गृह्य कर्म प्रयुक्त मन्त्रों का ही अध्यापन हो ॥ ८ ॥

ततो यो निवर्तते तस्य संस्कारो यथा प्रथमेऽतिक्रमे ॥९॥

ततः एवं कृतप्रायश्चित्तात् गृहस्थीभूताद्यो निवर्तते उत्पद्यते तस्योपनयनसंस्कारः कर्तव्यः। कथम्? यथा प्रथमेऽतिक्रमे ॠतुं त्रैविद्यकं ब्रह्मचर्यं चारयित्वेत्यर्थः ॥ ९ ॥

अनुवाद—गृह्यमन्त्रों का अध्ययन समाप्त कर लेने पर उसका उसी प्रकार उपनयन संस्कार किया जाय जिस प्रकार प्रथम अतिक्रम के सम्बन्ध में किया था ।

टिप्पणी—प्रथम वेदाध्ययन के अतिक्रम में जिस प्रकार एक ॠतु अर्थात् दो मास के ब्रह्मचर्यव्रत के प्रायश्चित का विधान किया गया था, वही प्रायश्चित्त यहाँ भी विहित है ॥ ९ ॥

तत ऊर्ध्वं प्रकृतिवत् ॥ १० ॥

ततः यो निवर्तते तस्य प्रकृतिवत् यथा प्राप्तमुपनयनं कर्तव्यमिति । यस्य तु प्रपितामहस्य पितुरारभ्य नानुस्मर्यत उपनयनं तत्र प्रायश्चित्तं नोक्तम्, धर्मज्ञैरूहितव्यम् ॥ १० ॥

अनुवाद—उसके बाद सभी कर्म वैसे ही किये जाते हैं जैसे सामान्य उपनयन के संन्दर्भ में होता है ।

टिप्पणी—हरदत्त ने यह संकेत किया है कि जिनके प्रपितामह से भी पूर्ववर्ती पुरुषों के उपनयन का स्मरण नहीं है उसके विषय में धर्मज्ञ व्यक्तियों को व्यवस्था देनी चाहिए ॥ १० ॥

एवं ततः पूर्वेष्वपि निरूपितमुपनयनम्, अथाऽध्ययनविधिः—

उपेतस्याऽऽचार्यकुले ब्रह्मचारिवासः ॥ ११ ॥

एवं यथाविध्युपेतस्य ब्रह्मचारिणस्सत आचार्यकुले वासो भवति । ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी । अध्ययनाङ्गानि व्रतानि चरता आचार्यकुले वस्तव्यमित्युक्तं भवति ॥ ११ ॥

अनुवाद—उपनीतबालक ब्रह्मचारी होकर आचार्य के कुल में निवास करे ।

टिप्पणी—ब्रह्मचारी की व्युत्पत्ति हरदत्त की व्याख्या में द्रष्टव्य है । 'ब्रह्म वेदस्तदर्थं व्रतं चरतीति ब्रह्मचारी ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र कालः—

[1]अष्टाचत्वारिंशद्वर्षाणि ॥ १२ ॥

चतुर्णां वेदानामध्ययनकाल एषः । प्रतिवेदं द्वादश ॥ १२ ॥

अनुवाद—अड़तालिस वर्ष तक गुरुकुल में निवास करे ।

टिप्पणी—यह समय चार वेदों के अध्ययन के लिए है, प्रत्येक वेद के अध्ययन के लिए बारह वर्ष का काल बताया गया है ॥ १२ ॥

पादूनम् ॥ १३ ॥

स एव कालः पादूनं वा प्रत्येतव्यः । पादेनोनं पादूनम् । पररूपं [2]कतन्तवत् । षट्त्रिंशद्वर्षाणि । प्रतिवेदं नव ॥ १३ ॥

अनु०—अथवा एक चौथाई कम समय होता है अर्थात् छत्तीस वर्ष निवास करे ।

टिप्पणी—इस प्रकार प्रत्येक वेद के लिए नौ वर्ष का समय विवक्षित है ॥१३॥

अर्धेन ॥ १४ ॥

ऊनमिति [3]समस्तमप्यपेक्षते । चतुर्विंशतिर्वर्षाणि । प्रतिवेदं षट् ॥ १४ ॥

अनुवाद—अथवा उसके आधे समय तक अर्थात् चौबीस वर्ष तक निवास करे ।

टि०—इस प्रकार प्रत्येक वेद के लिए छः वर्ष का समय भी विवक्षित है ॥१४॥

त्रिभिर्वा ॥१५॥

पादैरूनमिति प्रकरणाद् गम्यते । द्वादशवर्षाणि । प्रतिवेदं त्रीणि ॥ १५ ॥

अनुवाद—अथवा तीन चौथाई कम समय तक निवास करे । अर्थात् केवल बारह वर्ष तक निवास करे , प्रत्येक वेद का तीन वर्ष तक अध्ययन करे ॥ १५ ॥

द्वादशावरार्ध्यम् ॥ १६ ॥

अवरार्ध्यशब्दोऽवरमात्रेत्येतस्मिन्नर्थे वर्तते । द्वादशवर्षाणि अवरमात्रा यथा भवति तथा ब्रह्मचारिणा गुरुकुले वस्तव्यम् । पूर्वेणैव सिद्धे यो ब्रह्मचार्यतिमेधावितया चतुरोऽपि वेदानितोऽल्पीयसा कालेन गृह्णाति तेनाप्येतावन्तं कालं गुरुकुले वस्तव्यम् ।[4] 'विद्यया स्नाती'त्येतस्मिन्नपि पक्षे नातित्वरितेन स्नातव्यमित्येवमर्थमिदमारभ्यते । एतेन एकस्य वेदस्य त्रीणि वर्षाणि ब्रह्मचर्यमवश्यं[5] भावीत्यर्थात्सिद्धम् ।

१, गोपथब्राह्मणेऽथर्ववेदीयद्वितीयप्रपाठके पञ्चमब्राह्मणेऽस्य विधिर्दृश्यते—तस्मा एतत् प्रोवाचाष्टाचत्वारिंशद्वर्षं तच्चतुर्धा वेदेषु व्यूह्य द्वादशवर्षं ब्रह्मचर्यं द्वादशवर्षाण्यवरार्धमपि स्नायंश्चरेद्यथाशक्त्यपरम्' (गोप० ब्रा० पू. २. ५.) इति ॥

२. 'शकन्ध्वादित्वात्' इति घ० पु० ।

३, उपसमस्तमिति ख० पु० प्राप्तसमासमपीत्यर्थः सर्वत्राप्यपेक्षते इति. घ. पु.

४. आप० ध. १. ३०. १ ५. भावीत्ययमर्थस्सिद्धः । इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुरप्याह—

[1]षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैविद्यकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ।। इति ।।

त्रयाणां वेदानां षट्त्रिंशत्, एकैकस्य द्वादश । तदर्धिकं त्रयाणामष्टादश; एकैकस्य षट् । पादिकं वा त्रयाणां नव; एकैकस्य त्रीणि । ग्रहणान्तिकमेव वेति एकैकस्य त्रिभ्य ऊर्ध्वमनियम; न प्रागित्यर्थो द्रष्टव्यः ।। १६ ।।

अनु०—बारह वर्ष तक अवधि की आचार्यकुल में निवास करने की न्यूनतम अवधि है ।

टिप्पणी—व्याख्याकार के अनुसार बारह वर्ष निवास करे । जो ब्रह्मचारी उसके पहले ही चारो वेदों का अध्ययन पूरा कर ले वह भी बारह वर्ष तक निवास करे ।।१६।।

न ब्रह्मचारिणो विद्यार्थस्य परोपवासोऽस्ति ।। १७ ।।

ब्रह्मचारिविद्यार्थशब्दयोरर्थ उक्तः । यो ब्रह्मचरी विद्यार्थो भवति न तेन दिवसमात्रमपि परस्य समीपे वस्तव्यम् । आचार्यस्य समीप एव वस्तव्यमित्युक्तं भवति । विद्यार्थस्येति वचनात् नैष्ठिकस्य कदाचिदन्यत्र [2]वासेऽपि न दोषः । यद्वा भोजननिवृत्तिरेवोपवासः । परलोकार्थ उपवासः परोपवासः स विद्यार्थस्य न भवति । नैष्ठिकस्य तु [3]दोषः । अत्र पक्षे[4] 'आहिताग्निरनड्वानि'ति विद्यार्थब्रह्मचारिविषयम् ।। १७ ।।

अनुवाद—विद्याग्रहण करने की अभिलाषा वाला ब्रह्मचारी दूसरे के समीप निवास न करे ।

टिप्पणी—ऐसे ब्रह्मचारी को आचार्य के समीप ही निवास करना चाहिए । एक दिन के लिए भी किसी दूसरे के समीप निवास न करे । विद्यार्थ नैष्ठिक ब्रह्मचारी का कभी दूसरे के समीप निवास करने में दोष नहीं है । इस प्रकार यह नियम नैष्ठिक ब्रह्मचारी के संबन्ध में लागू नहीं होता । हरदत्त ने परोपवास की एक अन्य व्याख्या भी की है । पर अर्थात् परलोक के लिए उपवास अर्थात् भोजननिवृत्ति, परलोकार्थ उपवास विद्यार्थी के लिए विहित नहीं है ।। १७ ।।

अथ ब्रह्मचर्यविधिः ।। १८ ।।

ब्रह्म वेदस्तदर्थं यद्व्रतं चरितव्यं तद् ब्रह्मचर्यं तदधिक्रियते ।। १८ ।।

अनुवाद—अब ब्रह्मचर्य की विधि बतायी जाती है ।। १८ ।।

आचार्याधीनस्स्यादन्यत्र पतनीयेभ्यः ।। १९ ।।

"आचार्याधीनो भवे" त्युपनयनान्ते यत् संशासनं तत्सिद्धैवाचार्याधीनता

---

१. मनु० स्मृ० ३. १ २. वासो न दोषः इति क० पु०
३. न दोषः इति ख० पु० ४. आप० ध. २. ९. १३.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तानूद्यते 'अन्यत्र पतनीयेभ्य' इति विशेषं वक्ष्यामीति।[1] पतनीय इति करणे कृत्प्रत्ययः। [2]अमुमरातिं ब्राह्मणमित्थं व्यापादयेत्याचार्येण चोदितोऽप्येवमादि न कुर्यादिति ॥ १९ ॥

अनुवाद—उन कार्यों के आदेश को छोड़कर जिनसे पतन होता है, गुरु के सभी आदेशों का पालन करे।

टिप्पणी—यदि आचार्य किसी की हत्या करने के लिऐ अथवा अन्य पाप कर्मों की आज्ञा दे तो ब्रह्मचारी उन कार्यों के लिए गुरु की आज्ञा का पालन न करे किन्तु ऐसे कर्मों के अतिरिक्त निरन्तर गुरु के अधीन रहे। पतनहेतुक आज्ञाओं के अतिरिक्त सभी आज्ञाओं का पालन करे ॥ १९ ॥

हितकारी गुरोरप्रतिलोमयन् वाचा ॥ २० ॥

आचार्येण प्रयुक्तोऽप्यप्रयुक्तोऽपि तस्मै हितमेव कुर्यात्, वाचा [3]प्रातिलोम्यमकुर्वन् ॥ २० ॥

अनु०—गुरु का निरन्तर भला करे और वाणी से उनका विरोध न करे ॥ २० ॥

अधासनशायी ॥२१॥

शयनं शायः। [4]'कृत्यल्युटो बहुल' मिति बहुलवचनात् घञ्। अधः आसनशायो यस्य सः अधासनशायी। गुरुसन्निधावध आसीत अधश्शयीतेत्युक्तं भवति। अधश्शब्दस्य सवर्णदीर्घश्छान्दसः, अपपाठो वा। तृणेषु प्रस्तरेषु चासनशयने शिष्टाचारसिद्धे ॥ २१ ॥

अनुवाद—गुरु के निकट उनसे नीची शय्या पर ही सोवे ॥ २१ ॥

नानुदेश्यं भुञ्जीत ॥ २२ ॥

अनुदेश्यं श्राद्धार्थं देवतार्थं वा उद्दिष्टं न भुञ्जीत ॥ २२ ॥

अनुवाद—श्राद्ध में या देवता के लिए अर्पित भोजन को न ग्रहण करे ॥ २२ ॥

तथा क्षारलवणमधुमांसानि ॥ २३ ॥

न भुञ्जीतेत्येव। [5]क्षारादीनि गृह्ये गतानि ॥ २३ ॥

अनुवाद—चटपटा पदार्थ, नमकीन वस्तु, मधु और मांस का भक्षण न करे ॥२३॥

अदिवास्वापी ॥ २४ ॥

न दिवा स्वप्यात् ॥ २४ ॥

अनुवाद—दिन में शयन न करे ॥ २४ ॥

---

१. करणे प्रत्ययः इति क० पु० २. अस्मदरातिं इति ख० पु०
३. प्रातिकूल्यं इति ख० पु० ४. पा० सू० ३. ३. ११३
५. क्षारपदार्थः आप० ध० २. १५. ११. सूत्रे व्याख्यास्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अगन्धसेवी ॥ २५ ॥

चन्दनादीनि गन्धद्रव्याणि न सेवेत ॥ २५ ॥

अनुवाद—सुगन्धित द्रव्यों का सेवन न करे ॥ २५ ॥

मैथुनं न चरेत् ॥ २६ ॥

उपचारक्रिया केली स्पर्शो [1]भूषणवाससाम् ।
एकशय्यासनं क्रीडा चुम्बनालिङ्गने तथा ॥

इत्यादेस्सर्वस्योपलक्षणं मैथुनग्रहणम् ॥ २६ ॥

अनुवाद—सभी प्रकार के मैथुन सुखों का वर्जन करे ॥ २६ ॥

उत्सन्नश्लाघः ॥ २७ ॥

श्लाघा शोभा सा उत्सन्ना यस्य स उत्सन्नश्लाघः ॥ एवंभूतो भवेत् । [2]म्रक्षणादिना मुखादिकम् उज्ज्वलं न कुर्यात् इति ॥ २७ ॥

अनुवाद—(सुगन्धित लेपों द्वारा) अपनी सुन्दरता बढ़ाने की इच्छा न करे ॥२७॥

अङ्गानि न प्रक्षालयोत ॥ २८ ॥

[3]विना शिरसा सुखार्थमुष्णोदकादिना शरीरं न प्रक्षालयेत् ॥ २८ ॥

अनुवाद—अपने सुख के लिए (उष्ण आदि जल से) अंगों को न धोवे ॥२८॥

प्रक्षालयीत त्वशुचिलिप्तानि[4] गुरोरसन्दर्शे ॥२९॥

यानि तु मूत्रपुरीषाद्यशुचिलिप्तान्यङ्गानि तानि कामं [5]मृदाद्भिः प्रक्षालयेत् यावद्गन्धो लेपश्चापैति । तदपि गुरोरसन्दर्शे [6] यत्र स्थितं गुरुर्नपश्यति तत्र । आचार्यप्रकरणे गुरुग्रहणात् पित्रादीनामपि ग्रहणम् ॥ २९ ॥

अनुवाद—किन्तु यदि शरीर के अंग अपवित्र वस्तुओं (मूत्र-पुरीष आदि) से लिप्त हो तो (मिट्टी या जल से) किसी ऐसे स्थान में धोवे जहाँ गुरु उसे न देख सकें ॥२९॥

[7]नाप्सु श्लाघमानः स्नायाद्यदि स्नायाद्दण्डवत् प्लवेत् ॥३०॥

स्नाने प्राप्ते न श्लाघमानः स्नायात् । किं तु दण्डवत् प्लवेदित्युक्तम् । स्नानीयैर्मलापकर्षणं श्लाघा; क्रीडा वा जले । अपर आह—'अङ्गानि न प्रक्षा-

---

१. भूषणवाससी. इति. क० पु० २. मृत्कल्कादिना इति क० पु०

३. स्नानसमये आमलकादिभिर्न क्षालयेत् । इति क० पु०

४. गुरोरसन्दर्शने इति क० पु० ५. मृद्वारिभिः इति ख० पु०

६. यत्र गुरुर्न पश्यति तत्र । इति ख० पु० 'यत्र लिप्तं गुरुः' इति ग० पु०

७. नाप्सु श्लाघमानस्स्नायादित्येतावदेव ख० पु० सूत्रम् । "अथाद्भिश्श्लाघमानो न स्नायात् तेन तां श्लाघामवरुन्धे" (गो० ब्रा० पू० १.२.) इति गोपथब्राह्मणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ल्योते' (सू० २८) त्यासमावर्तनान्नित्यस्नानस्य प्रतिषेधः। 'प्रक्षालयीत त्वशुचिलिप्तानो' (सू० २९) ति नैमित्तिकस्य विधिः। 'नाप्सु श्लाघमानः स्नाया' (सू०३०)दिति तत्रैव श्लाघाप्रतिषेध इति ॥ ३० ॥

अनुवाद—जल में शरीर की शोभा बढ़ाने के ऊपर ध्यान देता हुआ (स्नानीय लोपों आदि से सफाई करते हुए या क्रीडा करते हुए) स्नान न करे। स्नान करे भी तो केवल डण्डे की तरह तैरे ॥ ३० ॥

जटिलः ॥३१॥

सर्वानेव केशान् जटां कृत्वा बिभृयात् ॥ ३१ ॥

अनुवाद—सभी केशों को जटा बाँधकर धारण करे ॥ ३१ ॥

शिखाजटो वा वापयेदितरान् ॥३२॥

अथवा शिखामेव जटां कृत्वा इतरान् केशान् वापयेत् नापितेन ॥ ३२ ॥

अनुवाद—अथवा शिखा को ही जटा बना कर धारण करे, शेष केशों को मुँडा डाले ॥ ३२ ॥

मौञ्जी मेखला त्रिवृद्ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानाम् ॥३३॥

मुञ्जानां विकारो मौञ्जी। त्रिवृत् त्रिगुणा। एवम्भूता ब्राह्मणस्य मेखला भवति। सा च शक्तिविषये शक्तौ सत्यां दक्षिणावृत्तानां प्रदक्षिणावृत्तानां कर्तव्या। तद्धितार्थे गुणभूतानामपि मुञ्जानामेवैतद्विशेषणम् ॥ ३३ ॥

अनुवाद—ब्राह्मण की मेखला मूँज की होती है और तीन गुण वाली होती है यदि संभव हो तो वे गुण दाहिनी ओर को बटे गए हों ॥ ३३ ॥

ज्या राजन्यस्य ॥३४॥

स्पष्टम् ॥ ३४ ॥

अनुवाद—राजन्य बालक के लिए धनुष की डोरी मेखला होती है ॥३४॥

मौञ्जी वाऽयोमिश्रा ॥३५॥

अथवा अयोमिश्रा क्वचित्तु कालायसेन बद्धा मौञ्जी मेखला भवति राजन्यस्य ॥ ३५ ॥

अनु०—अथवा अयस् के खण्ड से युक्त मूँज की मेखला भी हो सकती है ॥३५॥

आवीसूत्रं वैश्यस्य ॥३६॥

अविरूर्णायुः कम्बलप्रकृतिः तत्सम्बन्धिनी ऊर्णा आवी तत्कृतं सूत्रं आवींसूत्रम। सा मेखला वैश्यस्य भवति ॥ ३६ ॥

अनवाद—वैश्य बालक की मेखला ऊन का धागा होती है ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सैरी तामली वेत्येके ॥३७॥

सैरी सीरा बाह्योक्त्ररज्जुः। [१]तामलो मूलोदसंज्ञको वृक्षः तस्य त्वचा ग्रथिता तामली ॥ ३७ ॥

अनुवाद—अथवा बैलों को जुएँ से जोड़ने वाली रस्सी (जोता) वैश्य की मेखला हो सकती है अथवा तमाल की छाल से बटी गई रस्सी मेखला के रूप में प्रयोग की जा सकती है, ऐसा कुछ आचार्यों का मत है ॥ ३७ ॥

पालाशो दण्डो ब्राह्मणस्य नैयग्रोधस्कन्धजोऽवा[२]ङ्ग्रो राजन्यस्य बादर औदुम्बरो वा वैश्यस्य वार्क्षो दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति ॥३८॥

पालाशो दण्ड इत्यादि गृह्ये [३]गतम् ॥ ३८ ॥

अनुवाद—ब्राह्मण का दण्ड पलाश का हो, क्षत्रिय का दण्ड न्यग्रोध वृक्ष की नीचे की ओर निकलने वाली शाखा का हो तथा वैश्य ब्रह्मचारी का दण्ड बदर या उदुम्बर का हो। कुछ आचार्य विना वर्ण के निर्देश के ब्रह्मचारी का दण्ड यज्ञीय वृक्ष का विहित करते हैं ॥ ३८ ॥

वासः ॥३९॥

वस्यते कौपीनमाच्छाद्यते येन तद्वासः। तद्वक्ष्यते ॥ ३९ ॥

अनुवाद—वस्त्र (कौपीन)धारण करे ॥ ३९ ॥

शाणीक्षौमाजिनानि ॥४०॥

शणस्य विकारः शाणी पटी। क्षुमा अतसी तस्या विकारः क्षौमम्। श्वेतपट्टाख्यवासोविशेष इत्यन्ये। अजिनं यस्य कस्यचिन्मेध्यस्य पशोः। त्रीण्येतानि वर्णानुपूर्व्येण वासांसि ॥ ४० ॥

अनुवाद—वर्णों के क्रम के अनुसार कौपीन वस्त्र सन का, अतसी का अथवा किसी पवित्र पशु का चर्म हो ॥ ४० ॥

काषायं चैके वस्त्रमुपदिशन्ति ॥४१॥

एके आचार्या वस्त्रं त्वधोधार्यमुपदिशन्ति। वस्त्रं कार्पासम्। तच्च काषायं कषायेण रक्तम्। ब्राह्मणस्येत्यर्थाद्गम्यते। इतरयोर्वक्ष्यमाणत्वात् ॥ ४१ ॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने द्वितीया कण्डिका ॥ २ ॥

अनु०—कुछ आचार्य ब्राह्मण का अधो वस्त्र काषाय रंग का विहित करते हैं ॥४१॥

—:०:—

१. तमालादण् तमालसंज्ञो वृक्षः तस्य० इति घ० पु०

२. अवाङ्ग्र०:' इति क० पु०   ३. आप० गृ० ११. १५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माञ्जिष्ठं राजन्यस्य ॥१॥

मञ्जिष्ठया रक्तं माञ्जिष्ठम् ॥ १ ॥

अनुवाद—क्षत्रिय ब्रह्मचारी का वस्त्र मजीठ से रंगा हुआ होवे ॥ १ ॥

हारिद्रं वैश्यस्य ॥ २ ॥

हरिद्रया रक्तं हारिद्रम् ॥ २ ॥

अनुवाद—वैश्य का वस्त्र हल्दी से रंगा हुआ हो ॥ २ ॥

हारिणमैणेयं वा कृष्णं ब्राह्मणस्य ॥३॥

एतान्युत्तरीयाणि । 'बस्ताजिन' मिति वक्ष्यमाणत्वात् इहाप्यजिनमिति गम्यते ।[1]'अजिनमुत्तरमुत्तरये' त्युपनयने यदजिनमुक्तं धार्यं तद्धारिणं ब्राह्मणस्य; हरिणो मृगस्तस्य विकारः हारिणम् । ऐणेयं वा कृष्णम् । एणी मृगी तस्या विकार ऐणेयम् । [2]'एण्या ढञ्' । द्विविधा एण्यः कृष्णाश्च गौराश्च । अतो विशेष्यते-कृष्णमैणेयमिति ॥ ३ ॥

अनुवाद—ब्राह्मण द्वारा धारण किया जाने वाला चर्म हरिण का हो अथवा काले रंग की मृगी का चर्म हो ॥ ३ ॥

अस्मिन् पक्षे विशेषमाह—

कृष्णं चेदनुपस्तीर्णासनशायी स्यात् ॥४॥

कृष्णं चेद्बिभृयात् न हारिणं ततस्तस्मिन्नुपस्तीर्णे नासीत, न च शयीत । अयं तावदर्थः । शब्दनिर्वाह [3]'स्वधासनशायी'त्यत्र कृतः ॥४॥

अनुवाद—यदि काले रंग का चर्म धारण करे तो उसे बैठने या सोने के लिए भूमि पर न बिछावे ॥ ४ ॥

रौरवं राजन्यस्य ॥५॥

रुरुर्बिन्दुमान्मृगः ॥ ५ ॥

अनुवाद—क्षत्रिय द्वारा धारण किया जाने वाला चर्म रुरुमृग (धब्बेवाले मृग) का हो ॥ ५ ॥

बस्ताजिनं वैश्यस्य ॥६॥

बस्तश्छागः ॥ ६ ॥

अनुवाद—वैश्य का ऊपर पहनने वाला चर्म बकरे का होवे ॥ ६ ॥

आविकं सार्ववर्णिकम् ॥७॥

अविरूर्णायुः । स एवाऽऽविकः । तस्य चर्माऽऽविकं, तत्सर्वेषामेव वर्णानाम् । अस्य हारिणादिभिर्विकल्पः ॥ ७ ॥

---

१. आप० ग० ११. ११. २. पा० सू० ४. ३. ५९. ३. आप० ध० १.२.२१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अ०—अथवा सभी वर्णों के लिए भेड़ का चर्म हो ॥ ७ ॥

कम्बलश्च ॥८॥

अयमप्याविक एव । प्रावरणमेव सर्वेषाम् ॥ ८ ॥

अनुवाद—ओढ़ने का वस्त्र भी सबके लिए भेड़ के ऊन का बना हो ॥ ८ ॥

'काषायं चैके वस्त्रमुपदिशन्ती' त्यारभ्य वासांस्यजिनानि च विहितानि । तत्र कामवशेन विशेषमाह—

ब्रह्म वृद्धिमिच्छन्नजिनान्येव वसीत, क्षत्रवृद्धिमिच्छन् वस्त्राण्येव, उभयवृद्धिमिच्छन्नुभयमिति हि [१]ब्राह्मणम् ॥९॥

ब्रह्मवृद्धिः ब्राह्मणवृद्धिः क्षत्रियवृद्धिः ॥ ९ ॥

अनुवाद—ब्रह्मशक्ति की वृद्धि चाहने वाला केवल अजिन ही धारण करे । क्षत्रिय की शक्ति की वृद्धि चाहने वाला वस्त्रों को ही धारण करे । दोनों की वृद्धि चाहने वाला चर्म तथा वस्त्र दोनों को धारण करे । ऐसा ब्राह्मण का वचन है ॥९॥

अथ स्वपक्षमाह—

अजिनं त्वेवोत्तरं धारयेत् ॥१०॥

उत्तरमुत्तरीयम् । तदीजिनमेव धारयेत् ॥ १० ॥

अनुवाद—किन्तु उत्तरीय के रूप में केवल चर्म ही धारण करे ॥ १० ॥

[२]अनृत्तदर्शी ॥११॥

नृत्तं न पश्येत् ॥ ११ ॥

अनुवाद—नृत्य न देखे ॥ ११ ॥

सभाः समाजांश्चाऽगन्ता ॥१२॥

धूतादिस्थानं सभा । उत्सवादिषु समवायः समाजः । तान्सभास्समाजांश्च अगन्ता ताच्छील्येन न गच्छेत् । यदृच्छया गमने न दोषः ॥ १२ ॥

अनुवाद—द्यूतादि की सभा में या उत्सव आदि की भीड़-भाड़ में न जावे ॥ १२ ॥

---

१. अत्र गोपथब्राह्मणस्य प्रथमप्रपाठकस्य द्वितीया कण्डिका द्रष्टव्या ।

२. इमे नियमा गोपथब्राह्मणे विहिताः "नोपरिशायी स्यान्न गायनो न नर्तनो न सरणो न निष्ठीवेत् यदुपरिशायी भवत्यभीक्ष्णं निवासा जायन्ते, यद्गायनो भवत्यभीक्ष्णश आक्रन्दान् धावन्ते, यन्नर्तनो भवत्यभीक्ष्णशः प्रेतान्निर्हरन्ते, यत्सरणो भवत्यभीक्ष्णशः प्रजास्संविशन्ते, यन्निष्ठीवति मध्य एव तदात्मनो निष्ठीवति" इति । गो० ब्रा० १. २. ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजनवादशीलः ॥१३॥

जनवादः परिवादः लोकवार्त्ता वा, तच्छीलो न स्यात् ॥ १३ ॥

अनुवाद—परिवाद या लोकवार्ता की आदत न डाले ॥ १३ ॥

रहश्शीलः ॥१४॥

सति सम्भवे रहःशीलः स्यात् ॥ १४ ॥

अनुवाद—गम्भीर तथा एकान्तशील रहे ॥ १४ ॥

गुरोरुदाचारेष्वकर्ता स्वैरिकर्माणि ॥ १५ ॥

येषु प्रदेशेषु गुरुरुदाचरति पौनःपुन्येन चरति तेषु स्वैरिकर्माणि मैत्रप्रसाधनादीनि न कुर्यात् ॥ १५ ॥

अनुवाद—जिन स्थानों पर गुरु प्रायः आते-जाते हों वहां अपने सुख का कोई कार्य न करे ॥ १५ ॥

स्त्रीभिर्यावदर्थसम्भाषी ॥ १६ ॥

स्त्रीभिस्सह[1] यावत्प्रयोजनं तावदेव सम्भाषेत । न प्रसक्तानुप्रसक्तमतिचिरम्[2] 'बलवान्द्रियग्रामो विद्वांसमपि कर्षती'ति । अतिबालाभिरतिवृद्धाभिश्च न दोषः ॥ १६ ॥

अनुवाद—स्त्रियों से उतना ही बातचीत करे जितना प्रयोजन हो ।

टिप्पणी—हरदत्त की व्याख्या के अनुसार अत्यन्त अल्पायु तथा अत्यन्त वृद्धा के साथ वार्तालाप में दोष नहीं है ॥ १६ ॥

मृदुः ॥ १७ ॥

क्षमावान् ॥ १७॥

अनुवाद—क्षमाशील हो ॥ १७ ॥

शान्तः ॥ १८ ॥

इन्द्रियाणामसद्विषये प्रवृत्त्यभावः शमः तद्वान् शान्तः ॥ १८ ॥

अनुवाद—इन्द्रियों को अनुचित विषयों से नियन्त्रित रखे ॥ १८ ॥

दान्तः ॥ १९ ॥

विहितेषु कर्मस्वग्लानिर्दमः । तद्वान् दान्तः ॥ १९ ॥

अनुवाद—अपने कर्तव्यपालन में तत्पर रहे ॥ १९ ॥

ह्रीमान् ॥ २० ॥

ह्रीर्लज्जा तद्वान् ॥ २० ॥

अनुवाद—लज्जाशील हो ॥ २० ॥

---

१. यावत्प्रयोजनमेव. २. मनु. स्मृ. २. २१५.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृढधृतिः ॥ २१ ॥

लब्धे नष्टे मृते वा धृतावेवावस्थितः स्यात् न हृष्येत् न वाविषीदेत् ॥ २१ ॥

अनुवाद—धैर्य या आत्मसंयम से युक्त हो ॥ २१ ॥

अग्लाँस्नुः ॥ २२ ॥

उत्साहसम्पन्नः।[1] "ग्लाजिस्थश्च ग्स्नुः"। अत्रानुस्वारः छान्दसोपपाठो वा॥

अनुवाद—उत्साहसम्पन्न हो ॥ २२ ॥

अक्रोधनः ॥ २३ ॥

न कस्मैचिदपि कुप्येत् ॥ २३ ॥

अनुवाद—किसी पर भी क्रोध न करे ॥ २३ ॥

अनसूयुः ॥ २४ ॥

पराभ्युदयानुसन्तापः असूया। तच्छीलो न स्यात् ॥ २४ ॥

अनुवाद—दूसरे के अभ्युदय पर जलने वाला न होवे ॥ २४ ॥

सर्वं लाभमाहरन् गुरवे सायं प्रातरमत्रेण भिक्षाचर्यं चरेद्भिक्षमाणोऽन्यत्राऽपपात्रेभ्योऽभिशस्ताच्च ॥ २५ ॥

अपपात्राः प्रतिलोमजा रजकादयः। अपगतानि हि तेषां पात्राणि पाकाद्यर्थानि चतुर्भिर्वर्णैस्सह। अभिशस्तान् वक्ष्यति 'अथ पतनीयानी' त्यादिना। तानुभयान् वर्जयित्वा अन्यत्र भिक्षेत। तत्र भिक्षमाणस्सर्वं लाभं यच्च यावच्च लब्धं गोहिरण्यादि तत्सर्वं[2] ममायया गुरवे आहरेत्। एवमहरहः कुर्वन् सायं प्रातरमत्रेण न हस्तादिना भिक्षाचर्यं भिक्षाचरणं चरेत् कुर्यात्। 'सायं प्रात' रिति वचनान्न सायं गृहीतेन प्रातराशः, नापि प्रातर्गृहीतेन सायमाशः ॥२५॥

अनुवाद—सभी प्राप्त वस्तुओं को गुरु के पास लावे, भिक्षापात्र लेकरप्रातः और सायं भिक्षाटन करे, आर्यों के सम्बन्ध के लिए अयोग्य निम्नवर्ण के पुरुषों और अभिशप्तों को छोड़कर कहीं से भिक्षा ग्रहण कर सकता है ॥ २५ ॥

अथ भिक्षाप्रत्याख्यानं निन्दितुं ब्राह्मणमाकृष्यते—

स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून् ब्रह्मवर्चसमन्नाद्यं वृङ्क्ते। तस्मादु ह वै ब्रह्मचारिसङ्घं चरन्तं न प्रत्याचक्षीतापि हैष्वेवंविध एवंव्रतः स्यादिति हि[3] ब्राह्मणम् ॥२६॥

---

१. पा. सू. ३. २. १३९. २. अमाययेति. नास्ति क. पु. सर्वमादाय इति ग. पु.
३. ते देवा अब्रुवन् ब्राह्मणो वा अयं ब्रह्मचर्यं चरिष्यति ब्रूतास्मै भिक्षा इति गृहपतिर्ब्रूते बहुचारी गृहपत्न्या इति किमस्या वृञ्जीताददत्या इति, इष्टापूर्तसुकृतद्रविणमवरु-

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्याख्यातः समाहितः। समाहितो ब्रह्मचारी याभिः स्त्रीभिः भिक्षमाणः प्रत्याख्यायते तासां प्रत्याचक्षाणानां स्त्रीणामिष्टं यागैरर्जितं धर्मं, वृङ्क्ते आच्छिनत्ति. यस्मादेवं तस्मात् ब्रह्मचारिसङ्घ चरन्तं न प्रत्याचक्षीत। उ ह वा इति निपाता वाक्यालङ्कारार्थाः। अपिशब्दौ कदाचिदित्येतमर्थं द्योतयतः। एषु सङ्घीभूतेषु ब्रह्मचारिषु कदाचिदेवंविधः समाहित एवंव्रतः 'अथ ब्रह्मचर्याविधि' रित्यारभ्य यान्युक्तानि तद्वान् ब्रह्मचारी स्यात्।[1] सम्भावने लिङ। सम्भवेत्। तस्मान्न प्रत्याचक्षीतेत्येवं ब्राह्मणं भवतीति ॥ २६ ॥

अनुवाद-एक ब्राह्मण में,कहा गया है: समाहित ब्रह्मचारी भिक्षा न देने वाली स्त्रियों से दान, हवन से उत्पन्न पुण्य को, उनकी प्रजा, पशुओं, उनके कुलों की विद्या को, अन्न को छीन लेता है। अतएव ब्रह्मचारियों के समूह को भिक्षा दिये विना वापस न करे, क्यों कि उनमें उस प्रकार का व्रत पालन करने वाला ब्रह्मचारी भी हो सकता है॥ २६ ॥

नानुमानेन भैक्षमुच्छिष्टं दृष्टश्रुताभ्यां तु॥ २७ ॥

भिक्षाणां समूहो भैक्षम्। न तल्लिङ्गाभासेनोच्छिष्टं मन्तव्यम्। किं तु दृष्टश्रुताभ्यामेव। दृष्टमात्मनः प्रत्यक्षम्। श्रुतमाप्तोपदेशः। ताभ्यामेव तदुच्छिष्टमवगन्तव्यम्। अयमंशः प्राप्तानुवादोऽपूर्वमंशं विधातुम्। यथा[2] 'नानुवषट्करोति, अपि वोपांश्वनुवषट्कुर्यात्' इति ॥ २७ ॥

अनुवाद—भिक्षा को देखकर ही उसे अनुमान से उच्छिष्ट नहीं समझ लेना चाहिए अपितु देख कर आप्त व्यक्ति के उपदेश से ही उसे उच्छिष्ट समझना चाहिए॥ २७ ॥

[3]भवत्पूर्वया ब्राह्मणो भिक्षेत ॥ २८ ॥

ब्राह्मणो ब्रह्मचारी भवत्पूर्वया वाचा भिक्षेत भिक्षां याचेत—'भवति भिक्षां देही'ति ॥ २८ ॥

अनु०—ब्राह्मणब्रह्मचारी भिक्षा माँगते समय 'भवति' का प्रयोग पहले करे ॥२८॥

भवन्मध्यया राजन्यः ॥ २९ ॥

भिक्षां भवति देही'ति राजन्यो भिक्षेत् ॥ २९ ॥

न्ध्यादिति, तस्मात् ब्रह्मचारिणेऽहरहर्भिक्षां गृहिणीमामेयुरिष्टापूर्तसुकृतद्रविणमवरुन्ध्यादिति" इति गोपथब्राह्मणम् (गो० ब्रा० १. २. ६.)

१. सम्भावनायां लिङ्. इति. ख० पु०

२. आप. श्रौ. १३. १४. ९. १०. सोमयागे पात्नीवतग्रहे प्राप्तस्याप्यनुवषट्कारनिषेधस्य उपांश्वनुवषट्कारविधानार्थं नानुवषट्करोतीत्यनुवादः।

३. इतः सूत्रत्रयमेकिकृतं ग० पुस्तके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुवाद—क्षत्रिय मध्य में 'भवति' शब्द का प्रयोग करे ॥ २९ ॥

भवदन्त्यया वैश्यः ॥ ३० ॥

'भिक्षां देही भवती'ति ॥ ३० ॥

अनुवाद—वैश्य अन्त में 'भवति' संबोधन का प्रयोग करे ॥ ३० ॥

सर्वं लाभमाहरन् गुरव, इत्युक्तम्। अथाऽऽहृतं किं कर्तव्यमित्यत आह—

तत्समाहृत्योपनिधायाऽचार्याय प्रब्रूयात् ३१ ॥

तत् भैक्षं समाहृत्य समीपे निधायाचार्याय प्रब्रूयात्—इदमित्थमाहृतमिति३१

अनुवाद—भिक्षा लाकर गुरु के समीप रखकर उनसे निवेदन करे ।.३१॥

तेन प्रदिष्टं भुञ्जीत ॥ ३२ ॥

तेन ह्याचार्येण प्रदिष्टं सौम्य त्वमेव भुङ्क्ष्वेत्युक्तं भुञ्जीत ॥ ३२ ॥

अनुवाद— उनके द्वारा आदेश पाने पर भोजन करे ॥ ३२ ॥

विप्रवासे गुरोराचार्यकुलाय ॥ ३३ ॥

यदि गुरुर्विप्रोषितोऽसन्निहितः स्यात् तत् आचार्यकुलायाऽऽचार्यस्य यत्कुलं भार्यापुत्रादि तस्मै ब्रूयात्। तेन प्रदिष्टं भुञ्जीत ॥ ३३ ॥

अनुवाद—यदि गुरु कहीं बाहर गये हों तो उनके कुल के सदस्य (पत्नी या पुत्र) को प्राप्त भिक्षा अर्पित करे ॥ ३३ ॥

तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः ॥ ३४ ॥

तैस्स्वकुल्यैस्सह गुरोः विप्रवासे अन्येभ्योऽपि "[1]श्रोत्रियेभ्यः प्रब्रूयात्। तैः प्रदिष्टं भुञ्जीतेति विपरिणामेनान्वयः। गौतमोऽप्याह[2] "असन्निधौ तद्भार्यापुत्रसब्रह्मचारिभ्यः' इति ॥ ३४ ॥

अनुवाद—यदि गुरु अपने परिवार के सदस्योंके साथ अन्यत्र गये हों तो दूसरे श्रोत्रियों को अर्पित करे ॥ ३४ ॥

नाऽऽत्मप्रयोजनश्चरेत् ॥३५॥

आत्मा प्रयोजनं प्रयोजकः यस्य स आत्मप्रयोजनः। एवंभूतो भिक्षां न चरेत् आत्मार्थं न चरेदित्यर्थः। अस्य प्रयोजनं यदा श्रोत्रिया अपि न लभ्यन्ते तदा[3] 'प्रोषितो भैक्षादग्नौ कृत्वा भुञ्जीते'ति वक्ष्यामाणमप्रोषितेऽपि यथा स्यादिति ॥ ३५ ॥

अनुवाद—केवल अपने लिए भिक्षाचरण न करे।

---

१. श्रोत्रियपदार्थः आप. ध. २. ४. ६. सूत्रेद्रष्टव्यः। २. गौ० ध० २. ४०.

३. आप० ध० १. ३. ४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी—व्याख्याकार ने स्पष्ट किया है कि यदि श्रोत्रिय भी उपलब्ध न हो तो अग्नि में भिक्षा का अंश अर्पित करके भोजन करे ॥३५॥

भुक्त्वा स्वयममत्रं प्रक्षालयीत ॥ ३६ ॥

अमत्रं भोजनपात्रम्, भुक्त्वेति सन्निधानात्। तत्स्वयमेव प्रक्षालयीत प्रक्षालयेत्। भिक्षापात्रस्य त्वन्येन प्रक्षालने न दोषः। उभयोरपि पात्रयोर्ग्रहणमित्यन्ये ॥ ३६ ॥

अनुवाद—भोजन करने के बाद स्वयं ही भोजनपात्र को साफ करे ॥३६॥

न चोच्छिष्टं कुर्यात् ॥ ३७ ॥

यावच्छक्नोति भोक्तुं तावदेव भोजनपात्रे कृत्वा भुञ्जीत ॥ ३७ ॥

अ०—उच्छिष्ट न छोड़े। जितना भोजन कर सके उतना ही ग्रहण करे ॥३७॥

अशक्तौ भूमौ निखनेत् ॥ ३८ ॥

भोजने प्रवृत्तो यदि तावद्भोक्तुं न शक्नुयात् तदा तदन्नं भूमौ निखनेत् ॥ ३८ ॥

अनुवाद—यदि अपने भोजनपात्र में लिये गये सम्पूर्ण भोजन को न खा सके तो बचे हुए अंश को भूमि में गाड़ दे ॥३८॥

अप्सु वा प्रवेशयेत् ॥ ३९ ॥

अप्सु प्रक्षिपेत् ॥ ३९ ॥

अनुवाद—अथवा उसे जल में फेंक दे ॥३९॥

आर्याय वा पर्यवदध्यात् ॥ ४० ॥

आर्यस्त्रैवर्णिकः तस्मै अनुपनीताय पर्यवदध्यात् सर्वमेकस्मिन्पात्रेऽवधाय तत्समीपे भूमौ स्थापयेत् ॥ ४० ॥

अनुवाद—अथवा उसे एक एक पात्र में रखकर तीन वर्णों के किसी व्यक्ति के पास, जिसका उपनयन न हुआ हो, रख दे ॥४०॥

अन्तर्धिने वा शूद्राय ॥ ४१ ॥

अन्तर्धानमन्तर्धिः सोऽस्यास्तीति व्रीह्यादित्वादिनिः। अन्तर्धी दासः। अन्तर्हितं हि तस्य शूद्रत्वम्, आशौचेषु स्वामितुल्यत्वात्। प्रकरणादाचार्यस्येति गम्यते। आचार्यदासाय वा शूद्राय पर्यवदध्यात् ॥ ४१ ॥

अनुवाद—अथवा आचार्य के दास शूद्र के समीप रख दे ॥४१॥

प्रोषितो भैक्ष्यादग्नौ कृत्वा भुञ्जीत ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि शिष्य आचार्यार्थमात्मार्थं वा प्रोषितः स्यात् तदा भैक्षात् किञ्चिदादायाग्नौ कृत्वा प्रक्षिप्य शेषं भुञ्जीत श्रोत्रियाणां सद्भावे असद्भावे च। 'अन्येभ्योऽपि श्रोत्रियेभ्य'[1] इत्येतन्न भवति। यदि स्यात्तत्रैवायं ब्रूया 'त्तदभावेऽग्नौ कृत्वा भुञ्जीतेऽति। यद्यपि तत्राचार्यस्य प्रवासः प्रकृतः तथापि न्यायसाम्याच्छिष्यस्यापि विप्रवासे भविष्यति ॥ ४२ ॥

अनुवाद—यदि शिष्य अपने कार्य से या गुरु के कार्य से यात्रा पर हो तो भिक्षा में प्राप्त अन्न का अंश अग्नि हवन करके भोजन करे।

टिप्पणी—यह नियम उस समय भी लागू होता है जब श्रोत्रिय भी न मिले। अग्नि ब्राह्मण वर्ण का देवता है अतः वह गुरु का स्थान ग्रहण करता है ॥४२॥

अथ ब्रह्मचारिणो यज्ञं विधातुं हविरादीनि सम्पादयति—

भैक्षं हविषा संस्तुतं तत्राऽऽचार्यो देवतार्थे ॥ ४३ ॥

भैक्षं हविष्येन संस्तुतं कीर्तितम्। तत्र तस्मिन् हविषि आचार्यो देवतार्थे देवताकार्ये तत्प्रीत्यर्थत्वात्तस्य ॥ ४३ ॥

अनुवाद—भिक्षा को यज्ञीय अन्न कहा गया है और उसके लिए गुरु देवता है ॥४३॥

आहवनीयार्थे च ॥ ४४ ॥

तस्य जाठराग्नौ हूयमानत्वात् ॥ ४४ ॥

अनुवाद—आचार्य आहवनीय अग्नि का स्थान ग्रहण करता है। (मानो उसकी जठराग्नि में हवन ही किया जाता है) ॥४४॥

तं भोजयित्वा ॥ ४५ ॥

इति प्रथमप्रश्ने तृतीया कण्डिका।

अनुवाद—उसे भिक्षा का एक अंश खिलाकर ॥४५॥

—:०.—

यदुच्छिष्टं प्राश्नाति ॥ १ ॥

अनुवादेषु सर्वत्र विधिः कल्प्यते। तं भोजयेत्। भोजयित्वा तस्योच्छिष्टं प्राश्नीयात् प्राश्नाति। चकारोऽपाठश्छन्दसो वा, 'शादि'ति चुत्वप्रतिषेधात् ॥ ४५ ॥ १ ॥

अनुवाद—(गुरु को खिलाने के बाद) जो उच्छिष्ट बचे उसका भोजन करे ॥१॥

हविरुच्छिष्टमेव तत् ॥ २ ॥

इडाभक्षणादिस्थानीयमित्यर्थः ॥ २ ॥

१. इत्येतत्त्वत्र न भवति. इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुवाद—यह उच्छिष्ट यज्ञीय हवि का उच्छिष्ट ही होता है ॥२॥

यदन्यानि द्रव्याणि यथालाभमुपहरति दक्षिणा एव ताः ॥ ३ ॥

यदन्यानि द्रव्याणि गवादीनि भिक्षाचरणे लब्धानि समिदादीनि च स्वयमाहृतानि यथालाभमुपहरति दक्षिणा एव ताः। दक्षिणासामानाधिकरण्यात्ता इत्युक्तम् ॥ ३ ॥

अनुवाद—भोजन के अतिरिक्त अन्य प्रकार की वस्तुएँ जिस रूप में उपलब्ध हुई हों वे सभी गुरु के लिए दक्षिणा होती हैं।

टिप्पणी—वे अन्य वस्तुएँ, यथा गौ, रथ, ईंधन आदि गुरु के लिए यज्ञोपरान्त दी जाने वाली दक्षिणा का स्थान ग्रहण करती हैं ॥३॥

स एष ब्रह्मचारिणो यज्ञो नित्यप्रततः ॥ ४ ॥

स एष एवंभूतो यज्ञः ब्रह्मचारिणो नित्यं प्रतायते। एवं कुर्वता ब्रह्मचारिणा यज्ञ एव नित्यं क्रियत इत्यर्थः ॥ ४ ॥

अनुवाद—यह ब्रह्मचारी द्वारा नित्य किया जाने वाला यज्ञ है ॥४॥

न चास्मै श्रुतिविप्रतिषिद्धमुच्छिष्टं दद्यात् ॥ ५ ॥

अस्मै शिष्याय आचार्यः श्रुतिविप्रतिषिद्धं शास्त्रविप्रतिषिद्धमुच्छिष्टं न दद्यात् ॥ ५ ॥

अनुवाद—आचार्य शिष्य को ऐसी कोई भी वस्तु न दे जो शास्त्र द्वारा ब्रह्मचारी के लिए निषिद्ध हो,इस प्रकार की वस्तु उच्छिष्ट हो तब उसे न देवे ॥५॥

किं पुनस्तत्—

यथा क्षारलवणमधुमांसानीति ॥ ६ ॥

यथेतिवचना'च्छ्रुतिविप्रतिप्रतिषिद्ध' मिति लक्षणतः प्रतिषेधाच्च क्षारादिग्रहणमेवं विधस्योपलक्षणम् ॥ ६ ॥

अनुवाद—जैसे चटपटे, नमकीन खाद्य पदार्थ, मधु, मांस आदि (इन्हें उच्छिष्ट) होने पर भी गुरु ब्रह्मचारी को न दे ॥६॥

एतेनान्ये नियमा व्याख्याताः ॥ ७ ॥

अभ्यङ्गशेषो गन्धशेषो माल्यशेष इत्यादयो ब्रह्मचारिणः प्रतिषिद्धा आचार्येण न देया इत्युक्तं भवति ॥ ७ ॥

अनुवाद—इससे दूसरे नियमों की (सुगन्धित लेप, माला आदि को न देने के नियमों की) भी व्याख्या हो गई ॥७॥

केचित्तु श्रुतिविप्रतिषिद्धमाचार्यशेषमुपयुञ्जाना दृष्यन्ते पूर्वः पूर्व आचारः प्रमाणमिति वदन्तः। तान्निराकरोति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रुतिर्हि बलीयस्यानुमानिकादाचारात् ॥ ८ ॥

अनुमानाय प्रभवतीत्यानुमानिकः। आचाराद्धि श्रुतिः स्मृतिर्वाऽनुमीयते। तस्मादानुमानिकादाचारात्प्रत्यक्षश्रुतिर्बलीयसी। तद्विरोधे तु नानुमातुं शक्यते,[1] 'अनुमानमबाधितम्' इति न्यायात्। एवं च ब्रुवता ब्रह्मचरिणः क्षारलवणादिप्रतिषेधः प्रत्यक्षब्राह्मणमूल इति दर्शितं भवति। यद्यपि क्षारादिप्रतिषेधश्रुतेरुच्छिष्टव्यतिरिक्तो विषयः सम्भवति तथापि सङ्कोचोऽपि तस्या अविशेषप्रवृत्ताया आनुमानिकादाचारादयुक्तः ॥ ८ ॥

अ०--श्रुति का नियम प्रचलित आचार की अपेक्षा अधिक प्रामाणिक होता है, जिस आचार से श्रुति के किसी अंश का अनुमान किया गया है।

टिप्पणी—आनुमानिक का अर्थ है, अनुमानाय प्रभवति इति आनुमानिकः। श्रुति या स्मृति के किसी अंश के अस्तित्व का अनुमान आचार से ही किया जाता है। किसी ऐसे श्रुति या स्मृति का अनुमान नहीं किया जा सकता जो आचार के विपरीत है क्योंकि उस स्थिति में अनुमान प्रत्यक्ष का ही विरोधी हो जायगा। आपस्तम्ब का प्रयोजन यही है कि क्षारलवण आदि के प्रतिषेध का नियम ब्राह्मण ग्रन्थ में है ॥८॥

ननु परस्परविरुद्धा अपि श्रुतय उपलभ्यन्ते[2] 'गृह्णाति, न गृह्णाती'ति। तत्किमाचारात् सङ्कोचिका श्रुतिर्नानुमीयते ? अत आह—

दृश्यते चापि प्रवृत्तिकारणम् ॥ ९ ॥

स्यादेव यद्ययमाचारोऽगृह्यमाणकारणः स्यात्। गृह्यते तु तत्र कारणम् ॥९॥

अनुवाद—इस नियम के विषय में, इस प्रकार की प्रवृत्ति कारण दिखाई पड़ती है।

टिप्पणी—यद्यपि जिस नियम के अन्तर्गत क्षारलवणमधुमांस का वर्जन किया गया है वह उन्हीं का निर्देश करता है जो उच्छिष्ट नहीं हैं, तथापि आचार के आधार पर यह कहना गलत होगा कि इस नियम को उच्छिष्ट के क्षारलवणादि के विषय में नहीं समझना चाहिए। इस प्रकार के श्रुति का अनुमान आचार के विपरीत होगा। उपर्युक्त कथन भी तभी ठीक होता जब निषेध करने का कोई कारण नहीं होता। किन्तु निषेध के लिए कारण है और वह है प्रवृत्ति ॥९॥

---

१. अनुमानबाधित इति न्यायात्, इति. क० पु०

२ अतिरात्रे षोडशिनं गृह्णाति इति श्रुतिभ्यामेकस्मिन्नेवातिरात्रसंस्थाके ज्योतिष्टोमे षोडशिसंज्ञस्य ग्रहणस्य ग्रहणाग्रहणयोः परस्परविरुद्धयोर्विधानात् तयोरपि श्रुत्योः परस्परं विरोधादिति भावः। उलूखलाकार उपर्यासेचनवान् पात्रविशेषो ग्रहः। खदिरवृक्षनिर्मितो ग्रहविशेषष्षोडशी। तस्य सोमरसेन पूरणं ग्रहणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किं तत् ?

प्रीतिर्ह्युपलभ्यते ॥ १० ॥

क्षारादिभोजने भुञ्जानस्य प्रीतिर्भवति। ततश्च यत्र प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति। तदनुवर्तमाना नरकाय राध्यतीति न्यायान्न संकोचिका श्रुतिरनुमीयते इति ॥ १० ॥

अनुवाद—क्योंकि उपर्युक्त निषिद्ध वस्तुओं के भोजन से सुख का अनुभव होता है।

टिप्पणी—इस सूत्र में पिंछले सूत्र में उल्लिखित निषेध का कारण प्रदर्शित किया गया है। और जिस आचार से सुख या प्रीति का प्रयोजन सिद्ध होता हो उसे प्रामाणिकता प्रदान करने वाली कोई श्रुति नहीं है ॥१०॥

पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम् ॥ ११ ॥

[1]स्पष्टम् ॥ ११ ॥

अनुवाद—पिता और बड़े भाई द्वारा छोड़े गये उच्छिष्ट भोजन को ग्रहण किया जा सकता है ॥११॥

धर्मविप्रतिपत्तावभोज्यम् ॥ १२ ॥

यदि तयोर्धर्माद्विप्रतिपत्तिरपायो भवति ततो न भोज्यम्। यद्वा भुञ्जानस्य ब्रह्मचारिणो धर्मविप्रतिषेधो भवति मधुमांसादिमिश्रत्वेन ततो न भोज्यमिति ॥१२॥

अनुवाद—यदि उनका आचरण धर्म के विपरीत हो तो उनका उच्छिष्ट भोजन अभोज्य होता है ॥१२॥

टिप्पणी—इसकी ऐसी भी व्याख्या हो सकती है कि यदि उस उच्छिष्ट भोजन से धर्म की हानि होती हो तो उसे न खाए ॥१२॥

सायं प्रातरुदकुम्भमाहरेत् ॥ १३ ॥

आचार्यस्य स्नानपानार्थम् ॥ १३ ॥

अनुवाद—सायंकाल और प्रातःकाल अपने गुरु के लिये घड़े में जल ले आवे ॥१३॥

(२) सदाऽरण्यादेधानाहृत्याऽधो निदध्यात् ॥ १४ ॥

सदा प्रत्यहमरण्यात् न पित्रादिगृहात् एधान् काष्ठानि आचार्यगृहे पाकाद्यर्थमाहरेत् आहृत्य चाऽधो निदध्यात् अधोनिधानमाचार्यपुत्रादिषु बालेषु

---

१. स्पष्टोऽर्थः इति० ग० पु०

२. "तस्मात् ब्रह्मचार्यहरहस्समिध आहृत्य सायं प्रातरग्निं परिचरेत्, नोपर्युपसादयेत् अधः प्रतिष्ठापयेत्" (गोप. १. २. ६.) इति गोपथब्राह्मणम् ॥

३ आ० ध०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पतनशङ्कया । अपर आह—आत्मनस्समिदाधानार्थ[1] मेधोहरणमिति । उक्तं गृह्ये—[2]'एवमन्यस्मिन्नपि सदाऽरण्यादेधानाहृत्य । इति । तदनुवादेनाधोनिधानं विधीयते दृष्टार्थमदृष्टादृष्टार्थं वेति ॥ १४ ॥

अनुवाद—प्रतिदिन वन से ईंधन लाकर आचार्य के घर में नीचे रखे ।

टिप्पणी—नीचे रखने का कारण यह हो सकता है कि कहीं आचार्य के यहाँ छोटे बच्चों के ऊपर न गिर जाय । कुछ आचार्यों का मत है कि शिष्य द्वारा लाया गया इंधन गुरु अपने काम में न लावे, अपितु शिष्य के दैनिक अग्निकर्म के लिए ही उसका प्रयोग हो । गृह्यसूत्र में दैनिक अग्निकर्म का विधान किया गया है ॥ १४॥

नास्तमिते समिद्धारो गच्छेत् ॥ १५ ॥

अस्तमित आदित्ये समिध आहर्तुं न गच्छेत्; चोरव्याघ्रादिसम्भवात् । 'समिद्धार इति[3] 'अण् कर्मणि चे' ति तुमर्थेऽण्प्रत्ययः ॥ १५ ॥

अनुवाद—सूर्य के अस्त हो जाने पर समिध् लाने के लिए न जावे ॥१५॥

अग्निमिध्वा परिसमूह्य समिध आदध्यात्सायंप्रातर्यथोपदेशम् ॥१६॥

परिसमूहनं परितो मार्जनम् । विप्रकीर्णस्याग्ने[4]रेकीकरणमित्यन्ये । यथोपदेशं यथा गृह्य उक्तं तथा समिध आदध्यात् । गृह्ये विहितमपि समिदाधानं विधीयते सर्वाचरणार्थम् । सायं प्रातरित्यादिकान् विशेषान् वक्ष्यामीति च ॥ १६ ॥

अनुवाद—अग्नि जलाकर, उसके चारो ओर की भूमि साफ करके, गृह्यसूत्र में उक्त विधि से सायं-प्रातः समिधों का आधान करे ॥ १६ ॥

सायमेवाऽग्निपूजेत्येके ॥ १७ ॥

एके आचार्यास्सायमेवाग्निपूजा कार्या, न प्रातरिति मन्यन्ते ॥ १७ ॥

अनुवाद—कुछ आचार्यों का मत है कि अग्नि की पूजा केवल सायंकाल करनी चाहिए ॥१७॥

समिद्धमग्निं पाणिना परिसमूहेन्न समूहन्या ॥ १८ ॥

सासिदाधाने समिद्धमग्निं पाणिनैव परिसमूहेत्, न समूहन्या । समूहनी सम्मार्जनी दर्भनिर्मिता वेदाकृतिः, आचारात् ॥ १८ ॥

अनुवाद—अग्नि को जलाकार, जलती अग्नि के चारों ओर भूमि हाथ से साफ करे, समूहनी (दर्भ की मार्जनी) से न साफ करे ॥ १८ ॥

प्राक्तु याथाकामी १९ ॥

---

१. इध्माहरणं इति क० ख० पु० २. आप० गृ० ११. २२.

३. पा० सू० ३. ३. १२. ४. राशीकरणमित्यन्ये इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्समिदाधानात् परिसमूहने याथाकामी भवति। यथाकामस्य भावो याथाकामी। ष्यञ्, षित्वादीकारः॥ १९॥

अनुवाद—किन्तु अग्नि में समिध् रखने के पहले वह इच्छानुसार समूहनी का का भी प्रयोग कर सकता है॥ १९॥

नाऽग्न्युदकशेषेण वृथाकर्माणि कुर्वीताऽऽचामेद्वा॥ २०॥

अग्निपरिचर्यायां परिसमूहने परिषेचने च यदुपयुक्तमुदकं तच्छेषेण वृथाकर्माणि अदृष्टप्रयोजनरहितानि पादप्रक्षालनादीनि न कुर्वीत। नाऽप्याचामेत्। अवृथाकर्मत्वादस्य पुनःप्रतिषेधः॥ २०॥

अनुवाद—अग्निपरिचर्या में समूहन आदि से बचे हुए जल का प्रयोग वृथाकर्म (अदृष्टप्रयोजनरहित) में न करें और न ही उससे आचमन करे।

टिप्पणी—वृथाकर्म वे कर्म हैं जिनसे कोई धर्म उत्पन्न नहीं होता। समिदाहरण, कुशाहरण, यज्ञ के लिए पुष्पचयन आदि धर्मकर्म हैं। जल का वृथा प्रयोग तथा पादप्रक्षालन आदि॥ २०॥

पाणिसंक्षुब्धेनोदकेनैकपाण्यावर्जितेन च नाऽऽचामेत्॥ २१॥

पाणिसंक्षुब्धं [1]पाणिना संक्षोभितं तेनोदकेन नाऽऽचामेत्। इदं तटाकादिषु स्वयमाचमने। यदा पर आचामयति, तदैकेन पाणिना यदावर्जितं तेन नाऽऽचामेत्। किं तु उभाभ्यां हस्ताभ्यां करकादि गृहीत्वा यदावर्जितमुदकं, तेनैवाऽऽचामेत्। एवं च स्वयं वामहस्तावर्जितेनापि नाचामेत्। (अलाबुपात्रेण नालिकेरजेन वैणवेन चर्ममयेन ताम्रमयेन वा पात्रेण स्वयमाचमनमाचरन्ति शिष्टाः)॥ २१॥

अनुवाद—जिस जल में हाथ डाला गया हो अथवा जिस जल को एक हाथ से लाया गया हो उस जल से आचमन न करे।

टिप्पणी—दोनों हाथों से लाये गये जल से ही आचमन करे। स्वयं भी बाएँ हाथ से लाये गये जल से आचमन न करे॥ २१॥

स्वप्नं च वर्जयेत्॥ २२॥

पूर्व 'मदिवास्वापी' (१. २. २८) त्यनेन [2]दिवास्वापः प्रतिषिद्धः। अनेन रात्रावपि यावदाचार्यो न स्वपिति, तावन्तं कालं स्वापः प्रतिषिध्यते। स्वप्नकथनं वर्जयेदित्येके॥ २२॥

अनुवाद—सोने का वर्जन करे।

---

१. कुम्भादिगतमित्यधिकं घ०पु० ( ) एतच्चिन्हान्तर्गतो भागः ख० पुस्तके नास्ति
२. दिवास्वापप्रतिषेधः इति. क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी—यद्यपि पहले यह नियम कहा जा चुका है कि दिन में न सोवे। इस सूत्र से यह विवक्षित है कि रात्रि को भी जब तक गुरु जगे हुए हों तब तक न सोवे ॥ २२ ॥

अथाऽहरहराचार्यं गोपायेद्धर्मार्थयुक्तैः कर्मभिः ॥ २३ ॥

अथ स्वप्नस्य प्रकृतत्वात् स्वप्नान्तरं ब्राह्मे मुहूर्त उत्थायेत्यर्थः। अहरहः नित्यमाचार्यं गोपायेत् रक्षेत्। किं दण्डादि गृहीत्वा ? नेत्याह—धर्मार्थयुक्तैः कर्मभिः। धर्मयुक्तानि कर्माणि समित्कुशपुष्पाहरणादीनि, अर्थयुक्तानि [1]युग्यघासाहरणादीनि ॥ २३ ॥

जगने के बाद प्रतिदिन धर्मार्थ कर्मों से गुरु की रक्षा करे अर्थात् सहायता करे।

टिप्पणी—धर्मार्थ कर्म से तात्पर्य है समित्कुशपुष्पहरणादि ॥ २३ ॥

(२) स गुप्त्वा संविशन् ब्रूया 'द्धर्मगोपायमाजूगुपमह, मिति ॥२४॥

स[2] ब्रह्मचारी धर्मार्थयुक्तैः कर्मभिर्यावदुत्थानात् यावदस्य संवेशनात् एवमाचार्यं गुप्त्वा संविशन् शयनं भजन् [4]'धर्मगोपायमाजूगुपमह' मितीमं मन्त्रं ब्रूयात्। धर्मं गोपायतीति धर्मगोपायः आचार्यः तमहमाजूगुपमाभिमुख्येन रक्षितवानस्मि, इदानीं तु संविशामीति मन्त्रार्थः।

अपर आह—हे धर्म मा मां गोपाय रक्ष यस्मादहं आजूगुपमहमाचार्यमेतावन्तं कालमिति ॥ २४ ॥

अनुवाद—इस प्रकार गुरु की सहायता करने के बाद शयन करने के लिए जाते समय धर्मगोपायमाजूगुपमहम्, मन्त्र कहे।

टिप्पणी—धर्मगोपाय-धर्म की रक्षा करने वाला, गुरु। इसकी दूसरी व्याख्या इस प्रकार की जाती है, हे धर्म, मेरी रक्षा करो, मैंने गुरु की रक्षा की है ॥२४॥

प्रमादादाचार्यस्य बुद्धिपूर्वं वा नियमातिक्रमं रहसि बोधयेत् ॥२५॥

प्रमादोऽनवधानम्। प्रमादात् बुद्धिपूर्वं य अचार्यस्य वा नियमातिक्रमस्तं रहसि बोधयेत्। इत्थमयं नियमः पूज्यपादै रतिक्रम्यते इति ॥ २५ ॥

अनुवाद—यदि गुरु जानबूझ कर अथवा प्रमाद से नियम का उल्लंघन करे तो उसके विषय में एकान्त में ध्यान दिलावे ॥ २५ ॥

अनिवृत्तौ स्वयं कर्माण्यारभेत ॥ २६ ॥

---

१. एधसां हरणादीनि इति घ० पु०

२. "स यदहरहराचार्यकुलेऽनुष्ठते सोऽनुष्ठाय ब्रूयात्-धर्मगुप्तो मा गोपायेति धर्मो हैनं गुप्तो गोपायेति" इति गोपथब्राह्मणम् (गो. ब्रा १. २. ४.)

३. न्याय्यादुत्थानान्न्याय्याच्च संवेशनात्. इति क० ख० पु० अन्यायात्" दन्याय्याच्च" इति. ङ० पु०

४. यावदुपात्त एवायं मन्त्रः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि बोधितोऽप्याचार्यस्ततो न निवर्तते, ततः स्वयमेव तस्य कर्तव्यानि ब्रह्मयज्ञादीनि कर्माण्यारभते कुर्यात् ॥ २६ ॥

अनुवाद—यदि गुरु नियम के अतिक्रमण से ध्यान दिलाये जाने पर भी विरत नहीं होता, तो ब्रह्मचारी स्वयं ही उन कर्मों को करे जो गुरु के कर्तव्य होते हैं ॥२६॥

निवर्तयेद्वा ॥ २७

प्रसह्य वा स्वयं निवर्तयेत्। पित्रादिभिर्वा निवर्तयेत् ॥ २७ ॥

अनुवाद—अथवा निवर्तन करे।

टिप्पणी—इसका यह भी अर्थ लगाया गया है कि वह अपने गृह को चला जाय ॥ २७ ॥

अथ यः पूर्वोत्थायी जघन्यसंवेशी तमाहुर्न स्वपितीति ॥ २८ ॥

यः पूर्वमाचार्यादुत्तिष्ठति प्रतिबुध्यते। जघन्यशब्दः पश्चादर्थे। जघन्यश्च संविशति, तं ब्रह्मचारिणं न स्वपितीति धर्मज्ञा आहुः। प्रयोजनमुपनयने 'मा सुषुप्था' इति संशासनस्यायमर्थः' न स्वापस्यात्यन्ताभाव इति। अथशब्दश्च वाक्योपक्रमे ॥ २८ ॥

अनुवाद—जो आचार्य से पहले उठता है और आचार्य के सोने के बाद सोता है उस ब्रह्मचारी के विषय में धर्मज्ञ कहते हैं कि वह सोता नहीं है ॥ २८ ॥

स य एवं प्रणिहितात्मा ब्रह्मचार्यत्रैवास्य सर्वाणि कर्माणि फलवन्त्यवाप्तानि भवन्ति यान्यपि गृहमेधे ॥ २९ ॥

'आचार्याधीनः स्या' दित्यारभ्य यस्य नियमा उक्ताः, स ब्रह्मचारी, एवमुक्तेन प्रकारेण, प्रणिहितात्मा प्रकर्षेण निहित आचार्यकुले स्थापित आत्मा येन स तथोक्तः। प्रकर्षश्च[1] आत्मनस्तत्रैव शरीरन्यासः। वक्ष्यति [2]आचार्यकुले शरीरन्यासः" इति। अस्यैवंविधस्य ब्रह्मचारिणः अत्रैव ब्रह्मचर्याश्रमे सर्वाणि फलवन्ति ज्योतिष्टोमादीनि कर्माण्यवाप्तानि भवन्ति। तत्फलावाप्तिरेव तदवाप्तिः। यान्यपि कर्माणि गृहमेधे गृह्यशास्त्रे विवाहाद्यष्टकान्तानि, तान्यवाप्तानि भवन्ति। तदेवं नैष्ठिकब्रह्मचारिविषयमिदं सूत्रम् ॥ २९ ॥

अनुवाद—जो ब्रह्मचारी इस प्रकार से अपने मन को आचार्य के कुल में ही लगाता है' वह (ब्रह्मचर्याश्रम में ही) उन सभी पुण्यफलवाले कर्मों को कर लेता है जो गृहस्थ श्रम में किये जाते हैं। ॥ २९।

इत्यापस्तम्बीये धर्मसूत्रे चतुर्थी कण्डिका ॥ ४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ[3] हरदत्तविरचितायामुज्ज्वलायां
प्रथमप्रश्न प्रथमः पटलः ॥ १ ॥

---

१. आन्तात्तत्रैव शरीरन्यासः इति ख० पु० अन्ततस्तत्रैव, इति, घ० पु०
२. आप० ध० २. २१. ६. ३. हरदत्तमिश्रविरचितायां इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ द्वितीयः पटलः ।

—:०:—

नियमेषु तपश्शब्दः ॥ १ ॥

'आचार्याधीनः स्या' दित्यादयो ये नियमाः अस्मिन्ब्रह्मचारिप्रकरणे निर्दिष्टाः' तपश्शब्दस्तेषु द्रष्टव्यः, न कृच्छ्रादिषु ॥ १ ॥

अनुवाद—इस प्रकरण में 'तप' शब्द का प्रयोग ब्रह्मचारी के नियमों के लिए किया गया है ॥ १ ॥

तदतिक्रमे विद्याकर्म निःस्रवति ब्रह्म सहापत्यादेतस्मात् ॥ २ ॥

तेषां नियमानामतिक्रमे विद्याकर्म विद्याग्रहणं ब्रह्म निःस्रवति गृहीतं वेदं निस्सारयति । कुतः, ? एतस्मात् नियमातिक्रमेणाध्येतुः पुरुषात् । न केवलमेतस्मात् । किं तर्हि ? सहापत्यात् । अपत्येन सह वर्तत इति सहापत्यः [1]"वोपसर्जनस्ये' ति सभावाभावे रूपम् । अपत्यादपि ब्रह्म निःसारयति । यद्यप्यपत्यं नियमातिक्रमकारि न भवति, तथापि पितृदोषादेव ततो ऽपि ब्रह्म निस्सारयति । नियमातिक्रमेण विद्याग्रहणं कुर्वतः पुरुषात् सहापत्यात् गृहीतं ब्रह्म निस्सरति, ब्रह्मयज्ञादिषूपयुज्यमानमप्यकिञ्चित्करं भवतीत्यर्थो विवक्षितः । स्रवतेश्च सकर्मकस्य प्रयोगो भाष्ये दृष्टः 'स्रवत्युदकं कुण्डिकेति ।

अपर आह—[2] तदतिक्रमे नियमातिक्रमे विद्याग्रहणं न कर्तव्यम् । कुतः ? यतो निस्स्रवति ब्रह्म निस्सरतीत्यर्थः' शेषं समानमिति । विद्याकर्म निस्स्रवति ब्रह्म च निस्स्रवतीत्यन्ये । अन्ये च—कुर्वत इत्यध्याहार्यम् । तदतिक्रमेण विद्याकर्म कुर्वतो ब्रह्म निस्स्रवतीति ॥ २ ॥

अनुवाद—इन नियमों का उल्लंघन करने पर विद्याध्ययन उससे और उसके पुत्रों से भी पूर्वप्राप्त वेद का ज्ञान दूर कर देता है ।

टिप्पणी—तात्पर्य यह है कि जो ब्रह्मचारी ब्रह्मचर्य के नियमों का उल्लंघन करके वेद का अध्ययन करता है उसके द्वारा ब्रह्मयज्ञ में तथा अन्य धर्मकृत्यों में उच्चारित वेदमन्त्रों का कोई पुण्यफल नहीं होता । नियम का उल्लंघन होने पर विद्याध्ययन करना चाहिए या नहीं, इस विषय में भिन्न मत हैं ॥ २ ॥

न केवलमकिञ्चित्करं नियमातिक्रमेण विद्याग्रहणम् , प्रत्युताऽनर्थकारीत्याह—

---

१. पा.सू. ६.३.८२ बहुव्रीह्यवयवस्य सहशब्दस्य सभावस्स्याद्विकल्पेन इति सूत्रार्थः ।

२. तदतिक्रमे विद्याकर्म निस्स्रवतीति नियमातिक्रमेण विद्याग्रहणं न कर्तव्यम्, कुतः ? यतो निस्स्रवति ब्रह्म निस्सारयतीत्यर्थः, इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तपत्यमनायुष्यं च ॥ ३ ॥

कर्तशब्देन श्वभ्राभिधायिना नरको लक्ष्यते। पतत्यनेनेति पत्यम्। एवंभूतं विद्याग्रहणं नरकपातहेतुर्भवति। अनायुष्यं च अनायुष्करं च ॥ ३ ॥

अनुवाद—इसके अतिरिक्त वह नरक प्राप्त करता है और उसकी आयु कम होती है ॥ ३ ॥

तस्मादृषयोऽवरेषु न जायन्ते नियमातिक्रमात् ॥ ४ ॥

अत एवावरेषु अर्वाचीनेषु कलियुगवर्तिषु ऋषयो न जायन्ते मन्त्रदृशो न भवन्ति। नियमातिक्रमस्येदानीमवर्जनीयत्वात् ॥ ४ ॥

अनुवाद—ब्रह्मचर्य के नियमों का उल्लंघन करने के कारण आजकल कलियुग में ऋषि उत्पन्न नहीं होते।

टि०—'अवरषु' का अर्थ है 'आजकल के लोगों में' कलियुग के लोगों में ॥ ४ ॥

कथं तर्ह्यद्यतना अतिक्रामन्तोऽपि नियमानल्पेनैव यत्नेन चतुरो वेदान् गृह्णन्ति ? युगान्तरे सम्यगनुष्ठितस्य नियमकर्मणः फलशेषेणेत्याह—

श्रुतर्षयस्तु भवन्ति केचित्कर्मफलशेषेण पुनस्सम्भवे ॥ ५ ॥

पुनस्सम्भवः पुनर्जन्म ॥ ५ ॥

अनु०—किन्तु पूर्वजन्म के पुण्यफल के शेष होने से कुछ लोग पुनर्जन्म लेने पर अपने वेद के ज्ञान द्वारा ऋषियों के समान होते हैं।

टि०—यह इस प्रश्न का उत्तर है कि इस जन्म में भी कुछ लोग बड़ी सरलता से वेदों का अध्ययन कैसे कर लेते हैं ! उन लोगों के वेदाध्ययन की क्षमता का कारण पूर्वजन्म के ब्रह्मचर्यावस्था के नियमों के पालन से उत्पन्न पुण्यफल ही है। पुनस्सम्भव का अर्थ है नये जन्म में ॥ ५ ॥

अत्रोदाहरणम्—

यथा श्वेतकेतुः ॥ ६ ॥

श्वेतकेतुर्ह्यल्पेनैव कालेन चतुरो वेदाञ्जग्राह। तथा च छान्दोग्यम्— „[1]"श्वेतकेतुर्हारुणेय आस। तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं, न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति। स ह द्वादशवर्ष उपेत्य चतुर्विंशतिवर्षस्सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाये" ति ॥ ६ ॥

अनु०—उदाहरण के लिए श्वेतकेतु।

---

१. छान्दो ६. १. १,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टि०—श्वेतकेतु ने बहुत अल्प अवस्था में चारों वेदों का ज्ञान प्राप्त कर लिया। छान्दोग्योपनिषद् में उनका उल्लेख है। ६. १. १ ॥ ६ ॥

एवं नियमातिक्रमे दोषमुक्त्वा तदनुष्ठाने सिद्धिमाह—

यत्किंच समाहितोऽब्रह्म प्याचार्यादुपयुङ्क्ते ब्रह्मवदेव तस्मिन् फलं भवति ॥ ७ ॥

अब्रह्मपि अब्रह्मापि। पररूपम्, कर्कन्धुवत्[1]। अपेर्वाऽकारलोपः, पिहितपिनद्धादिवत्। वेदव्यतिरिक्तमपि यत्किञ्चित् विषमन्त्रादि समाहितो नियमवान् भूत्वा आचार्यादुपयुङ्क्ते गृह्णाति तस्मिन् वेदव्यतिरिक्ते ब्रह्मवदेव फलं भवति ॥ ७ ॥

अनु०—नियमों का पालन करते हुए ब्रह्मचारी वेद के अतिरिक्त जो कुछ भी गुरु शिक्षा ग्रहण करता है उसका फल उसी प्रकार होता है जिस प्रकार वेद के अध्ययन का फल होता है ॥ ७ ॥

निग्रहानुग्रहशक्तिरप्यस्य भवतीत्याह—

अथो यत्किञ्च मनसा वाचा चक्षुषा वा सङ्कल्पयन् ध्यायत्याहाऽभि-विपश्यति वा तथैव तद्भवतीत्युपदिशन्ति ॥ ८ ॥

अथो अपि च यत्किञ्च निग्रहात्मकं अनुग्रहात्कम् वा सङ्कल्पयन् चिकीर्षन्मनसा निर्दयेन शिवेन वा ध्यायति—इत्थमिदमस्याऽस्त्विति, तथैव तद्भवति। तथा यत्किञ्च सङ्कल्पयन्वाचा क्रूरया[2] मधुरया वा आह—इत्थमिदमस्यास्त्विति' तथैव तद्भवति। एवं यत्किञ्च सङ्कल्पयन् चक्षुषा घोरेण वा मैत्रेण वा अभिविपश्यति तथैव तद्भवतीत्युपदिशन्ति धर्मज्ञाः ॥ ८ ॥

अनु०—'संकल्प करके जो कुछ भी वह मन से सोचता है, शब्दों में अभिव्यक्त करता है, चक्षु से देखता है वह भी वैसा ही हो जाता है, ऐसा धर्मज्ञ लोग कहते हैं।

टि०—हरदत्त की व्याख्या में संकेत किया गया है कि चाहे शान्त मन से अथवा क्रूर मन से चिन्तन किया जाय, क्रूर वाणी से अथवा मधुर वाणी से कहा जाय, घोर नेत्रों से देखा जाय अथवा मित्रतापूर्ण नेत्रों से देखा जाय, सभी समान होता ही है ॥ ८ ॥

अवश्यं धर्मयुक्तेनाध्येतव्यमित्युक्तम्। इदानीं ते धर्मा लक्षणतस्त्रिविधा इत्याह—

गुरुप्रसादनीयानि कर्माणि स्वस्त्ययनमध्ययनसंवृत्ति[3]रिति ॥ ९ ॥

---

१. कर्कन्धुवत्, इति घ० पु०   २. घोरया इति. क० पु०

३. अयं 'इति' शब्द उत्तरसूत्रस्यादौ पठितः क० पुस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यैरनुष्ठितैः गुरुः प्रसीदति तानि गुरुप्रसादनीयानि पादप्रक्षालनादीनि कर्माणि। स्वस्तीत्यविनाशि नाम। तत्प्राप्तिसाधनं स्वस्त्ययनम्। तच्च त्रिविधं दृष्टार्थमदृष्टार्थमुभयार्थं चेति। दृष्टार्थं बाहुनदीतरणादिनिषेधः। अदृष्टार्थं क्षारादिनिषेधः। उभयार्थं भिक्षाचरणादि। अध्ययनसम्वृत्तिरधीतस्य वेदस्याऽभ्यासः ॥ ९ ॥

अनु०—(ब्रह्मचारी विद्यार्थी के कर्तव्य धर्म हैं) गुरु को प्रसन्न करने वाले कर्म, कल्याण की प्राप्ति के कर्म तथा वेद का परिश्रमपूर्वक अभ्यास।

टि०—स्वस्ति का अर्थ है कल्याण करने वाले नियम का पालन यथा नदी आदि को तैरकर पार करने का वर्जन। स्वस्ति तीन प्रकार का कहा गया है : दृष्टार्थ, अदृष्टार्थ, उभयार्थ। नदीसंतरण का निषेध दृष्टार्थ का उदाहरण है। क्षारलवणादि भक्षण का वर्जन अदृष्टार्थ का तथा भिक्षाचरण उभयार्थ स्वस्ति का उदाहरण है। इस सूत्र में विद्यार्थी के धर्मों को तीन वर्गों में बाँटा गया है ॥ ९ ॥

अतोऽन्यानि निवर्तन्ते ब्रह्मचारिणः कर्माणि ॥ १० ॥

एतेभ्यः अन्यानि कर्माणि निवर्तन्ते ब्रह्मचारिणो, न कर्तव्यानीत्यर्थः ॥१०॥

अनु०—इसके अतिरिक्त दूसरे कार्य ब्रह्मचारी को नहीं करने चाहिए ॥ १० ॥

स्वाध्यायधृग्धर्मरुचिस्तपस्व्यृजुर्मृदुस्सिद्ध्यति ब्रह्मचारी ॥ ११ ॥

स्वाध्यायधृक् अधीतस्य[1] वेदस्य धारयिता अविस्मर्ता। धर्मे रुचिर्यस्य स धर्मरुचिः। तपस्वी नियमेषु तपश्शब्दः तद्वान्। ऋजुः अमायावी। मृदुः। क्षमावान्। एवंभूतो ब्रह्मचारी सिद्ध्यति सिद्धिं प्राप्नोति। उक्ता सिद्धिः[2] 'अथो यत्किञ्च मनसे' ति। तत्रोक्तानां पुनर्वचनमादरार्थम्। तदनुष्ठाने फलभूमा, अतिक्रमे च दोषभूमेति तात्पर्यम् ॥ ११ ॥

अनु०—स्वाध्याय को धारण करने वाला, धम अर्थात् नियम के पालन में रुचि रखने वाला, तपस्वी (अर्थात् ब्रह्मचारी के नियमों का पालन करने वाला), सरल तथा क्षमावान् ब्रह्मचारी सिद्धि प्राप्त करता है ॥ ११ ॥

सदा महान्तमपररात्रमुत्थाय गुरोस्तिष्ठन्प्रातरभिवादनमभिवादयीताऽसावहं भो, इति ॥ १२ ॥

सदा प्रतिदिनं महान्तमपररात्रं रात्रेः पश्चिमे याम उत्तिष्ठेत्। उत्थाय च समीपे तिष्ठन् गुरोः प्रातरभिवादनमभिवादयीत—'असावहं भो' इति ब्रुवन्। असावित्यत्राऽऽत्मनो नामनिर्देशः, यथा—'अभिवादये यज्ञशर्माहं भो' इति ॥१२॥

अनु०—प्रतिदिन रात्रि के अन्तिम याम में उठे और गुरु के निकट जाकर अपना नाम लेते हुए अभिवादन करे ॥ १२ ॥

---

१. 'स्वाध्यायस्य' इति क० ख० पु० २. आप० ध० १. ५. ८.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक्प्रातराशात् ॥१३॥

अन्येषामप्याचार्यव्यतिरिक्तानाम् प्राक्प्रातराशात् प्रातर्भोजनात्प्राक प्रातरभिवादनमभिवादयीत, ते चेत् समानग्रामे वसन्ति ॥ १३ ॥

अनु०—और उसी ग्राम में रहने वाले दूसरे वृद्ध विद्वान ब्राह्मणों को भी प्रातराश के पूर्व प्रणाम करे ॥ १३ ॥

प्रोष्य च समागमे ॥ १४ ॥

यदा स्वयं प्रोष्य समागतो भवति, आचार्यादयो वा तदाऽप्यभिवादयीत। इदं नैमित्तिकम्। पूर्वं नित्यम् ॥ १४ ॥

अनु०—यात्रा पर गया हो तो लौटने पर इन व्यक्तियों से मिलने पर प्रणाम करे।

टिप्पणी—यह अभिवादन केवल अवसर के अनुसार किया जाता है किन्तु इसके पूर्व सूत्र १२, १३ की अभिवादनविधि नित्य करनी होती है ॥ १४ ॥

अथ काम्यम्—

स्वर्गमायुश्चेप्सन् ॥ १५ ॥

अभिवादयीतेत्येव ॥ १५ ॥

अनु—स्वर्ग तथा दीर्घजीवन की अभिलाषा से इन व्यक्तियों का अन्य समयों पर भी अभिवादन करे ॥१५॥

अभिवादनप्रकारं वर्णानुपूर्व्येणाऽऽह—

दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोऽभिवादयीतोरस्समं राजन्यो मध्यसमं वैश्यो[1] नीचैश्शुद्रः प्राञ्जलि ॥ १६ ॥

ब्राह्मणोऽभिवादयमानः आत्मनो दक्षिणं बाहुं श्रोत्रसमं प्रसार्याभिवादयीत। उरस्समं राजन्यः। दक्षिणं प्रसार्याभिवादयीतेत्यत्रानुवर्तते। एवमुत्तरयोरपि। मध्यसममुदरसमम्। ऊरुसममित्यन्ये। नीचैः पादसमं शूद्रोऽभिवादयीत। प्राञ्जलि यथा भवति तथा अभिवादयति। अञ्जलिं कृत्वेत्यर्थः। प्राञ्जलिरिति युक्तः पाठः ॥ १६ ॥

अनु०—ब्राह्मण दाहिनो बाहु को कान के बराबर फैलाकर अभिवादन करे। क्षत्रिय वक्ष के समानान्तर फैलाकर अभिवादन करें। वैश्य उदर या ऊरु के समानान्तर बाहु फैलाकर अभिवादन करे। शूद्र नीचे (पैरों के समानान्तर) हाथ करके अञ्जलि बाँधकर अभिवादन करे ॥ १६ ॥

---

१. नीचैश्शूद्रः …॥ १६ ॥ प्राञ्जलि ॥ १७ ॥ इति पाठः क० घ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्लावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वर्णानाम् ॥१७॥

अभिवादनस्य यत्प्रत्यभिवादनं तत्राभिवादयितुर्नाम्नः प्लावनं कर्तव्यम् प्लुतः कर्तव्य इत्यर्थः। पूर्वेषां वर्णानां शूद्रवर्जितानामभिवादयमानानाम्। [1]'प्रत्यभिवादेऽशूद्र' इति पाणिनीयस्मृतिः। तत्र [2]"वाक्यस्य टे' रित्यनुवृत्तेः प्रत्यभिवादवाक्यस्यान्ते नामप्रयोगः तस्य टेः प्लुतः। 'आयुष्मान् भव सौम्या३ इति प्रयोक्तव्यः। स्मृत्यन्तरवशान्नाम्नश्च पश्चादकारः। तथा च मनुः—

[3]आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।
अकारश्चास्य नाम्नोऽन्ते वाच्यःपूर्वाक्षरः प्लुतः॥" इति।

'आयुष्मान् भव सौम्य देवदत्त ३ अ' इति प्रयोगः। शम्भुर्विष्णुः पिनाकपाणिश्चक्रपाणिरित्यादीनां नाम्नां सम्बुद्धौ गुणे कृते 'एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ' इत्ययं विधिर्भवति। अन्ते अकारः। [4]"तयोर्य्वावचि संहितायाम्' इति यकारवकारौ च भवतः—शम्भा ३ व, विष्णा३ व, पिनाकपाणा ३ य, चक्रपाणा ३ य इति। अत्र सूत्रे'प्रत्यभिवादने चे'ति चकारस्यार्थं न पश्यामः।

अपर आह—'अभिवादने प्रत्यभिवादने च प्लावन'मिति। अस्मिन्नपि पक्षे द्वन्द्वेनाभिहितत्वाच्चशब्दोऽनर्थक एव। अभिवादने च शास्त्रान्तरे न क्वापि प्लुतो विहितः। तस्मादनर्थक एव चकारः। अनर्थकाश्च निपाता बहुलं प्रयुज्यन्ते ॥ १७ ॥

अनु०—शूद्र को छोड़कर पूर्ववर्ती वर्णों के अभिवादन, प्रत्यभिवादन में नाम के अन्तिम स्वर को प्लुत करके उच्चारण करना चाहिए।

टि०—प्रत्यभिवादन के वाक्य के अन्त के स्वर को प्लुत हो। 'आयुष्मान् भव सौम्या ३'। मनुस्मृति में भी इसका निर्देश किया गया है। उकारान्त, इकारान्त नामों के सम्बोधन में गुण किया जाता है 'तयोर्य्वावचि संहितायाम्' से यकार, वकार होता है। शम्भा ३ व, विष्णा ३ व, पिनाकपाणा ३ य, जैसा रूप बनता है।

इस सूत्र में 'च' के प्रयोग को हरदत्त ने निरर्थक बताया है। दूसरे सूत्रों में अभिवादन के वाक्य में प्लुत का विधान नहीं किया गया है॥ १७ ॥

उदिते त्वादित्य आचार्येण समेत्योपसंग्रहणम् ॥ १८ ॥

उदिते त्वादित्ये आचार्येण अध्ययनार्थं समेत्य वक्ष्यमाणेन विधिनोपसंग्रहणं कुर्यात् ॥ १८ ॥

---

१. पा. सू. ८. २. ८३. शूद्रभिन्नविषये प्रत्यभिवादेयद्वाक्यं "आयुष्मान् भव सौम्य" इत्यादिरूपं तस्य टेः प्लुतस्स्यात्, स चोदात्तः इति सूत्रार्थः।

२. पा० सू० ८. २. ८२.

३. मनु० स्मृ० २. १२५.

४. पा० सू० ८. २. १०८. इदुतोर्यकारवकारौ स्तोऽचि संहितायाम् इति सूत्रार्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—सूर्य उगने पर गुरु के निकट अध्ययनार्थ आकर पादोपसंग्रहण करे ॥१८॥

सदैवाऽभिवादनम् ।: १९ ॥

अन्यदा सर्वदा पूर्वोक्तप्रकारेणाभिवादनमेव । अयमनुवाद उत्तरविवक्षया ॥ १९ ॥

अनु०—इसके अतिरिक्त अन्य सभी अवसरों पर पूर्वोक्त विधि से ही अभिवादन करे ॥ १९ ॥

उपसंग्राह्य आचार्य इत्येके ॥ २० ॥

अभिवादनप्रसङ्गे सदैव उपसंग्राह्य आचार्य इत्येके मन्यन्ते ॥ २० ॥

अनु०—धर्मज्ञों का मत है कि सभी अवसरों पर गुरु का पादोपसंग्रहण करे, अभिवादनमात्र नहीं ॥ २० ॥

ननु किमिदमुपसंग्रहणम् ? तदाह—

दक्षिणेन पाणिना दक्षिणं पादमधस्तादभ्यधिमृश्य सकुष्ठिकमुपसंगृह्णीयात् ॥ २१ ॥

आत्मनो दक्षिणेन पाणिना आचार्यस्य दक्षिणं पादं अधस्तादभ्यधिमृश्य, अधिशब्द उपरिभावे, अधस्ताच्चोपरिष्टाच्चाभिमृश्य । सकुष्ठिकं सगुल्फम् । साङ्गुष्ठमित्यन्ये । उपसंगृह्णीयात् । इदमुपसंग्रहणम् । एतत्कुर्यात् ॥ २१ ॥

अनु०—गुरु के दाहिने पैर को दाहिने हाथ से नीचे और ऊपर की ओर दबाकर उसे एडी के साथ पकड़े ।

टि०—सकुष्ठिकम् का अर्थ कुछ लोग अँगूठे सहित भी करते हैं । इसे ही उपसंग्रहण कहते हैं ॥ २१ ॥

उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके ॥ २२ ॥

उभाभ्यां पाणिभ्यां उभावेवाऽऽचार्यस्य पादौ अभिपीडयतो माणवकस्य उपसंग्राह्यावित्येके मन्यन्ते । अभिपीडयत इति "[1]कृत्यानां कर्तरि" इति कर्तरि षष्ठी । अत्र मनुः—

[2]"व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः ॥ इति ॥ २२ ॥

अनु०—कुछ धर्मज्ञों का मत है कि दोनों हाथों से गुरु के दोनों चरणों को (दाहिने हाथ से दाहिने पैर को, बाएँ हाथ से बाएँ पैर को) दबावे ॥ २२ ॥

सर्वाह्णं सुयुक्तोऽध्ययनादनन्तरोऽध्याये ॥ २३ ॥

---

१. पा० सू० २. ३. ७१ २. म० स्मृ० २. ७२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1]'सर्वं च तदहश्च सर्वाह्णम्। [1]"राजाहस्सखिभ्यष्टच्।' [2]'अह्नोऽह्न एतेभ्य' इत्यह्नादेशः। [3]' अह्नोदन्ता'दिति णत्वम्। अत्यन्तसंयोगे द्वितीया।' सर्वाह्णं सदा सुयुक्तः सुसमाहितः अनन्यचित्तः। अध्ययनादनन्तरः नान्तरयतीत्यनन्तरः। अध्ययनाद्यथा आत्मानं नान्तरयति यथा अध्ययनान्न विच्छिद्येत तथा स्यात्। अध्याये स्वाध्यायकाले। अध्याय इत्यनुवादः। [4]"मनसा चानध्याय' इति विशेषविधानात्। 'अध्याये' दिति प्रायेण पठन्ति। तत्र तकारोऽपपाठश्छान्दसो वा॥ २३॥

अनु०–पूरे दिन मन को समाहित रखे (अन्यत्र ध्यान न रखे) अध्याय के समय ध्यान कहीं अन्यत्र न रखे, अध्ययन पर ही पूर्ण ध्यान रखे ॥२३॥

तथा गुरुकर्मसु ॥ २४ ॥

गुरुकर्मसु च तथा स्यात् सुयुक्तोऽनन्तरश्च स्यात्॥ २४॥

अनु०–इसी प्रकार गुरु के कार्यों को करते समय भी अन्यत्र ध्यान न रखे ॥२४।

मनसा चाऽनध्याये ॥ २५ ॥

अनध्यायकाले मनसा च अध्यायादनन्तरः स्यात्। सन्देहस्थानानि मनस निरूपयेत्। अध्ययनविषयामेव चिन्तां कुर्यात्॥ २५॥

अनु०–अनध्याय के समय अध्ययन विषयों की ही मन से चिन्ता करे। (स्पष्ट न हुए स्थलों को समझने का प्रयत्न करे।) ॥ २५॥

आहूताध्यायी च स्यात् ॥ २६ ॥

आचार्येणाहूतस्सन्नधीयीत' नाध्यापने स्वयं प्रवर्तयेत्॥ २६॥

॥ इत्यापस्तम्बीये धर्मसूत्रे पञ्चमी काण्डिका॥

अनु०–गुरु के बुलाने पर ही अध्ययन के लिए जावे, स्वयं अध्यापन के लिए गुरु से न कहे॥ २६॥

—:o:—

सदा निशायां गुरुं संवेशयेत्तस्य पादौ प्रक्षाल्य संवाह्य ॥ १ ॥

सदा प्रत्यहं निशायां अतिक्रान्ते प्रदोषे गुरुं संवेशयेत्। कथम्? तस्य गुरोः पादौ प्रक्षाल्य संवाह्य च। संवाहनं मर्दनम्॥ १॥

१. पा० सू० ५. ४. ९१. राजन्शब्दान्तादहन्शब्दान्तात् सखिशब्दान्ताच्च तत्पुरुषात् टच् स्यात् इति सूत्रार्थः॥

२. सर्वैकदेश-संख्यात, पुण्यशब्देभ्यः परस्याहन्शब्दस्याह्न इत्यादेशस्स्यात्समासान्ते परे इति सूत्रार्थः।

३. ,, ४. ७. अदन्तपूर्वपदस्थाद्रेफात् परस्याह्नादेशस्य नस्य णस्स्यात् इति सूत्रार्थः।

४. आप० ध० १. ५. २६.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—प्रतिदिन रात्रि को गुरु के चरणो को धोकर तथा उनके शरीर का मर्दन करके उन्हें सुलावे ॥ १ ॥

अनुज्ञातः संविशेत् ॥ २ ॥

[1]गुरुणाऽनुज्ञातस्तु स्वयं संविशेत् शयीत ॥ २ ॥

अनु०—उनकी आज्ञा प्राप्त करके स्वयं सोवे ॥ २ ॥

न चैनमभिप्रसारयीत ॥ ३ ॥

एनमाचार्यं प्रति पादौ न प्रसारयेत् ॥ ३ ॥

अनु०—अपने पैर गुरु की ओर न पसारे ॥ ३३ ॥

न खट्वायां सतोऽभिप्रसारणमस्तीत्येके ॥ ४ ॥

यदा तु गुरुः खट्वायां शेते तदा तं प्रति पादयोः प्रसारणं न दोषायेत्येके मन्यन्ते' स्वपक्षस्तु तत्रापि दोष इति ॥ ४ ॥

अनु०—कुछ धर्मज्ञों का मत है कि यदि गुरु खाट पर सोये हों तो उनकी ओर पैर पसारने में दोष नहीं है ॥ ४ ॥

न चाऽस्य सकाशे संविष्टो भाषेत ॥ ५ ॥

अस्याऽऽचार्यस्य सकाशे स्वयं संविष्टः शयानो न भाषेत। कार्यविदनादावुत्थायैव भाषेत ॥ ५ ॥

अनु०—आचार्य के समीप स्वयं सुखपूर्वक बैठकर (या लेटकर) उनसे बात न करे ॥ ५ ॥

अभिभाषितस्त्वासीनः प्रतिब्रूयात् ॥ ६ ॥

आचार्येणा[2] भिभाषितस्त्वासीनः प्रतिब्रूयात्। एतदाचार्ये आसीने शयाने वा ॥ ६ ॥

अनु०- यदि गुरु स्वयं लेटे हों तो) गुरु के कुछ कहने पर बैठा हुआ ही उत्तर दे ॥ ६ ॥

अनूत्थाय तिष्ठन्तम् ॥ ७ ॥

यदा त्वाचार्यस्तिष्ठन् प्रतिबूयात्। उत्तरे द्वे सूत्रेस्पष्टार्थे ॥ ७ ॥

अनु०—यदि गुरु खड़े होकर कुछ कह रहे हों तो ब्रह्मचारी भी खड़ा होकर उत्तर दे ॥ ७ ॥

गच्छन्तमनुगच्छेत् ॥ ८ ॥ धावन्तमनुधावेत् ॥ ९ ॥

न सोपानद्वेष्टितशिरा अवहितपाणिर्वासीदेत् ॥ १० ॥

---

१. पश्चाद्गुरुणा इति ख० पु० १. अभिभाषितस्सन् इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तरत्रोपानत्प्रतिषेधा 'न्न सोपान' दित्यनुवादः 'अध्वापन्नस्त्वि' ति प्रतिप्रसोतुम्। आचार्यं न सोपानत्क आसीदेत्। नापि वेष्टितशिराः। अवहितपाणिः दात्रादिहस्तः एवंभूतोऽपि नासीदेत् ॥ ८–१० ॥

अनु०—यदि गुरु चल रहे हों तो उनके पीछे चले; दौड़ रहे हों तो उनके पीछे दौड़े। गुरु के समीप जूते पहने हुए, सिर को वेष्ठित करके अथवा हाथ में कोई औजार (दात्र) लेकर न जावे ॥ ८-१० ॥

अध्वापन्नस्तु कर्मयुक्तो वाऽऽसीदेत् ॥ ११ ॥

अध्वानं प्राप्तोऽध्वापन्नः कर्मणि दात्रादिसाध्ये प्रवृत्तः कर्मयुक्तः एवंभूतस्तु सोपानत्कोऽप्यासीदेत् ॥ ११ ॥

अनु०—किन्तु यात्रा के समय अथवा (दात्रादि द्वारा साध्य) कार्य में लगे होने पर (जूते पहनकर, सिर वेष्ठित करके, हाथ में कोई उपकरण लेकर गुरु के समीप) जा सकता है ॥ ११ ॥

न चेदुपसीदेत् ॥ १२ ॥

[1]न चेदाचार्यस्समीपे, उपसीदेत् उपविशेत्। यदि तूपविशेदध्वापन्नः कर्मयुक्तो वा तदोपानत्प्रभृतीनि विहायोपविशेत् ॥ १२ ॥

अनु०—किन्तु गुरु के अत्यन्त निकट न बैठे ॥ १२ ॥

देवमिवाचार्यमुपासीताऽविकथयन्नविमना वाचं शुश्रूषमाणोऽस्य ॥ १३ ॥

यो यं देवं भजते स तद्भावनया तमिवाऽऽचार्यमुपासीत। अविकथयन् [2]व्यर्थां कथामकुर्वन्। अविमनाः अविक्षिप्तमनाः। अस्याऽऽचार्यस्य वाचं शुश्रूषमाणः ॥ १३ ॥

अनु०—गुरु के समीप अपने आराध्य देव के प्रति भावना जैसी श्रद्धा के साथ जावे, उनके समक्ष व्यर्थ बात न करे और ध्यान से तत्पर होकर उनके वचन सुने ॥ १३ ॥

अनुपस्थकृतः ॥ १४ ॥

[3]उपस्थकरणं प्रसिद्धम्। तत्कृत्वा नोपासीत ॥ १४ ॥

अनु०—गुरु के समीप एक टाँग के ऊपर दूसरी टाँग चढ़ाकर न बैठे ॥ १४ ॥

अनुवाति [4]वाते वीतः ॥ १५ ॥

---

१. न चेदाचार्यसमीपे उपसीदेत् उपविशेत् इति ख० पु०

२. व्यर्था कथा विकथा तामकुर्वन् इति० पु०

३. आकुञ्चितस्य सव्यजानुन उपरि दक्षिणं पादं प्रक्षिप्योपवेशनमुपस्थकरणम्।

४. 'वाते' इति नास्ति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाते अनुवाति सति वीतः विपर्ययेणेतः उपासीत। प्रतिवातं तु वक्ष्यमाणेन प्रतिषिध्यते। मनुरप्याह—

[1]"प्रतिवातेऽनुवाते च नासीत गुरुणा सहे' ति॥ १५॥

अनु०—यदि वायु शिष्य की ओर से गुरु की ओर बह रही हो तो दिशा बदल दे॥ १५॥

अप्रतिष्टब्धः पाणिना॥ १६॥

पाणिना प्रतिष्टब्धो न स्यात् पाणितलं भूमौ कृत्वा पाण्यवलम्बनो नाऽऽसीत॥ १६॥

अनु०—हाथ को पृथिवी पर टिकाये बिना बैठे॥ १६॥

अनपाश्रितोऽन्यत्र॥ १७॥

अन्यत्र कुड्याद्यपाश्रितो न स्यात्। कुड्याद्यपाश्रितो नासीत॥ १७॥

अनु०-बैठते समय किसी वस्तु का (दीवाल आदि का) सहारा न लेवे॥ १७॥

यज्ञोपवीती द्विवस्त्रः॥ १८॥

यदा द्विवस्त्रस्तदा वाससाऽन्यतरेण यज्ञोपवीती स्यात्। [2]"अपि वा सूत्रमेवोपवीतार्थे" इत्येष कल्पस्तदा न भवति॥ १८॥

अनु०—यदि ब्रह्मचारी विद्यार्थी दो वस्त्र धारण करता हो तो उत्तरीय को यज्ञोपवीत की तरह लपेटकर बैठे॥ १८॥

अधोनिवीतस्त्वेकवस्त्रः॥ १९॥

यदा त्वेकवस्त्रो भवति तदा अधोनिवीतः स्यात्। न तस्य दीर्घस्याप्येकदेशेनोत्तरीयं कुर्यात्॥ १९॥

अनु०—किन्तु यदि एक ही वस्त्र धारण करता हो तो उसको अधोवस्त्र के रूप में (बिना ओढ़े हुए, केवल शरीर के नीचे के भागों में लपेट कर) धारण करे॥ १९॥

अभिमुखोऽनभिमुखम्॥ २०॥

स्वयमाचार्याभिमुखः आत्मानं प्रत्यनभिमुखमाचार्यमुपासीत। [3]स्वयमाचार्यमपश्यन् आचार्यस्य पुरत आर्जवेनाऽऽसीत॥ २०॥

अनु०—आचार्य के अपनी ओर न देखने पर भी स्वयं उनकी ओर ही मुख करके बैठे॥ २०॥

अनासन्नोऽनतिदूरे[3] च॥ २१॥

---

१. मनु० स्मृ० २. २०३

२. आप० ध० २. ४. २२.

३. स्वयमाचार्यमेव पश्यन् इति० ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्यासन्नो न स्यादतिदूरे [1]च न स्यात् ॥ २१ ॥

अनु०- गुरु से न तो बहुत निकट बैठे और न बहुत दूर पर बैठे ॥ २१ ॥

यावदासीनो बाहुभ्यां प्राप्नुयात् ॥ २२ ॥

यावत्यन्तराले आसीन आचार्यं बाहुभ्यां प्राप्तुं शक्नुयात् तावत्यासीत ॥ २२ ॥

अनु०-जितनी दूरी पर बैठने से आचार्य का दोनों बाहुओं से स्पर्श कर सके उतनी दूरी पर वैठे ॥ २२ ॥

अप्रतिवातम् ॥ २३ ॥

आचार्यस्य [2]प्रतिवाते नाऽऽसीत ॥ २३ ॥

अनु०-जिधर से आचार्य की ओर वायु बह रही हो उधर न बैठे ।

टि०-अंग्रेजो अनुवाद में ब्यूह्लेर ने अर्थ किया है ऐसे स्थान पर न बैठे जहाँ से वायु गुरु की ओर से उसकी ओर आ रही हो ॥ २३ ॥

एकाध्यायी दक्षिणं बाहुं प्रत्युपसीदेत् ॥ २४ ॥

यदा एक एवाऽधीते तदा आचार्यस्य दक्षिणं बाहुं प्रति दक्षिणे पार्श्वे उपसीदत् उपविशेत् ॥ २४ ॥

अनु ०-यदि एक ही शिष्य अध्ययन करने वाला हो तो वह गुरु की दाहिनी ओर बैठे ॥ २४ ॥

यथावकाशं बहवः ॥ २५ ॥

वहवस्तु शिष्या यथावकाशमुपसीदेयुः ॥ २५ ॥

अनु०-यदि अनेक शिष्य हों तो वे सुविधानुसार जिधर स्थान हो वहाँ बैठें ॥२५॥

तिष्ठति च नाऽऽसीताऽनासनयोगविहिते ॥ २६ ॥

आसनयोग आसनकल्पना । आसनयोगेन विहितस्सम्भावित आनयोगविहितः । आसनयोगेनाऽसम्भाविते आचार्ये तिष्ठति सति स्वयं नाऽऽसीत ॥ २६ ॥

अनु०-जहाँ आसन देकर गुरु को सम्मानित न किया गया हो वहाँ स्वयं न बैठे ॥ २६ ॥

आसीने च न संविशेत् ॥ २७ ॥

[3]'अशयनयोगविहिते' इति पूर्वानुसारेण गम्यते । शयनयोगेनासम्भावित आचार्ये आसीने स्वयं न संविशेत् न शयीत ॥ २७ ॥

---

१. चकारो नास्ति० ख० पुस्तके २. प्रतिवातं इति ख० पु०

३. आसनयोग इति क० पु०

४ आ० ध०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—यदि गुरु (सोने के लिए शय्या न पाकर) बैठे हों, तो स्वयं न सोवे ॥२७॥

चेष्टति च चिकीर्षंस्तच्छक्तिविषये ॥ २८ ॥

शुनां गर्दभानां च बहूनां नादः। बहुवचननिर्देशात् सलावृकी वृकजाताववान्तरभेदः। क्रोष्ट्रीत्यन्ये। लिङ्गस्याविवक्षितत्वात्पुंसोऽपि ग्रहणम्। [1]"इन्द्रो यतीन् सालावृकेभ्य" इत्यादौ दर्शनात्। सर्वत्रादिस्वरो दीर्घः। स एवायं विकृतः प्रयुक्तः। एकसृकः एकचरः सृगालः। उलूको दिवाभीतः। एतेषां च शब्दाः। वादितानि वादित्राणि वीणावेणुमृदङ्गादीनि। तेषां च सर्वे शब्दाः। रोदनशब्दादयश्च। एते श्रूयमाणा [2]अनध्यायस्य हेतवः॥ १९॥

अनु०—अनेक कुत्तों का भोंकना कई गदहों का रेंकना, भेड़िया का बोलना, एकसृक (सृगाल) और उल्लू के शब्द सुनना वादन यन्त्रों का शब्द रोने, गीत तथा सामगान का शब्द—ये सभी अनध्याय के निमित्त होते हैं॥ १९॥

शाखान्तरे च साम्नामनध्यायः॥ २०॥

वेदान्तरसकाशे[3] साम्नामनध्ययनम्। गीतिषु सामाख्या, तद्योगाद्वेदवचन इत्यन्ये॥ २०॥

अनु०—जब अन्य वेद का समीप में उच्चारण किया जा रहा हो तब सामगान का अध्ययन नहीं करना चाहिए॥ २०॥

सर्वेषु च शब्दकर्मसु यत्र संसृज्येरन्॥ २१॥

आक्रोश [4]परिवादादिषु सर्वेषु शब्दकर्मसु अनध्यायः। यत्राध्ययनशब्देन ते संसृज्येरन्॥ २१॥

अनु०—सभी प्रकार के शब्दों के सुनाई पड़ने पर, यदि वे शब्द अध्ययन के शब्द में मिलकर विघ्न उत्पन्न करते हों, तो अध्ययन नहीं करना चाहिए॥ २१॥

छर्दयित्वा स्वप्नान्तम्॥ २२॥

छर्दनं वमनम्। तत्कृत्वा स्वप्नान्तं यावन्नाऽधीयीत॥ २२॥

अनु०—वमन करने के बाद फिर सोकर उठने तक अध्ययन न करे॥ २२॥

सर्पिर्वा प्राश्य॥ २३॥

अथ वा सर्पिः प्राश्याऽधीयीत॥ २३॥

अनु०—अथवा (वमन के बाद) घृत खाकर अध्ययन करे॥ २३॥

पूतिगन्धः॥ २४॥

दुर्गन्ध उपलभ्यमानोऽनध्यायहेतुः॥ २४॥

अनु०—दुर्गन्ध भी अनध्याय का हेतु होता है॥ २४॥

---

१. तै० सं० ६. २. ७. २ या० स्मृतौ १. १४८–१५१. श्लोका द्रष्टव्याः।

३. साम नाऽध्येयम्। इति. ख० पु० ४. परिहासादिषु० इति. क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्तञ्चाऽऽत्मसंयुक्तम् ॥ २५ ॥

यत्पक्वं कालपाकेनाऽम्लं जातं तच्छुक्तम् । तद्यावदात्मसंयुक्तं स्वोदरस्थमजीर्णं, यावत्तदनुगुण उद्गारस्तावदनध्यायहेतुः ॥ २५ ॥

अनु०––जब तक पेट में अजीर्ण के कारण अम्ल बना हुआ भोजन हो (खट्टी डकारें आती हों) तब तक अध्ययन न करे ॥ २५ ॥

प्रदोषे च भुक्त्वा नाऽधीयीत ॥ २६ ॥

तेनाऽधीत्यैव भुञ्जीत ॥ २६ ॥

अनु०—सायंकाल भोजन करके अध्ययन न करे ।

टि०––इस कारण सायंकाल अध्ययन के बाद ही भोजन करे ॥ २६ ॥

प्रोदकयोश्च पाण्योः ॥ २७ ॥

भुक्त्वेत्येव । भुक्त्वा यावत्प्रोदकौ पाणी आर्द्रौ तावन्नाऽधीयीत । केचित भुक्त्वेति नानुवर्तयन्ति ॥ २७ ॥

अनु०––(भोजन करने के बाद) जब तक हाथ गीला हो तब तक अध्ययन न करे ।

टि०—कुछ लोग इस सूत्र का अर्थ करते समय 'भुक्त्वा' 'भोजन करके' इतना सम्बन्ध नहीं जोड़ते ॥ २७ ॥

प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः ॥ २८ ॥

यो मृतोऽसपिण्डीकृतस्स प्रेतः । तदुद्देशेन दत्तमन्नं भुक्त्वा सप्रदोषमहर्नाऽधीयीत । प्रदोषादूर्ध्वं न दोषः । अत्र मनुः—

'यावदेकानुद्दिष्टस्य गन्धो लेपश्च तिष्ठति ।

विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥' इति ॥ २८ ॥

अनु०—मृत व्यक्ति को उद्दिष्ट कर दिये गये (श्राद्ध के) भोजन को ग्रहण करने के बाद एक दिन तथा सायंकाल अध्ययन न करे ।

टि०—प्रदोष के बाद अध्ययन करने में कोई दोष नहीं ॥ २८ ॥

आ च विपाकात् ॥ २९ ॥

यदि तावता कालेन तदन्नं पक्वं जीर्णं न भवति, तत आविपाकात् तस्य नाऽधीयीत ॥ २९ ॥

अनु०—अथवा जब तक वह अन्न पच नहीं जाता तब तक अध्ययन न करे ॥२९

अश्राद्धेन तु पर्यवदध्यात् ॥ ३० ॥

जीर्णे अजीर्णे च तस्मिन् अश्राद्धेनाऽन्नेन पर्यवदध्यात् तस्योपर्यश्राद्धमन्नं

१. मनु० स्मृ० ४. १११.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुञ्जीतेत्युक्तं भवति। केचित् अत्र 'अश्राद्धेने' ति वचनात् पूर्वत्रापि प्रेतान्नमिति श्राद्धमात्रं विवक्षितं मन्यन्ते ॥ ३० ॥

॥ इत्यापस्तम्बधर्मसूत्रे तद्वृत्तावुज्ज्वलायां च दशमी कण्डिका ॥

अनु०—श्राद्ध के अवसर पर खाये हुए अन्न के बाद ऐसा अन्न अवश्य खावे जो श्राद्ध के लिए न कल्पित हो ॥ ३० ॥

दशमी कण्डिका समाप्त

—:०:—

काण्डोपाकरणे चाऽऽमातृकस्य ॥ १ ॥

काण्डोपाकरणं काण्डव्रतादेशनम्। तस्मिन्नहनि[1] अमातृकस्यान्नं भुक्त्वा सप्रदोषमहरनध्यायः। अपर आह—भुक्त्वेति नाऽनुवर्तते। यथाचोत्तरत्र भुक्त्वाग्रहणम्। काण्डोपाकरणे अमातृकस्य माणवकस्य सप्रदोषमहरनध्यायः। एतेनोत्तरं व्याख्यातम् ॥ १

अनु०—वेद के नये काण्ड का अध्ययन आरम्भ करने पर मातृहीन व्यक्ति द्वारा दिया गया भोजन करके एक दिन तथा सन्ध्या को अनध्याय रखे ॥ १ ॥

काण्डसमापने चाऽपितृकस्य ॥ २ ॥

काण्डसमापनं व्रतविसर्गः ॥ २ ॥

अनु०—काण्ड समाप्त करने के दिन यदि पितृहीन व्यक्ति का अन्न ग्रहण करे तो एक दिन तथा सन्ध्या को अनध्याय रखे ॥ २ ॥

मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके । ३ ॥

ये मनुष्या भूत्वा प्रकृष्टेन तपसा देवास्सम्पन्नास्ते मनुष्यप्रकृतयो 'नन्दिकुबेरादयः। तेषां यज्ञः तत्प्रीत्यर्थे ब्राह्मणभोजनम्, तत्रभुक्त्वा सप्रदोषमहरनध्याय इत्येके मन्यन्ते। मनुष्यमुखेन देवेष्विज्यमानेष्वित्यन्ये ॥ ३ ॥

अनु०—कुछ धर्मशास्त्रज्ञों का मत हैं कि जो देवता पहले मनुष्य थे और (तपस्या के कारण) देवता हो गये हों उनके लिए किये गए यज्ञ में अन्न ग्रहण करने के वाद भी उतने ही समय तक (एक दिन तथा सन्ध्या को) अनध्याय रखे।

टि०—ऐसे देवों में हरदत्त ने नन्दिकुबेर का उदाहरण दिया ॥ ३ ॥

पर्युषितैस्तण्डुलैराममांसेन च नाऽनध्यायः ॥ ४ ॥

'प्रेतसंक्लृप्तं चाऽन्न' (१०.२८), मित्यस्यापवादः पर्युषिता रात्र्यन्तरिताः हव्यः प्रतिगृहीताः, तेषु तण्डुलेष्वद्य पक्त्वा भुज्यमानेषु नानध्यायः। तथा आममांसेन तदहर्भक्षितेनापि नानध्यायः पर्युषितेनेत्यके। 'पर्युषितै' रिति वचनात्तदहर्भक्षितैः सप्रदोषमहरनध्यायः ॥ ४ ॥

१. 'नन्दीश्वरशरकुमारादयः' इति पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—यदि एक दिन पहले (रात्रि से पूर्व) प्राप्त चावल या कच्चा मांस बनाकर खावे तो अनध्याय नहीं होता (भले ही ये खाद्य पदार्थ मृत व्यक्ति के लिए श्राद्ध के ही उद्दिष्ट करके दिया गया हो) ।

टि०—यह सूत्र दशमी कण्डिका के २८वें सूत्र का अपवाद है ॥ ४॥

तथौषधिवनस्पतिमूलफलैः ॥ ५ ॥

ओषधिग्रहणेन वीरुधोऽपि गृह्यन्ते । वनस्पतिग्रहणेन वृक्षमात्रम् । तेषां मूलैः सूरणकन्दादिभिः फलैश्चाऽम्रादिभिः पक्वैरपक्वैश्च तदहर्भक्षितैरपि नाऽनध्यायः ॥ ५ ॥

अनु०—यदि (श्राद्ध से संम्बद्ध) लताओं और वृक्षों का मूल-फल खावे तो अनध्याय नहीं होता ॥ ५ ॥

यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत
न तत्तदहरधीयीत ॥ ६ ॥

यस्मिन्नहनि यत्काण्डमुपाकृतं न तत्तदहरधीयीत । तथा श्रावण्यां पौर्णमास्यामुपाकृत्य प्रशस्तेऽहरन्तरे यस्य काण्डस्यानुवाक्यमध्येतुमारम्भं कुर्वीत न तत्तदहरधीयीत । अहरित्यहोरात्रोपलक्षणम् ॥ ६ ॥

अनु०—काण्ड आरम्भ करने की तिथि (श्रावण की पौर्णमासी) को अथवा काण्ड की अनुवाकानुक्रमणी का अध्ययन करते समय सम्बद्ध काण्ड का उस दिन (तथा उस रात्रि) अध्ययन न करे ॥ ६ ॥

उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् ॥ ७ ॥

अनेकवेदाध्यायी यद्येकस्य वेदस्य पारायणं कुरुते तदा तस्य पारायणस्य [1]ये उपाकरणोत्सर्जने, तयोः कृतयोस्तां विद्यां तदहर्नाऽधीयीत । एतदेव ज्ञापकं पारायणस्याऽप्युपाकरणोत्सर्जने भवत इति । 'तां विद्यामि' ति वचनाद्विद्यान्तराध्ययने न दोषः ॥ ७ ॥

अनु०—(अनेक वेदों का अध्येता) एक वेद के पारायण का उपाकरण तथा उत्सर्जन करने के बाद उस (वेद) विद्या का उस दिन अध्ययन न करे ॥ ७ ॥

वायुर्घोषवान् भूमौ तृणसंवाहो वर्षति वा यत्र धाराः प्रवहेत् ॥ ८ ॥

घोषवान् कर्णश्रवः । भूमाववस्थितानि तृणानि संवाहयति उत्क्षिप्य गमयतीति तृणसंवाहः । वर्षति वा[2] मेघे धाराः प्रवहेत् विक्षिपेत् । यत्र देशे एवं-

---

१. उपाकरणोत्सर्जनयोः इति ङ० पु० २. देवे. इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधो वायुस्तत्र तावन्तं कालं नाऽधीयीत। अत्र मनुः—

[1]"कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने" ॥ इति ॥ ८ ॥

अनु०—यदि वायु हर-हराती हुई बहती हो, तिनकों को उड़ा रही हो या मेघ की धाराओं की बौछार ला रही हो तो उस स्थान पर (जब तक इस प्रकार की वायु बह रही हो) अध्ययन न करे ॥ ८ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

[2]ग्रामारण्ययोश्च सन्धौ महापथे च विप्रोष्य च समध्ययनं तदहः ॥९॥

यदा[3] सहाऽधीयानाः कारणवशाद्विप्रवसेयुः। केचिच्चाचार्येण वा सङ्गतास्तदा समध्ययनं सहाऽधीयमानं प्रदेश तदहर्नाधीयीत। विप्रोषितानां यदहः पुनर्मेलनं तदहर्नाधीयीतेत्यन्ये ॥ ९ ॥

अनु०—गांव और वन की सीमा पर, महापथ पर अध्ययन न करे अथवा साथ अध्ययन करने वाला यात्रा पर गया हो तो उस दिन उस अंश का अध्ययन न करे।

टिप्पणी—इसकी एक व्याख्या यह भी है कि जब साथ अध्ययन करने वाले कहीं यात्रा से लौटे हो तो उस दिन उनके साथ अध्ययन न करे ॥ ९ ॥

स्वैरिकर्मसु च ॥ १० ॥

नाधीयीतेत्येव ॥ १० ॥

अनु०—अपने को सुख देने वाले कर्मों को करते समय अध्ययन न करे ॥१०॥

अत्रोदाहरणम्—

यथाहस्तप्रक्षालनोत्सादनानुलेखणानीति ॥ ११ ॥

णत्वमाकस्मिकम्, अपपाठो वा ॥ ११ ॥

अनु०—इस प्रकार के स्वयं को सुख देने वाले कर्म हैं: हाथ धोना, दबाना या खुजलाना ॥ ११ ॥

तावन्तं कालं नाऽधीयीताऽध्यापयेद्वा ॥ १२ ॥

तेषु स्वैरिकर्मसु तावन्तं कालमध्ययनमध्यांपनञ्च वर्जयेत् ॥ १२ ॥

अनु०—इन सुखद कार्यों के करते रहते समय तक न तो अध्ययन करे और न अध्यापन ॥ १२ ॥

सन्ध्योः ॥ १३ ॥

---

१. म० स्मृ० २. १०२ २. इदं ११ शं च सूत्रं त्रिधा विच्छिन्नं ङ० पु०

३. सहाधीयमानेषु केचित् इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सज्योतिषोऽज्योतिषोऽदर्शनात् उभे सन्ध्ये। तयोस्तावन्तं कालं नाधीयीताध्यापयेद्वा। एवमुत्तरत्राप्यनुवृत्तिः ॥ १३ ॥

अनु०—दोनों सन्ध्या समय (गोधूलि वेलाओं) में अध्ययन या अध्यापन न करे ॥ १३ ॥

उत्तरे द्वे सूत्रे निगदसिद्धे—

तथा वृक्षमारूढोऽप्सु चावगाढो नक्तं चापावृते ॥ १४ ॥

विवृतद्वारमपावृतम्। तत्र नक्तं नाधीयीत ॥ १४ ॥

अनु०—वृक्ष पर चढ़कर नदी में प्रवेश कर और रात्रि में द्वार खोलकर अध्ययन न करे ॥ १४ ॥

दिवा च पिहिते ॥ १५ ॥

संवृतद्वारं पिहितम्। तत्र दिवा नाधीयीत ॥ १५ ॥

अनु०—दिन में द्वार बन्द कर अध्ययन न करे ॥ १५ ॥

अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः ॥ १६ ॥

वासन्तिको वसन्तोत्सवः। स च चैत्रमासि शुक्लत्रयोदश्यां भवति। आषाढशब्देनापि तस्मिन्मासे क्रियमाणस्तादृशः कश्चिदिन्द्रोत्सवादिर्विवक्षितः। तयोस्तदहरनुवाकाध्ययनमविहितम्। अनुवाकग्रहणान्न्यूने न दोषः।

अपर आह—अनुवाकग्रहणान्मन्त्रब्राह्मणयोरेव प्रतिषेधः, नाङ्गानामिति ॥ १६ ॥

अनु०—आषाढ़ महीने (इन्द्रोत्सव) में और वसन्त के उत्सव के समय अनुवाक का अध्ययन नहीं करना चाहिए।

टिप्पणी—हरदत्त ने व्याख्या में संकेत किया है कि चूँकि सूत्र में अनुवाक के अध्ययन का निषेध है अतः अनुवाक से छोटे अंशों का अध्ययन किया जा सकता है। इसी प्रकार कुछ व्याख्याकारों के अनुसार अनुवाक का निषेध करके केवल मन्त्र ब्राह्मणात्मक वेद का निषेध किया गया है वेदाङ्ग का नहीं ॥ १६ ॥

नित्यप्रश्नस्य चाऽविधिना ॥ १७ ॥

नित्यं प्रश्नाध्ययनं यत्र स नित्यप्रश्नो ब्रह्मयज्ञः। यस्य चाविधिना वक्ष्यमाणेन प्रकारेण विनाऽनुवाकाध्यनमविहितम्। यद्यपि नित्यं ब्रह्मयज्ञाध्ययनं तथापि केनचिदप्यङ्गेन विना न कर्तव्यम्। तेन विस्मृत्य प्रातराशे कृते प्रायश्चित्तमेव न ब्रह्मयज्ञः। मनुः—

'स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्'। इति ॥ १७ ॥

अनु०—इसी प्रकार ब्रह्मयज्ञ में बिना उचित विधि के वेद के अंश का अध्ययन करना निषिद्ध है।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी—ब्रह्मयज्ञ का अध्ययन नित्य करना चाहिए किन्तु अङ्ग के बिना अध्ययन नहीं करना चाहिए। यदि कोई दैनिक ब्रह्मयज्ञ करना भूलकर प्रातराश ग्रहण कर ले तो उसके लिए उपवास का प्रायश्चित ही करना होता है ॥ १७ ॥

तस्य विधिः ॥ १८ ॥

तस्य नित्यप्रश्नस्य विधिर्वक्ष्यते ॥ १८ ॥

अनुवाद—दैनिक अध्ययन की विधि इस प्रकार है ॥ १८ ॥

अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशेऽधीयीत यथाध्यायमुत्सृजन्वाचा ॥ १९ ॥

अकृतदिवाभोजन उदकसमीपं गत्वा प्रयतः स्नानमार्जनादिशुद्धः शुचौ देशे प्राच्यामुदीच्यां वा दिश्यच्छदिर्दर्शेऽधीयीत। यथाध्यायं यथा पाठमनुषङ्गरहितमुत्सृजन् आदित आरभ्य प्रथमादिष्वहस्सु[1] अधीयीत द्वितीयादिषूत्सृज्य ततः परमधीयीत। वाचा उच्चैरित्यर्थः ॥ १९ ॥

अनुवाद—प्रातराश करने से पूर्व जल के समीप जाकर स्नान, मार्जन आदि द्वारा शुद्ध होकर पवित्र स्थान में ऊंचे स्वर से पढ़े हुए अंश को छोड़कर आरम्भ से पाठ करे ॥ १९ ॥

मनसा चाऽनध्याये ॥ २० ॥

अनध्याये च मनसाऽधीयीत नित्यस्वाध्यायम् ॥ २० ॥

अनुवाद—जिस दिन अनध्याय का विधान किया गया हो उस दिन मन से ही स्वाध्याय करे ॥ २० ॥

विद्युति चाऽभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते ॥ २१ ॥

विद्युति अभ्यग्रायामविरतायाम्। स्तनयित्नौ चाऽभ्यग्रे। अप्रायत्ये आत्मनोऽशुचिभावे। प्रेतान्ने च भुक्ते। नीहारे च नीहारो हिमानी तस्मिंश्च वर्तमाने। मानसमनन्तरोक्तमध्ययनं परिचक्षते वर्जयन्ति ॥ २१ ॥

अनुवाद—यदि निरन्तर बिजली चमक रही हो अथवा निरन्तर मेघगर्जन हो रहा हो, यदि स्वयं शुद्ध न हो, श्राद्ध का अन्न खाने पर, कुहरा छाए रहने पर वेद का मानसिक स्वाध्याय भी वर्जित किया गया है ॥ २१ ॥

श्राद्धभोजन एवैके ॥ २२ ॥

---

१. अधीतं यत् तत् इति. ड० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एके त्वाचार्याः श्राद्धभोजन एव मानसं परिचक्षते, न विद्युदादिषु ॥२२॥

अनुवाद—कुछ धर्मज्ञ केवल श्राद्धभोजन करने पर ही मानसिक स्वाध्याय का निषेध करते हैं ॥ २२ ॥

विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ [1]यत्र सन्निपतेयुस्त्र्यहमनध्यायः ॥ २३ ॥

अपर्तौ यस्मिन् देशे यो वर्षाकालः ततोऽन्यस्तत्रापर्तुः । तत्र यदि विद्युदादयस्सन्निपतेयुः समुदितास्स्युः तदा त्र्यहमनध्यायः ॥ २३ ॥

अनु०—जब असमय में बिजली की चमक, मेघ की गर्जन अथवा वर्षा एक साथ होवे तो तीन दिन अनध्याय होता है ॥ २३ ॥

यावद्भूमिर्व्युदकेत्येके ॥ २४ ॥

यावता कालेन भूमिः विगतोदका भवति तावन्तं कालमनध्याय इत्येके मन्यन्ते ॥ २४ ॥

अनु०—कुछ धर्मशास्त्रज्ञों के अनुसार केवल उस समय तक अनध्याय होता है जब तक पृथ्वी सूख नहीं जाती ॥ २४ ॥

एकेन द्वाभ्यां वैतेषामाकालम् ॥ २५ ॥

एतेषां विद्युदादीनां मध्ये एकेन द्वाभ्यां वा योगे आकालमनध्यायः । अपरेद्युरा तस्य कालस्य प्राप्तेरित्यर्थः ॥ २५ ॥

अनु०—यदि उपयुक्त विद्युत्, मेघगर्जन और वर्षा में से कोई एक घटित हों या दो एक साथ हों तो दूसरे दिन के उसी समय तक अनध्याय होता है ॥ २५ ॥

सूर्याचन्द्रमसोर्ग्रहणे भूमिचले ऽपस्वान उल्कायामग्न्युत्पाते
च सर्वासां विद्यानां सार्वकालिकमाकालम् ॥ २६ ॥

'सूर्याचन्द्रमसो' रिति वचनं बृहस्पत्यादिनिवृत्त्यर्थम् । भूमिचले भूकम्पे । अपस्वाने निर्घाते । उल्कायामुल्कापाते । अग्न्युत्पाते[2] ग्रामादिदाहे । एतेषु निमित्तेषु[3] सर्वेषु सर्वासां विद्यानाम्—

[4]अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।

---

१. "यत्र" इति नास्ति क० पु०

२. गृहादिदाहे इति ग० पु० ३. सर्वेषु इति नास्ति. ख० ग० पु०

४. विष्णु पु० अङ्गानि शिक्षाव्याकरणछन्दोनिरुक्तज्यौतिषश्रौत्रसूत्राणि, चत्वारो वेदाः, ऋगादयः प्रसिद्धाः, मीमांसा पूर्वमीमांसा, उत्तरमीमांसा च 'न्यायविस्तरः गौतमप्रणीतमान्वीक्षिक्याख्यं न्यायशास्त्रम्. वैशेषिकशास्त्रं च, पुराणं मत्स्यादिपुराणानि, मन्वादिप्रणीतानि धर्मशास्त्राणि च विद्यापदवाच्यानीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ इत्युक्तानाम् । सार्वकालिकमृतौ चापर्तौ चाऽऽकालमनध्यायः । अत्र 'सर्वासामि'ति वचनादन्यत्र वेदानामेव प्रतिषेधः । अङ्गानामपीत्यन्ये ॥ २६ ॥

अनु०—सूर्यग्रहण चन्द्रग्रहण के समय, भूकम्प आने पर, आँधी चलने पर, उल्कापात होने पर तथा आग लगने पर सभी वेदों एवं अङ्गों का अध्ययन दूसरे दिन उसी समय तक नहीं करना चाहिए।

टिप्पणी—'सर्वासां विद्यानां' से कुछ लोग सभी वेदों का अर्थ ग्रहण करते हैं और कुछ लोग वेद और वेदाङ्गों से अर्थ लेते हैं।—हरदत्त की व्याख्या ॥ २६ ॥

अभ्रं चापर्तौ सूर्याचन्द्रमसोः परिवेष इन्द्रधनुः प्रतिसूर्यमत्स्यश्च वाते पूतिगन्धे नीहारे च सर्वेष्वेतेषु तावत्कालम् ॥ २७ ॥

अपर्तावभ्रं दृश्यमानं यावत् दृश्यते तावत्कालमनध्यायः । एवं परिवेषादिष्वपि योज्यम् । बृहस्पत्यादिपरिवेषे न दोषः । इन्द्रधनुः प्रसिद्धम् । सूर्यसमीपे तदाकृतिः प्रतिसूर्यः । मत्स्यः पुच्छवज्ज्वाम् । समाहारद्वन्द्वे छान्दसो लिङ्गव्यत्ययः । सर्वेष्वेतेषु वातादिषु च त्रिषु तावत्कालमनध्यायः । वाते घोषवति । पूतिगन्धे दुर्गन्धे । नीहारे हिमान्याम् । वातादिग्रहणं पूर्वोक्तानां श्वगर्दभादीनामुपलक्षणार्थम् । पुनरिह वचनं तावत्कालमिति विधातुम् । अत्रैव श्वगर्दभादिग्रहणे कर्तव्ये पूर्वत्र पाठस्य चिन्त्यं प्रयोजनम् ॥ २७ ॥

अनु०—ऋतु से भिन्न समय में मेघ दिखाई पड़ने पर सूर्य या चन्द्रमा के परिवेष से घिरे होने पर सूर्य के समीप उसकी अनुकृति दिखाई पड़ने पर, पुच्छल तारा उगने पर इन्द्रधनुष होने पर दुर्गन्ध आने या कुहरा छाये रहने पर उतने समय तक सभी विद्याओं का अनध्याय होता है, जब तक ये घटनायें रहती हैं ॥ २७ ॥

मुहूर्तं विरते वाते ॥ २८ ॥

वाते घोषवति विरतेऽपि मुहूर्तमात्रमनध्यायः । द्वे नाडिके मुहूर्तम् ॥२८ ॥

अनु०—तीव्र वायु का बहना बन्द होने के बाद भी एक मुहूर्त तक अनध्याय होता है ॥ २८ ॥

सलावृक्यामेकसृक इति[१]स्वप्नपर्यन्तम् ॥ २९ ॥

[१]'तावत्काल'मित्यस्याऽपवादोऽयम् । सलावृक्येकसृकशब्दौ व्याख्यातौ ॥ २९ ॥

---

१. आप० ध० १. ११. २७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुवाद—भेड़िया का या एक सृगाल का शब्द सुनाई पड़ने पर निद्रा से जगने के बाद तक अनध्याय होता है ॥ २९ ॥

नक्तं चारण्येऽनग्नावहिरन्ये वा ॥ ३० ॥

रात्रावग्निवर्जिते हिरण्यवर्जिते वाऽरण्ये नाधीयीत ॥ ३० ॥

अनुवाद—रात्रि को किसी ऐसे वन में अध्ययन न करे जहाँ अग्नि या स्वर्ण न हो ॥ ३० ॥

अननूक्तं चाऽपत्तौ छन्दसो नाधीयीत ॥ ३१ ॥

उत्सर्जनादूर्ध्वमुपाकरणादर्वागपर्तुः । तत्र छन्दसोऽननूक्तमंशमपूर्वं नाऽधीयीत । ग्रहणाध्ययनमपर्तौ न कर्तव्यम् । यद्यपि[1] तैष्यां पौर्णमास्यां रोहिण्यां वा विरमे' दित्युक्तम् , तथापि कियन्तं कालं तद्विररमणम् ? कस्माद्वाऽध्ययनम् ? इत्यपेक्षायामिदमुच्यते—एतावन्तं कालं ग्रहणाध्ययनं न कर्त्तव्यमिति । धारणाध्ययने नदोषः । तथा छन्दस' इति वचनादङ्गानां ग्रहणाध्ययने न दोषः ॥३१॥

अनुवाद—असमय में (उत्सर्जन और उपाकरण के बीच) छन्द के उस अंश का अध्ययन न करे जिसका अध्ययन पहले न किये हो ।

टिप्पणी—'छन्दसः' उल्लेख होने से वेदाङ्गों का अध्ययन करने में कोई दोष नहीं है ॥ ३१ ॥

प्रदोषे च ॥ ३२ ॥

प्रदोषे चाऽननूक्तमृतामपि नाधीयीत । [2]'मासं प्रदोषे नाधीयीते' त्येतत्तु धारणाध्ययनस्यापि प्रतिषेधार्थम् । अपर आह—यस्यां रात्रौ द्वादशी त्रयोदशी च मिश्रीभवतः, तस्यां प्रदोषे नाधीयीतानूक्तमननूक्तं च, ऋतावपर्तौ च । एष आचार इति ॥ ३२ ॥

अनुवाद—प्रदोष में भी छन्द के किसी नये अंश का अध्ययन न करे ।

टि०—कुछ लोगों के अनुसार जिस रात्रि को द्वादशी, त्रयोदशी मिलती हों उस सन्ध्या को अध्ययन न करे ॥ ३२ ॥

सार्वकालिकमाम्नातम् ॥ ३३ ॥

आम्नातमधीतं तत्सार्वकालिकमपर्तौ प्रदोषे च सर्वस्मिन्कालेऽध्येतव्यम् ३३

अनुवाद—पढ़े हुए विषय को सभी काल में (ऋतु से भिन्न समय में तथा सन्ध्या को भी) अध्ययन करे ।

---

१. आप० ध० १.९.२ २. आप० ध० १. ९. १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी—इसका संबन्ध ३१वें सूत्र से जोड़कर अर्थ करने पर विपरीत अर्थ होगा, अर्थात् अध्ययन न करे ॥ ३३ ॥

यथोक्तमन्यदतः परिषत्सु ॥ ३४ ॥

अत एतस्मादनध्यायप्रकरणोक्तादन्यदनध्यायनिमित्तम्। परिषत्सु मानवादिधर्मशास्त्रेषु यथोक्तं [1]तथा द्रष्टव्यम्। तत्र वसिष्ठः [2]'दिग्दाहपर्वतप्रपातेषूपलरुधिरपांसुवर्षेष्वाकालिक' मिति।

यमः—

[3]'श्लेष्मातकस्य शल्मल्या मधूकस्य तथाप्यधः।
कदाचिदपि नाध्येयं कोविदारकपित्थयोः॥'

सङ्ग्रामोद्यानदेवतासमीपेषु नाधीयीतेति ॥ ३४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायामेकादशी कण्डिका

अनुवाद—(अनध्याय के विषय में) और नियम दूसरे धर्मशास्त्रों से भी ग्रहण कर समझना चाहिए ॥ ३४ ॥

इति चापस्तम्वधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां
प्रथमप्रश्ने तृतीयः पटलः ॥ ३ ॥

---

१. तथा इति नास्ति. क० पु०

२. व. स्मृ १३. ८. दिग्नादपर्वतनादकम्पप्रपातेषु, इति मुद्रितपुस्तकपाठः। निमित्तप्रादुर्भावादारभ्याऽन्येद्युर्यावत् स एव कालः स आकालः। तत्र भवमाकालिकम्।

३. मुद्रितयमस्मृतौवृहद्यमस्मृतौ वा नेदं वचनमुपलभ्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चतुर्थः पटलः

तपः स्वाध्याय इति ब्राह्मणम् ॥ १ ॥

योऽयं नित्यस्वाध्यायस्तत्तपः कृच्छ्रातिकृच्छ्रचान्द्रायणादिलक्षणं तपो यावत्फलं साधयति तावत्साधयतीत्यर्थः ॥ १ ॥

अनु०—नित्य स्वाध्याय तप है, ऐसा ब्राह्मण का कथन है।

टिप्पणी—इसका तात्पर्य यह है कि कृच्छ्र, अतिकृच्छ्र, चान्द्रायण आदि तपों का जो फल होता है, वही फल स्वाध्याय का भी होता है ॥ १ ॥

तत्र श्रूयते[1] स यदि तिष्ठन्नासीनः शयानो वा
स्वाध्यायमधीते तप एव तत्तप्यते तपो हि
स्वाध्याय इति ॥ २ ॥

तत्रैव ब्राह्मणे "स यदि तिष्ठन्नासीन' इत्यापत्कल्पः श्रूयते। तत्र [2]'दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्याय' मित्यादिर्मुख्यः कल्पो[3] ब्राह्मण एवोक्तः। इह पुनरासीनवचनं यथाकथञ्चिदासनार्थम्। सर्वथाऽप्यधीयानस्तप एव तत्तप्यत इति ब्राह्मणार्थः। मनुरप्याह—

[4] आहैव स नखाग्रेभ्यः परमं तप्यते तपः।
यस्स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥' इति।

---

१. तै० आ० २. १२. अत्र सूत्रे ब्राह्मणवाक्यानुपूर्वी योपात्ता सा क्वचित् ब्राह्मणे नोपलभ्यते। किन्तु एवमनुमीयते–तैतिरीयारण्यकद्वितीयप्रपाठकद्वादशानुवाकगतं 'उत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीतैव स्वाध्यायम्'' इत्यंशं 'तप एव तत् तप्यते तपो हि स्वाध्यायः' इति तत्रैव त्रयोदशानुवाकगतमंशं चाऽऽदायैकीकृत्य सूत्रेऽनूदितवान् सूत्रकार इति।

२. तै० आ० २. ११. १ ३. तैत्तिरीयारण्यके स्वाध्यायब्राह्मण इत्यर्थः।

४. मनु० २. १६७ "यदि ह वा अप्यभ्यक्तोऽलंकृतस्सुहितस्सुखे शयने शयानः स्वाध्यायमधीत आहैव स नखाग्रेभ्यस्तप्यते य एवं विद्वान् स्वाध्यायमधीते, तस्मात् स्वाध्यायोऽध्येतव्यः" (मा० शत० ब्रा० ११. ५. ३.) इति माध्यन्दिनशतपथब्राह्मणवाक्यमूलेयं मानवी स्मृतिरिति भाति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रग्वीति स्वैरं दर्शयति ॥ २ ॥

अनुवाद—उसी ब्राह्मण में यह भी कहा गया है कि चाहे वह खड़े होकर स्वाध्याय करे या बैठकर या सोकर, वह तप ही करता है, क्योंकि स्वाध्याय तप ही है।

टि०—यह तैत्तिरीय आरण्यक का वचन है, इसमें किसी भी प्रकार से स्वाध्याय करने को तप कहा गया है। बैठने में भी वह किसी भी प्रकार से बैठकर या किसी भी प्रकार से सोकर स्वाध्याय करे। वह तप के समान फलदायक होता है ॥ २ ॥

एवं कर्तुर्नियमो नाऽपद्यतीवाऽऽदरणीय इत्युक्त्वा कालेऽप्याह—

अथापि वाजसनेयिब्राह्मणम् [१]ब्रह्मयज्ञो ह वा एष यत्स्वाध्यायस्तस्यैते वषट्कारा यत्स्तनयति यद्विद्योतते यदवस्फूर्जति यद्वातो वायति। तस्मात् स्तनयति विद्योतमानेऽवस्फूर्जति वाते वा वायत्यधीयीतैव वषट्काराणामच्छम्बट्कारायेति ॥ ३ ॥

अथापि अपि च स्वाध्यायो नाम य एष ब्रह्मयज्ञः ब्रह्म वेदः तत्साधनो यागः। यथा दर्शपूर्णमासादयः पुरोडाशादिसाधनाः। हवैशब्दौ प्रसिद्धिद्योतयतः। तस्य यज्ञस्यैते वक्ष्यमाणाः स्तनयित्न्वादयो वषट्काराः वषट्कारस्थानीयाः। बहुवचननिर्देशात् [२]वषट्कारानुवषट्कारस्वाहाकारास्सर्वे प्रदानार्था गृह्यन्ते [३]स्तनितं मेघशब्दः। विद्योतनं विद्युद्व्यापारः। अवस्फूर्जनमशनिपातः। तत्र 'अवस्फूर्जथुर्लिङ्ग' मिति दर्शनात्। 'वायती' ति 'ओवैशोषण' इत्यस्य रूपम्। यथा आर्द्रप्रदेशश्शुष्को भवति तथा[४] वातीत्यर्थः। यस्मादेते वषट्काराः तस्मात् स्तननादिष्वनध्यानिमित्तेषु सत्स्वप्यधीयीतैव। न पुनरनध्याय इति नाधीयीत। किमर्थम्? वषट्काराणामेतेषामच्छम्बटकाराय अव्यर्थत्वाय।

---

१. इदानीमुपलभ्यमानमाध्यन्दिनशतपथब्राह्मणपंक्तिरित्थम्-"तस्य वा एतस्य ब्रह्मयज्ञस्य चत्वारो वषट्काराः यद्वातो वाति यद्विद्योतते, यत् स्तनयति यदवस्फूर्जति तस्मादेवं विद्वाते वाति विद्योतमाने स्तनयत्यवस्फूर्जत्यधीयीतैव वषट्काराणामछम्बट्काराय" इति।

२. वषट्कारः सर्वत्र यागादौ हविःप्रक्षेपात् पूर्वं हविःप्रक्षेपार्थमेव पठ्यमानयाज्यायाः अन्ते पठ्यमानः 'वौषट्' इति शब्दः। सोमयागे तत्तद्ग्रहहोमानन्तरं "सोमस्याग्ने वीहि२ वौषट्" इति द्वितीयवारं पठ्यमानोऽनुवषट्कारः। स्वाहाकारस्तु प्रसिद्धः।

३. स्तननं इति. ख० ग० पु०   ४. वायतीत्यर्थः इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यथा एते वषट्कारा व्यर्थास्स्युः। ततश्च[1] यथा होत्रा वषटकृते अध्वर्युर्न जुहुयात् तादृगेव तत्स्यस्त् ॥ ३ ॥

अनु०—वाजसनेयिब्राह्मण में कहा गया है : स्वाध्याय एक प्रकार का दैनिक यज्ञ है, जिसमें ब्रह्म ही यज्ञ का साधन है, जिस प्रकार दर्शपूर्णमास आदि में पुरोडाश साधन होता है। जो मेघगर्जन होती है, जो विद्युत की चमक होती है, जब वज्रपात होता है, वो वही सब स्वाध्याय यज्ञ का वषटकार शब्द है। इस कारण मेघगर्जन होने पर, विद्युत चमकने पर, वज्रपात होने पर तथा आँधी चलने पर भी अध्ययन करे, अन्यथा ये वषट्कार रूप शब्द व्यर्थ हो जायेंगे।

टि०—यहाँ शतपथब्राह्मण ११.५.६.८ का निर्देश किया गया है ॥ ३ ॥

तस्य शाखान्तरे वाक्यसमाप्तिः ॥ ४ ॥

तस्य वाजसनेयिब्राह्मणस्य। शाखान्तरे वाक्यसमाप्तिर्भवति, न [2]तावति पर्यवसानम् ॥ ४ ॥

अनुवाद—उपर्युक्त ब्राह्मण वाक्य का पर्यवसान अन्य साखा में भी उपलब्ध होता है ॥ ४ ॥

तदेव [3]शाखान्तरं पठति—

अथ यदि वा वातो वायात्स्तनयेद्वा विद्योतेत वाऽवस्फूर्जेद्वैकां वर्चमेकं वा यजुरेकं वा सामाऽभिव्याहरेद्भूर्भुवस्सुवस्सत्यं तपः श्रद्धायां जुहोमीति वैतत्। तेनोहैवाऽस्यैतदहस्स्वाध्याय उपात्तो भवति ॥ ५ ॥

अन्ते इतिशब्दोऽध्याहार्यः। वातादिपु सत्सु एकामृचमधीयीत। प्राप्ते प्रदेशे। यजु[4]र्वेदाध्ययन एकं यजुः। साम[5]वेदाध्ययन एकं साम। सर्वेषु वा वेदेषु 'भूर्भुवः सुव' रित्यादिकं यजुरभिव्याहरेत्, न पुनर्यथापूर्वं प्रश्नमात्रम्। तेनैव तावतैवास्याऽध्येतुः तदहः तस्मिन्नहनि स्वाध्याय उपात्तो भवति[6] अधीतो

१. दर्शपूर्णमासादियागेषु सर्वत्र हविःप्रदानसमये "अमुष्मा अनुब्रूहि" इति प्रैषानन्तरं पुरोनुवाक्यामनूच्याऽऽश्राव्य प्रत्याश्राव्य याज्यामुक्त्वा वषट्कृते जुहोति" इति वचनात् वषट्कारानन्तरं होमो विहितः। तत्र वषट्कारानन्तरं होमाकरणे यादृशो दोषस्तादृशस्स्यादित्यर्थः।

२. 'तावतीति० नास्ति ख० पु०

३. किमिदं शाखान्तरमिति न ज्ञायते। ४,५, वेदाध्यायी इति क० पु०

६. स्वीकृतो भवति अधीतो भवतीत्यर्थः, इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवतीति यावत्। केचित्तु 'भूर्भुवः सुव' रित्यादिकं ब्राह्मणभागाध्ययनविषयं मन्यन्ते, न सार्वत्रिकम् ॥ ५ ॥

अनु०—यदि तीव्र वायु चलती हो, मेघगर्जन होता हो, विद्युत की चमक होती हो, या वज्र पात होता हो, तो एक ऋचा का, एक यजुर्मन्त्र का अथवा एक साम का अध्ययन करे अथवा सभी वेदों का अध्ययन करते समय 'भूर्भुवः सुव 'आदि एक यजुर्मन्त्र का अध्ययन करे इस प्रकार उन दिन के स्वाध्याय का अध्ययन पूरा हो जाता है।

टिप्पणी—इस प्रकार उपर्युक्त मेघ गर्जन आदि के समय पूरे प्रश्न भाग का अध्ययन करना आवश्यक नहीं होता। कुछ लोगों के अनुसार केवल भूः भुवः सुवः शब्दों का प्रयोग करने से ही उस दिन का स्वाध्याय पूरा हो जाता है ॥ ५ ॥

कस्मात् पुनर्वाजसनेयिब्राह्मणस्योंदाहृते शाखान्तरे वाक्यसमाप्तिराश्रीयते न पुनर्यथाश्रुतमात्रं गृह्यते ? तत्राह—

एवं सत्यार्यसमयेनाऽविप्रतिषिद्धम् ॥ ६ ॥

एवं सति वाक्यपरिसमाप्तावाश्रीयमाणायामार्यसमयेन आर्याः शिष्टा मन्वादयः तेषां समयो व्यवस्था, तेन अविप्रतिषिद्धं भवति। इतरथा विप्रतिषिद्धं स्यात् ॥ ६ ॥

अनु०—इस प्रकार यदि इस सूत्र को ब्राह्मणवाक्य के साथ सम्बद्ध किया जायगा तो आर्यों के नियम का विरोध नहीं होगा।

टि०—उपर्युक्त सूत्र ५ में व्यक्त नियम से ब्राह्मणग्रन्थ के साथ सामंजस्य बना रहता है तथा ब्राह्मण का भी विरोध नहीं होता तथा दूसरी ओर धर्मशास्त्रकारों के अनध्यायविषयक नियमों का भी विरोध नहीं हैोता ॥ ६ ॥

कथम् ?

अध्यायानध्यायं ह्युपदिशन्ति। तदनर्थकं स्याद्वाजसनेयिब्रा-
ह्मणं चेदवेक्षेत ॥ ७ ॥

आर्या हि अध्यायमनध्यायं चोपदिशन्ति। तदुपदेशनमनर्थकं स्यात् यदि वाजसनेयिब्राह्मणं यथाश्रुतमवेक्षेताऽध्येता ॥ ७ ॥

अनु०—क्योंकि आर्य अर्थात् धर्म जानने वाले शिष्ट लोग वेद के स्वाध्याय तथा अनाध्याय दोनों का उपदेश देते हैं। यदि वाजसनेयिब्राह्मण के उपर्युक्त अंश मात्र पर ध्यान दिया जायगा तो शिष्टों का नियम व्यर्थ हो जायगा ॥ ७ ॥

ननु-अनर्थकमेवेदमस्तु, श्रुतिविरोधात्। तत्राह—

आर्यसमयो ह्यगृह्यमानकारणः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽयमध्यायानध्यायविषय आर्यसमयः न तत्र किञ्चित्कारणं गृह्यते। यथा [1]'वैसर्जनहोमीयं वासोऽध्वर्यवे ददाती' त्यत्रागृह्यमाणकारणश्चार्यसमयः श्रुत्यनुमानद्वारेण प्रमाणम्। अतो वाक्यपरिसमाप्तिरेव युक्ता। एवं हि वाजसनेयिब्राह्मणस्यापि नात्यन्तबाधः। अनध्यायोपदेशस्यापि प्रभूताध्ययनविषयतयाऽर्थवत्त्वमिति। सूत्रे 'अगृह्यमानकारण' इति णत्वाभावश्छान्दसः ॥८॥

अनु०—आर्यों के स्वाध्याय तथा अनध्याय विषयक नियमों का कोई कारण नहीं दिखाई पड़ता।

टि०—चूंकि आर्यों के नियम का कोई लौकिक कारण नहीं है अतः उसका कारण धार्मिक होना चाहिए और वह श्रुति पर ही आधारित है ॥ ८ ॥

का पुनरसौ स्मृतिः? या ब्रह्मयज्ञेऽप्यनध्यायमुपदिशति। मानवे तावद्विपर्ययः श्रूयते—

[2]'नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम्।' इति।

सामान्येनानध्यायोपदेशस्तु ब्रह्मयज्ञादन्यत्र चरितार्थः। तस्मात्तादृशी स्मृतिर्मृग्या। एवं तर्ह्यग्निहोत्रादिष्वपि मन्त्राणामनध्यायः प्राप्नोति। नेत्याह—

विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मन्त्राणाम् ॥ ९ ॥

विद्या वेदाध्ययनम्। तां प्रत्यनध्यायः श्रूयते। न पुनर्मन्त्राणां कर्मयोगे। हेतुः परिभाषायामुक्तो[3] ऽर्थान्तरत्वादिति। अर्थान्तरं हि कर्मणि प्रयोगो मन्त्राणाम् [4]न पुनर्ग्रहणाध्ययनम्। पारायणाध्ययनमध्येऽनध्यायागमो भवति वा न वेति चिन्त्यम्। एवं श्रीरुद्रादिजपेऽपि ॥ ९ ॥

अनु०—वेद के अनध्याय के विषय में आर्यों ने जो नियम दिये हैं वे विद्याग्रहण के लिए ही हैं न कि वेद के मन्त्रों का यज्ञ के समय प्रयोग के लिए ॥ ९ ॥

---

१. सोमयागे अग्नीषोमीयपश्वनुष्ठानकाले तदर्थं शालामुखीयादग्नेः कञ्चिदंशमुद्धृत्य तस्य उत्तरवेदिस्थाहवनीयकुण्डे स्थापनार्थं अध्वर्यौ गच्छति तं यजमानस्तत्पत्नीपुत्रादयोऽनुगच्छेयुः। गच्छतस्तानहतेन दीर्घतमेन वस्त्रेणोपर्याच्छाद्य सर्वेष्वाहवनीयदेशं प्राप्तेषु तत्र तमग्निं प्रतिष्ठाप्य, आच्छादनवस्त्रान्तं स्रुग्दण्डे बध्वाऽऽज्येन जुहोति। ते वैसर्जनहोमा उच्यन्ते। तच्च वासः अध्वर्यवे दद्यात् इति प्रकृतवाक्यार्थः। स्मृतेरस्याः लोभादिमूलकत्वमापाद्यातएवाप्रामाण्यमुक्तं शबरस्वामिना। कुमारस्वामिना तु एवं सति सर्वत्राऽनाश्वासप्रसङ्गमापाद्य मन्वादिस्मृतिवत् प्रामाण्यमेवाङ्गीकृतम्।

२. म० स्मृ० २. १०६ ब्रह्मसत्रं सततप्रवृत्तं सत्रम्, यथा सहस्रसंवत्सरादिकं सत्रं न न कदाचिच्छिद्यते तद्वदिदं नित्याध्ययनमित्यर्थः।

३. आप० प० १. ४०   ४. अनुष्ठेयार्थप्रकाशकतया इत्यधिकं ख० ग० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कथं पुनरार्यसमयः प्रमाणम्? यावता न तेषामतीन्द्रियेऽर्थे ज्ञानं सम्भवति। तत्राह—

ब्राह्मणोक्ता विधयस्तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयन्ते ॥ १० ॥

विधीयन्त इति विधयः कर्माणि। ते सर्वे स्मार्ता अपि ब्राह्मणेष्वेवोक्ताः नन्विदानीं ब्राह्मणानि नोपलभ्यन्ते। सत्यम्; तेषामुत्सन्नाः पाठाः, अध्येतृदौर्बल्यात्। कथं तर्हि तेषामस्तित्वम्? प्रयोगादनुमीयन्ते। प्रयोगः स्मृतिनिबन्धनमनुष्ठानं च। तस्माद्ब्राह्मणान्यनुमीयन्ते मन्वादिभिरुपलब्धानीति [1]कथमन्यथा स्मरेयुरनुतिष्ठेयुर्वा। सम्भवति च तेषां वेदसंयोगः ॥ १० ॥

अनुवाद—सभी विधियां पहले वदों में उपदिष्ट थीं, किन्तु अब ब्राह्मणों के न उपलब्ध होने पर प्रयोग से ही उनका अनुमान किया जाता है।

टि०—यह इस प्रश्न का उत्तर है कि स्मृतिकारों के नियमों का आधार क्या है। उत्तर में सभी स्मार्त नियमों का आधार ब्राह्मणग्रन्थ माने गये हैं, जिनके अधिकांश अध्ययन करने वालों की दुर्बलता के कारण उपलब्ध नहीं है और अब प्रयोग के आधार पर केवल अनुमान के विषय हैं॥ १० ॥

अथ प्रसङ्गादपस्मृतिरुच्यते—

यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति ॥ ११ ॥

यत्र [2]पितृष्वसृसुतामातुलसुतापरिणयनादौ। प्रीत्युपलब्धितः प्रवृत्तिर्न तत्रोत्सन्नपाठं शास्त्रमनुमीयते, प्रीतेरेव प्रवृतिहेतोः सम्भवात् ॥ ११ ॥

अनु०—किन्तु जहां। स्मृति का या आचार का पालन करने से प्रीति प्राप्त होने से प्रवृत्ति होती हो तो वहां शास्त्र का अनुमान नहीं किया जाता है।

टि०—क्योंकि प्रीति ही प्रवृत्ति का हेतु होती है॥ ११ ॥

ततश्च—

तदनुवर्तमानो नरकाय राध्यति ॥ १२ ॥

तद्विधानमनुतिष्ठन्नरकायैव राध्यति कल्पते॥ १२ ॥

अन०—इस प्रकार की प्रवृत्ति का अनुसरण करने वाला नरक में ही गिरता है॥ १२ ॥

अथ ब्राह्मणोक्ता विधयः ॥ १३ ॥

एवं स्मृत्याचारप्राप्तानां श्रुतिमूलत्वमुक्तम्।[3] अथ प्रत्यक्षब्राह्मणोक्ता

१. कथमपरथा इति ख० पु० २. 'पितृष्वसृसुता' इति नास्ति ख० ग० पु०
३. अथेदानीं इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव केचिद्विधयो व्याख्यायन्ते तेषामपि स्मार्तेष्वनुप्रवेशार्थम्। तेन तदतिक्रमे स्मार्तातिक्रमनिमित्तमेव प्रायश्चित्तं भवति ॥ १३ ॥

अनु०—अत्र ब्राह्मण ग्रन्थों में उपदिष्ट विधियों का निर्देश किया जाता है ॥१३॥

तेषां [1]महायज्ञा महासत्राणीति च संस्तुतिः ॥ १४ ॥

तेषां वक्ष्यमाणानां महायज्ञा इति संस्तुतिः स्वाध्यायब्राह्मणे। महासत्राणीति च संस्तुतिर्भवति बृहदारण्यकादौ। संस्तुतिग्रहणेन संस्तुतिमात्रमिदं न नामधेयं [2]धर्मातिदेशार्थमिति दर्शयति। तेन महायज्ञेषु सोमयागेषु ये धर्माः 'न ज्येष्ठं भ्रातरमतीत्य सोमेन यष्टव्य' मित्यादयः, ये च महासत्रस्य गवामयनस्य धर्मा[3] इष्टप्रथमयज्ञानामधिकार' इत्यादयः उभयेऽपि ते वक्ष्यमाणेषु पञ्चमहायज्ञेषु न भवन्ति ॥ १४ ॥

अनु०—आगे जिन यज्ञों का वर्णन किया जायगा उन्हें स्तुति के लिए महायज्ञ या महासत्र कहा जाता है।

टि०—संस्तुति के लिए उन्हें महायज्ञ कहा जाता है, इससे यह तात्पर्य है कि वस्तुतः महायज्ञ उनका नाम नहीं है अपितु उनकी प्रशंसा के लिए ही इस नाम का उनके लिए प्रयोग किया जाता है ॥ १४ ॥

के पुनस्ते ? तानाह

[4]अहरहर्भूतबलिर्मनुष्येभ्यो यथाशक्ति दानम ॥ १५ ॥

---

१. पञ्चैव महायज्ञाः तान्येव महासत्राणि (श० ब्रा० ११. ५. ६. १) इति शतपथे।

२. कुण्डपायिनामयनाख्ये संवत्सरसाध्ये सत्रविशेषे "मासमग्निहोत्रं जुहोतीति" श्रुतोग्निहोत्रशब्दस्तत्रत्यस्य कर्मविशेषस्य गौण्या वृत्त्या नामधेयं सन् प्रसिद्धाग्निहोत्रात् धर्मातिदेशकः इत्युक्तं पूर्वमीमांसायां सप्तमतृतीये। एवं च क्वचित् नामत्वेनाभिधावृत्त्या प्रयुज्यमानस्य शब्दस्य प्रकरणान्तरेऽन्यत्र कर्मनामतया यदि श्रवणं, तदा न तत्र कर्मान्तरेऽपि तस्य शक्तिरङ्गीक्रियतेऽनेकार्थतादोषभिया। किन्तु प्रसिद्धताहशकर्मनिष्ठगुणसमानगुणवत्वरूपां गौणीं वृत्तिमाश्रित्य तद्बलात् तदीयधर्मातिदेशक इति स्थितम्। प्रकृते तु न तथा। किन्तु स्तुतिमात्रमिति।

३. इष्टप्रथमयज्ञैर्यष्टव्यम् इति, ख० पु० "आहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशास्सत्रमासीरन्" इति सत्रेऽधिकारिनियमः। प्रथमयज्ञशब्देन सोमयाग उच्यतेऽग्निष्टोमसंस्थाकः। पूर्वं कृताधानाः अनुष्ठिताग्निष्टोमसंस्थाकसोमयागाः द्वादशाहादिषु सत्राख्येषु ज्योतिष्टोमविकृतिभूतेषु सोमयागेष्वधिकारिणः इति वाक्यार्थः। ताहशानां नियमानां तत्रापेक्षा। अधीतवेदस्य सर्वस्याऽप्यत्राधिकार इति भावः।

४. "सूत्राणीमानि–शतपथब्राह्मणस्य काञ्चन प्रतिरूपतामनुभवन्ति" इयं हि शातपथी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैश्वदेवे वक्ष्यमाणेन बलिहरणप्रकारेण भूतेभ्योऽहरहर्भूतबलिर्देयः, एष भूतयज्ञः। मनुष्येभ्यश्च यथाशक्ति दानं कर्तव्यम्। एष मनुष्ययज्ञः ॥ १५ ॥

अनु०—इन महायज्ञों के अन्तर्गत प्रतिदिन प्राणियों के लिए बलि अर्पित करना तथा मनुष्यों को यथाशक्ति दान देना सम्मिलित हैं।

टि०—भूतों अर्थात् सात प्रकार के प्राणियों को बलि अर्पित करना भूतयज्ञ हुआ तथा मनुष्यों को यथाशक्ति उन्नादि का दान करना मनुष्ययज्ञ कहलाता है ॥ १५ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वादशी कण्डिका

देवेभ्यः स्वाहाकार आ काष्ठात् पितृभ्यः स्वाधाकार ओद-
पात्रात् स्वाध्याय इति ॥ १ ॥

देवेभ्यः स्वाहाकारेण प्रदानम् आकाष्ठात् अशनीयाभावे काष्ठमपि तावद्देयम्। वैश्वदेवोक्तप्रकारेणैवैष देवयज्ञः। केचिद्वैश्वदेवाहुतीभ्यः पृथग्भूतामिमामाहुतिं मन्यन्ते। देवेभ्यः स्वाहे'ति च मन्त्रमिच्छन्ति। 'देवयज्ञेन यक्ष्य इति सङ्कल्पमिच्छन्ति। वयं तु न तथेति' गृह्य एवाऽवोचाम। केचिदाहुः—'आकाष्ठा' दिति वचनादशनीयाभावेन भोजनलोपेऽपि यथाकथञ्चित् वैश्वदेवं कर्तव्यम्, पुरुषसंस्कारत्वादिति।

अपरे तु—अशनीयसंस्कार इति वदन्तो भोजनलोपे वैश्वदेवं न कर्तव्यमिति स्थिताः।

पितृभ्यः स्वधाकारेण प्रदानम् ओदपात्रात् अन्नाद्यभावे उदपात्रमपि स्वधाकारेण तावद्देयम्। पात्रग्रहणात् सह पात्रेण देयम्। एष पितृयज्ञः। स्वाध्यायः

पंक्तिः भूतयज्ञो मनुष्ययज्ञः पितृयज्ञो ब्रह्मयज्ञः इति। अहरहर्भूतेभ्यो बलिं हरेत्। तथैतं भूतयज्ञं समाप्नोति, अहरहर्दद्यादोदपात्रात्त् तथैतं मनुष्ययज्ञं समाप्नोति, अहरहस्स्वधा कुर्यादोदपात्रात् तथैतं पितृयज्ञं समाप्नोति, अहरहस्स्वाहाकुर्यादाकाष्ठात्तथैनं देवयज्ञं समाप्नोति। अथ ब्रह्मयज्ञः। स्वाध्ययोवै ब्रह्मयज्ञः इति।

१. आपस्तम्बगृह्यसूत्रस्यानाकुलातात्पर्यदर्शनसहितस्य चौखम्बामुद्रणालयमुद्रितस्य पुस्तकस्य १०४ पृष्ठे द्रष्टव्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तस्य विधि' रित्यारभ्योक्तो नित्यस्वाध्वायः। स तु ब्रह्मयज्ञः। इतिः समाप्तौ। इत्येते महायज्ञा इति। न चायमुपदेशक्रमोऽनुष्ठान उपयुज्यते। अनुष्ठानं तु—[1]ब्रह्मयज्ञो, देवयज्ञः, पितृयज्ञो, भूतयज्ञो, मनुष्ययज्ञ इति ॥ १ ॥

अनुवाद—देवों के लिए स्वाहा शब्द के साथ काठ तक की आहुति दी जाती है, पितरों के लिए स्वधा शब्द के साथ जल तक की अंजलि अर्पित की जाती है, और स्वाध्याय ब्रह्मयज्ञ होता है।

टिप्पणी—आकाष्ठात् का अर्थ है कि अन्न भी हो तो काठ तक की आहुति देवों के लिए दी जाती है। इसका अर्थ यह भी लिया जाता है कि जिस किसी तरह वैश्वदेव कर्म करना चाहिए। कुछ अन्य धर्मज्ञों के अनुसार भोजन का अभाव होने पर वैश्वदेव नहीं करना चाहिए। पितरों के लिए अन्न आदि के अभाव में जल भी दिया जा सकता है। यह उदक पात्र में दिया जाना चाहिए। यह पितृयज्ञ है। स्वाध्याय ब्रह्मयज्ञ होता है, ये महायज्ञ होते हैं ॥ १ ॥

पूजां प्रसङ्गादाह—

पूजा वर्णज्यायसां कार्या ॥ २ ॥

वर्णतो[2] ये ज्यायांसः प्रशस्ततरा भवन्ति तेषामवरेण वर्णेन कार्या पूजा अध्वन्यनुगमनादिका उत्सवादिषु च गन्धलेपादिका ॥ २ ॥

अनु०—जो लोग वर्ण की दृष्टि से श्रेष्ठ हैं उनके प्रति आदर-पूजा का भाव रखना चाहिए ॥ २ ॥

वृद्धतराणां च ॥ ३ ॥

सजातीनामपि पूजा कार्या। तरपो निर्देशात्[3] विद्यावयःकर्मभिर्वृद्धानां ग्रहणम्। हीनानामपीत्येके। तथा च मनुः—

[4]'शूद्रोऽपि दशमीं गत' इति ॥ ३ ॥

अनु०—अपने ही वर्ण के विद्या तथा अवस्था में श्रेष्ठ व्यक्तियों का सम्मान करना चाहिए।

टिप्पणी—कुछ लोग अपने से हीन वर्ण के किन्तु विद्या तथा अवस्था में श्रेष्ठ व्यक्तियों के आदर का नियम स्वीकार करते हैं ॥ ३ ॥

---

१. शिष्टाचारोऽपि ब्रह्मयज्ञो देवयज्ञः पितृयज्ञो. भूतयज्ञो, मनुष्ययज्ञ, इत्येवम्। न तु ब्राह्मणोक्तेनैव क्रमेणानुष्ठानम्। च० पुस्तके देवयज्ञो, भूतयज्ञ, इति पाठक्रमः।

२. अत्र प्रथमान्तस्सर्वोऽप्येकवचनान्ततया पठ्यते क० पु०

३. वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी। एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ इति मनूक्तैर्विद्यादिभिर्वृद्धानामित्यर्थः ॥

४. म० स्मृ० २. १३७. दशमीं गतः नवत्यधिकां अवस्थां गत इत्यर्थः। वर्षाणां शतस्य दशधा विभागे दशम्यवस्था नवत्यधिका भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजा कार्येत्युक्तम्। तद्विरोधी हर्षो वर्ज्य इत्याह—

हृष्टो दर्पति दृप्तो धर्ममतिक्रामति धर्मातिक्रमे खलु पुनर्नरकः ॥ ४ ॥

अभिमतलाभादिनिमित्तश्चित्तविकारो हर्षः। तद्युक्तो हृष्टः। स दर्पति दृप्यति। दर्पो गर्वोऽभिमानः। दृप्तो धर्ममतिक्रामति, पूज्यपूजनादिकं प्रति स्तब्धत्वात्। खलुपुनश्शब्दौ वाक्यालङ्कारे। धर्मातिक्रमे खलु पुनर्नरको भवति निरयं प्रतिपद्यते। तस्माद्धर्मातिक्रममूलभूतो हर्षो न कर्तव्यः। यद्यपि भूतदाहीयेषु [1]दोषेषु वर्जनीयेषु हर्षोऽपि, [2]वक्ष्यते। तथापीह विशेषेण हर्षस्य वर्जनार्थोऽयमारम्भः। योगाङ्गात्वाद्वक्ष्यमाणस्य ॥ ४ ॥

अनु०—अभीष्ट वस्तु की उपलब्धि से हर्षयुक्त व्यक्ति दर्पान्वित हो जाता है और धर्म का उल्लंघन करता है। धर्म का उल्लंघन करने पर वह निश्चय ही नरक प्राप्त करता है ॥ ४ ॥

न समावृत्ते समादेशो विद्यते ॥ ५ ॥

समावृत्तं शिष्यं प्रति आचार्येण समादेशो न देयः–इदं त्वया कर्तव्यमिति। यथा असमावृत्तदशायामाज्ञा दीयते–उदकुम्भमाहरेत्यादि, नैवमिदानीम्। स्वेच्छया करणे न प्रतिषेध्यम् ॥ ५ ॥

अनु०—समावर्तन संस्कार के बाद शिष्य को आचार्य उपदेश न देवे।

टि०—तात्पर्य यह है कि गुरु शिष्य का समावर्तन हो जाने के बाद उस प्रकार आदेश न दे जिस प्रकार वह असमावृत अवस्था में दे देता था ॥ ५ ॥

ओङ्कारस्स्वर्गद्वारं तस्माद्ब्रह्माऽध्येष्यमाण एतदादि प्रतिपद्येत ॥ ६ ॥

ओङ्कारः प्रणवः स्वर्गस्य द्वारमिव। यथा द्वारेण गृहाभ्यन्तरं प्राप्यते तथाऽनेन स्वर्गः। तस्मात् ब्रह्म वेदं स्वर्गसाधनमध्येष्यमाण एतदादि अनाम्नातमप्योङ्कारमादौ कृत्वा प्रतिपद्येत उपक्रमेताऽध्येतुम् ॥ ६ ॥

अनु०—ओंकार स्वर्ग का द्वार है, अतः वेद का अध्ययन आरम्भ करने के लिए इस ओंकार शब्द से ही आरम्भ करना चाहिए ॥ ६ ॥

विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म ॥ ७ ॥

अध्ययनेऽनुपयुक्ता कथा विकथा। तां चान्यां कृत्वा एतदादि प्रतिपद्येत। एवं सति ब्रह्म वेदः लौकिक्या वाचा व्यावर्तते तया मिश्रितं न भवति ॥ ७ ॥

अनु०—अध्ययन के समय किसी अन्य असंम्बद्ध बात को कहने के बाद फिर ओम् शब्द का उच्चारण करके ही अध्ययन करना चाहिये। इससे वेद लौकिक वाणी के साथ मिश्रित नहीं होता, अलग बना रहता है ॥ ७ ॥

---

१. दोषेषु वर्जनीयेषु इति नास्ति ख० पु० २. आप० ध० १. २३. ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनरप्योङ्कारमेव स्तौति—

यज्ञेषु चैतदादयः प्रसवाः ॥ ८ ॥

यज्ञेषु दर्शपूर्णमासादिषु एतदादयः ओङ्कारादयः प्रसवा अनुज्ञावाक्यानि भवन्ति ब्रह्मादीनाम्—ॐ प्रणय, ॐ निर्वप, ॐ [1]स्तुध्वमिति ॥ ८ ॥

अनु०—यज्ञ में अनुज्ञा वाक्यों के आरम्भ में 'ओम्' शब्द का प्रयोग किया जाता है ॥ ८ ॥

लोके च भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथा पुण्याहं स्वस्त्यृद्धिमिति ॥ ९ ॥

यथा यज्ञेष्वोङ्कारादयः प्रसवाः, लोके च भूतिकर्मसु पाणिग्रहणादिषु एतदादीन्येव वाक्यानि स्युः । तान्युदाहरति—यथेति । पुण्याहवाचने ॐ कर्मणः पुण्याहं भवन्तो ब्रुवन्त्वि' ति वाचयिता वदति । [2]ॐ पुण्याहं कर्मणोऽस्तु' इति प्रतिवक्तारः । [3]ॐ कर्मणे स्वस्ति भवन्तो ब्रुवन्तु' इति वाचयिता । [3]ॐ कर्मणे स्वस्ति' इतीतरे । [4] ॐ कर्मण ऋद्धिं भवन्तो ब्रुवन्तु'' इति वाचयिता । 'ॐ कर्मर्ध्यता'मितीतरे । तस्मादेवं प्रशस्त ॐकार इति ॥ ९ ॥

अनु०—लौकिक कार्यों में भी पुण्य कर्मों के करने के पहले ओम् का प्रयोग होवे, यथा 'ओम् पुण्याहम्' 'ओम् स्वस्ति ओम् ऋद्धिम्' । आदि वाक्यों में ।

टि०—भूतिकर्म से उन कर्मों से तात्पर्य है जो सुख तथा कल्याण के लिए किये जाते हैं, यथा पाणिग्रहण आदि संस्कार ॥ ९ ॥

नाऽसमयेन कृच्छ्रं कुर्वीत त्रिःश्रावणं त्रिस्सहवचनमिति परिहाप्य ॥ १० ॥

समयः शुश्रूषा, तेन विना कृच्छ्रं दुःखं दुरवधारणं अपूर्वं ग्रन्थं न कुर्वीत । क्रियासामान्यवचनः करोतिरध्ययनेऽध्यापने च वर्तते । समयेन विना शिष्यो ऽपि कृच्छ्रं ग्रन्थं नाऽधीयीत । आचार्योऽपि नाध्यापयेत् । तथा च मनुः—

[5]"धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
न तत्र विद्या वप्तव्या शुभं बीजमिवोषरे' ॥ इति ।

---

१. सोमयागे उद्गातृप्रस्तोतृप्रतिहर्तृख्यान् छन्दोगान् प्रति गुणिनिष्ठगुणाभिधानरूपस्तोत्रारम्भार्थमध्वर्युणाऽनुज्ञादानमिदम् ।

२. ॐ पुण्याहं इति क० पु० ३. ॐ कर्मणे स्वस्ति इति वाचयिता इति क० पु०

४. ॐ कर्मण ऋद्धिं इति क० पु० ५. म० स्मृ० २. ११२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किमविशेषेण ? नेत्याह—त्रिःश्रावणं त्रिस्सहवचनमिति परिहाप्य वर्जयित्वा। त्रिःश्रावणमात्रे त्रिस्सहवचनमात्रे चान्यतरापेक्षया क्रियमाणे शुश्रूषा नाऽपेक्ष्या। ततोऽधिके सर्वत्रापेक्ष्येति ॥ १० ॥

अनु०—समय अर्थात् शुश्रूषा के बिना किसी अपठित कठिन ग्रन्थ का अध्ययन न करे, और अध्यापन भी न करे। त्रिश्रावण तथा त्रिस्सहवचन नाम के पाठ इसके अपवाद हैं, उनका अध्ययन तथा अध्यापन बिना समय के किया जा सकता है ॥ १० ॥

अविचिकित्सा यावद्ब्रह्म निगन्तव्यमिति हारीतः ॥ ११ ॥

विचिकित्सा संशयः। तदभावोऽविचिकित्सा सा यावदुत्पद्यते तावद्ब्रह्म निगन्तव्यं नियमपूर्वमधिगन्तव्यमिति हारीतः आचार्यो मन्यते। अत्र पक्षे त्रिःश्रावणत्रिस्सहवचनयोरपि शुश्रूषितव्यम्। ब्रह्मग्रहणादङ्गेषु नायं विधिः ॥ ११ ॥

अनु०—हारीत का मत है कि सम्पूर्ण वेद का अध्ययन व्रतपूर्वक करना चाहिए, जब तक कि उसके विषय में किसी प्रकार की जिज्ञासा बनी हुई है।

टि०—हारीत के इस मत के अनुसार ऊपर त्रिश्रावण तथा त्रिस्सहवचन के विषय में जो अपवाद का नियम बताया गया था वह लागू नहीं होगा, अपितु इनके विषय में भी व्रत आवश्यक हो जायगा। चूंकी इस सूत्र में ब्रह्म का ही प्रयोग है, अतः वेदांग के विषय में समय के नियम को नहीं समझना चाहिए ॥ ११ ॥

न बहिर्वेदे गतिर्विद्यते ॥ १२ ॥

वेदाद्बहिर्भूते काव्यनाटकादिश्रवणे। गतिः शुश्रूषा न विद्यते यद्यपि तदुपयुक्तं वेदार्थज्ञाने ॥ १२ ॥

अनु०—वेद से भिन्न ग्रन्थों के विषय में शुश्रूषा का नियम नहीं होता।

टि०—वेद से भिन्न ग्रन्थों के अन्यर्गत काव्य, नाटक आदि बताये गये हैं ॥१२॥

समादिष्टमध्यापयन्तं यावदध्ययनमुपसंगृह्णीयात् ॥ १३ ॥

य आचार्येण समादिष्टोऽयध्यापयति तं यावदध्ययनं यावदसावध्यापयते तावदुपसंगृह्णीयात्। तथा [1]'समादिष्टेऽध्यापयती' त्यत्राऽऽचार्यदारवद्वृत्तिरुक्ता। तत्र[2]चा'न्यत्रोपसङ्ग्रहणादि'ति वर्तते [3]अत उपसङ्ग्रहणार्थोऽयामारम्भः॥१३॥

---

१. आप० ध० १. ७. २८   २. आप० ध० १. ७. २७

३. ततः इति. क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—जो व्यक्ति गुरु के आदेश से अध्यापन कर रहा हो, उसके चरण का उस समय तक उपसंग्रहण करना चाहिए, जब तक वह अध्यापन करे ॥ १३ ॥

नित्यमर्हन्तमित्येके ॥ १४ ॥

स चेत्समादिष्टोऽर्हन् भवति[1] विद्यासदाचारादिना। ततो नित्यमुपसंगृह्णीयात्, इत्येके मन्यन्ते। स्वमतं तु यावदध्ययनमिति ॥ १४ ॥

अनु०—कुछ धर्मज्ञों का मत है कि यदि वह व्यक्ति योग्य हो तो सदैव उसके चरण का उपसंग्रहण करे।

टि०—आपस्तम्ब का मत यही है कि उस व्यक्ति के चरण का उपसंग्रहण उसी समय तक करना चाहिए जब तक वह अध्यापन करे ॥ १४ ॥

न गतिर्विद्यते ॥ १५ ॥

यद्यप्यसावर्हन् भवति तथाप्याचार्ये या गतिः शुश्रूषा सा तस्मिन्न कर्तव्या ॥ १५ ॥

अनु०—वह व्यक्ति विद्वान् भी हो तो भी उसके प्रति शुश्रूषा नहीं होती ॥१५॥

वृद्धानां तु ॥ १६ ॥

तुश्चार्थे। वृद्धानां चान्तेवासिनां न गतिर्विद्यते। पूर्ववयसाऽन्तेवासिना अवरवया आचार्यो न शुश्रूषितव्यः। अध्ययनादूर्ध्वमित्येके। अध्ययनकालेऽपीत्यन्ये। केचिदवरवयसाऽप्यन्तेवासिना न वार्धके गतिः कर्तव्येत्याहुः ॥१६॥

अनु०—अधिक अवस्था वाले अन्तेवासियों के लिए भी शुश्रूषा का नियम नहीं होता।

टि०—इसका तात्पर्य यह है कि यदि अन्तेवासी आचार्य से अधिक आयु का हो तो आचार्य की शुश्रूषा न करे। कुछ धर्मज्ञों के अनुसार यह नियम अध्ययन के बाद ही होता है किन्तु कुछ आचार्य अध्ययन काल में भी ऐसा नियम मानते हैं। कुछ इसका यह अर्थ लगाते हैं कि आचार्य से अल्प आयु का अन्तेवासी भी वृद्धावस्था में आचार्य के प्रति शुश्रूषा न करे ॥ १६ ॥

ब्रह्मणि मिथो विनियोगे न गतिर्विद्यते ॥ १७ ॥

ब्रह्मणि वेदविषये यदा मिथो विनियोगः क्रियते बह्वृचो यजुर्वेदिनः सकाशाद्यजुर्वेदमधीते सोऽपि तस्मादृग्वेदम्। तदाऽपि परस्परं शुश्रूषा न कर्तव्या ॥ १७ ॥

अनु०—यदि दो व्यक्ति परस्पर एक दूसरे को वेद का अध्यापन करते हों तो उनमें परस्पर शुश्रूषा का नियम नहीं होता ॥ १७ ॥

---

१. विद्यासदाचारादिना इति नास्ति. ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र हेतुं स्वयमेवाह—

ब्रह्म वर्धत इत्युपदिशन्ति ॥ १८ ॥

द्वयोरपि ब्रह्म वर्धते । सैव ब्रह्मवृद्धिः शुश्रूषेत्युपदिशन्त्याचार्याः ॥ १८ ॥

अनु०—क्योंकि माना जाता है कि दोनों का वेदज्ञान बढ़ता है और उन दोनों के लिए यही पारस्परिक शुश्रूषा है ॥ १८ ॥

निवेशे वृत्ते संवत्सरे संवत्सरे द्वौ द्वौ मासौ समाहित आचार्यकुले वसे-

द्भूयः श्रुतिमिच्छन्निति श्वेतकेतुः ॥ १९ ॥

भूयःश्रवणमिच्छन् पुरुषो निवेशे दारकर्मणि वृत्तेऽपि प्रतिसंवत्सरं द्वौ द्वौ मासौ समाहितो भूत्वाऽचार्यकुले वसेदिति श्वेतकेतुराचार्यो मन्यते ॥ १९ ॥

अनु०—श्वेतकेतु का कथन है कि गृहस्थाश्रम रहते हुए भी जो और अधिक अध्ययन करना चाहता है वह प्रत्येक वर्ष में दो मास के लिये समाहित मन से आचार्य के कुल में निवास करे ॥ १९ ॥

अत्र हेतुत्वेन श्वेतकेतोरेव शिष्यान्प्रति वचनम्—

एतेन ह्यहं योगेन भूयः पूर्वस्मात्कालाच्छ्रुतमकुर्वीति ॥ २० ॥

एतेनानन्तरोक्तेन योगेनोपायेन अहं पूर्वस्मात् ब्रह्मचर्यकालात् भूयः [1]बहुतरं श्रुतमकुर्वीति कृतवानस्मि । अतो यूयमपि तथा कुरुध्वमिति ॥ २० ॥

अनु०—श्वेतकेतु ने (अपने शिष्यों से) कहा है–'इस विधि से मैंने पहले (ब्रह्मचर्य काल) की अपेक्षा अधिक वेद का अध्ययन किया है ॥ २० ॥

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ २१ ॥

तदिदं श्वेतकेतोर्वचनं श्रुत्यादिभिः शास्त्रैर्विरुद्धम् ॥ २१ ॥

अनु०—श्वेतकेतु का यह वचन शास्त्र के विपरीत है ॥ २१ ॥

कथमित्यत आह—

निवेशे हि वृत्ते नैयमिकानि श्रूयन्ते ॥ २२ ॥

हिशब्दो हेतौ । यस्मात् निवेशे वृत्ते नैयमिकानि नियमेन कर्तव्यानि नित्यानि कर्माणि श्रूयन्ते ॥ २२ ॥

अनु०—क्योंकि गृहस्थाश्रम में प्रवेश करने के बाद वेद के अनुसार दैनिक कर्मों के सम्पादन का विधान किया गया है ॥ २२ ॥

इति त्रयोदशी कण्डिका

---

१. अधिकतरं इति ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कानि पुस्तकानि ?

[1]'अग्निहोत्रमतिथयो यच्चान्यदेवं युक्तम् ॥ १ ॥

अग्निहोत्रम्, अतिथयः अतिथिपूजा ।

[2]"यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।

एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः ॥' इति ।

यच्चान्यदेवं युक्तं एवंविधं श्राद्धसन्ध्योपासनादि । एवमेतैः कर्मभिरहरहराक्रान्तस्य न [3]शरीरकण्डूयनेष्वप्यवसरो भवति । स कथं द्वौद्वौ मासौ गुरुकुले वसेदिति ॥ १ ॥

अनु०—अग्निहोत्र, अतिथिपूजा, तथा अन्य जो कुछ भी उचित कर्तव्य (श्राद्ध सन्ध्योपासनादि) हैं (वे गृहस्थाश्रम में करने होते हैं) ॥ १ ॥

अध्ययनार्थेन यं चोदयेन्न चैनं प्रत्याचक्षीत ॥ २ ॥

यमाचार्यं माणवकोऽध्ययनं प्रयोजनमुद्दिश्य चोदयेत्—'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्न'मिति, स एनं माणवकं नैव प्रत्याचक्षीत । चशब्दोऽवधारणे ॥ २ ॥

अनु०—शिष्य जिस गुरु से अध्ययन कराने के लिये आग्रह करे वह अस्वीकार न करे ॥ २ ॥

किमविशेण ? नेत्याह—

न चास्मिन् दोषं पश्येत् ॥ ३ ॥

चणिति निपातोऽस्ति—[4]'निपातैर्यद्यदिहन्तकुविन्नेचेच्चण्कच्चिद्यत्रयुक्त'मिति । स चेदर्थे वर्तते । [5]"इन्द्रश्च मृडयाति न' इत्यादौ दर्शनात् । तस्यायं प्रयोगः—न चेदस्मिन् माणवके दोषमनध्याप्यताहेतुं पश्येत् ॥ ३ ॥

अनु०—यदि उस शिष्य में दोष न देखे तो अध्यापन करने से अस्वीकार न करे ॥ ३ ॥

---

१. अग्निहोत्रमतिथयः । यच्चान्यदेवं युक्तम् । इति सूत्रद्वयत्वेन परिगणितं ख० च० पुस्तकयोः ।

२. वसि० स्मृ० ८. १६. वचनमिदं स्मृतिमुक्ताफले 'दक्षः'—इत्यारभ्य पठितेषु वचनेषु मध्ये पठितम् । इदानीमुपलभ्यमानमुद्रितदक्षस्मृतिपुस्तके तु नोपलभ्यते । वसिष्ठ स्मृतावेवोपलभ्यते ।

३. शिरःकण्डूयने इति ख० पु०

४. पा० सू० ८. ३. १०

५. ऋ० सं० ३. ४१. ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदृच्छायामसंवृत्तौ गतिरेव तस्मिन् ॥ ४ ॥

समानमधीयानेषु माणवकेषु यदि कस्यचिद्यदृच्छया दृष्टहेतुमन्तरेण बुद्धिमान्द्यादिनाऽध्ययनस्या [1]संवृत्तिस्स्यात् अधीतो भागो माणवकान्तरवन्नागच्छेत् तदा तस्यां यदृच्छायामसंवृत्तौ तस्मिन्नाचार्ये गतिरेव शुश्रूषैव माणवकस्य शरणम् । तथा च मनुः—

[2]'यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥'' इति ।

अधिकं शुश्रूषितो हि गुरुस्सर्वात्मना तं शिक्षयेदिति ॥ ४ ॥

अनु०—यदि शिष्य के (मन्दबुद्धि होने से) अध्ययन पूरा न हो तो उसके लिए गुरु की शुश्रूषा ही करनी होती है ॥ ४ ॥

मातरि पितर्याचार्यवच्छुश्रूषा ॥ ५ ॥

मातृग्रहणेन पितामहीप्रपितामह्योरपि ग्रहणम् । पितृग्रहणेन पितामहप्रपितामहयोः । सर्व एते आचार्यवच्छुश्रूषितव्याः ॥ ५ ॥

अनु०—माता तथा पिता के प्रति आचार्य की तरह शुश्रूषा करनी चाहिए ।

टि०—माता से पितामही, प्रपितामही आदि से भी तात्पर्य है । इसी प्रकार पिता शब्द से पितामह, प्रपितामह से भी तात्पर्य है । इन सभी के प्रति उसी प्रकार की शुश्रूषा विहित है जिस प्रकार की गुरु के लिए ॥ ५ ॥

समावृत्तेन सर्वे गुरव उपसङ्ग्राह्याः ॥ ६ ॥

उक्ताश्चानुक्ताश्च ज्येष्ठभ्रातृमातुलादयः सर्वे गुरवः समावृत्तेनाहरहरुपसंग्राह्याः ॥ ६ ॥

अनु०—जिस शिष्य का समावर्तन हो चुका हो वह सभी गुरुजनों के चरणों का उपसंग्रहण करे ।

टि०—ज्येष्ठ भ्राता, मामा, सभी गुरु के अन्तर्गत आते हैं ॥ ६ ॥

प्रोष्य च समागमे ॥ ७ ॥

यदि स्वयं प्रोष्य समागतो भवति । गुरवो वा प्रोष्य समागताः । तदापि ते उपसङ्ग्राह्याः ॥ ७ ॥

अनु०—यात्रा से लौटने के बाद भी उनके चरणों का उपसंग्रहण करे ॥ ७ ॥

---

१. समावृत्तिः इति क० पु०   २. म० स्मृ० २. २१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रातृषु भगिनीषु च यथापूर्वमुपसङ्ग्रहणम् ॥ ८ ॥

पूर्वेणैव सिद्धे क्रमार्थं वचनम्—यथापूर्वं ज्येष्ठक्रमेणेति ॥ ८ ॥

अनु०—बड़े भाइयों और बड़ी बहनों का चरण उनकी ज्येष्ठता के क्रम से छूने चाहिये ॥ ८ ॥

नित्या च पूजा यथोपदेशम् ॥ ९ ॥

'पूजा वर्णज्यायसां कार्या, वृद्धतराणां चे'त्युपदेशानुरोधेन या नित्या पूजा सा यथापूर्वं वृद्धक्रमेण ॥ ९ ॥

अनु०—(वर्ण से श्रेष्ठ एवं आयु से वृद्धतर लोगों की) नित्य की जाने वाली पूजा निर्दिष्ट नियम के अनुसार करनी चाहिए। (अर्थात् उनकी श्रेष्ठता तथा अधिक अवस्था के क्रम से करनी चाहिए) ॥ ९ ॥

ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाऽभिवदेत् ॥ १० ॥

[२]'त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हती'ति वक्ष्यति। तेनावरवयस ऋत्विगादयोऽप्यभिवादयन्ते। तानभिवादयमानान् प्रत्युत्थायाऽभिवदेत्। नान्येष्विव सुखमासीनोऽभिवदति। वयस्त उत्कृष्टानां तेषामियमेव पूजा ॥ १० ॥

अनु०—ऋत्विज्, श्वशुर, चाचा, मामा यदि अपने से कम अवस्था के हों तो भी उठकर उनका अभिवादन करे ॥ १० ॥

तूष्णीं वोपसंगृह्णीयात् ॥ ११ ॥

अथवा प्रत्युत्थाय स्वयमपि तांस्तूष्णीमुपसंगृह्णीयात्। विद्याचारित्राद्यपेक्षो विकल्पः ॥ ११ ॥

अनु०—अथवा चुपचाप उनके चरण का स्पर्श करे ॥ ११ ॥

अथाभिवाद्या उच्यन्ते—

दशवर्षं पौरसख्यं पञ्चवर्षं तु चारणम्।
त्रिवर्षपूर्वः श्रोत्रियोऽभिवादनमर्हति ॥ १२ ॥

पुरभवं पौरम्। पौरं च तत्सख्यं च पौरसख्यं सेवादिनिबन्धनं वान्धवं तदभिवादनस्य निमित्तम्। कीदृशम्? दशवर्षान्तरालं, दशवर्षाधिकः पौरस्सखा अश्रोत्रियोऽप्यभिवाद्य इति विवक्षितम्। पञ्चवर्षं तु चारणम्। सख्यमित्युपसमस्तमप्यपेक्ष्यते। चारणशब्दः शाखाध्यायिषु रूढः। तेषां सख्यं पञ्चवर्षमभिवा-

१. आप० ध० १. १३. २, ३ २ आप० ध० १. १४, १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दनस्य निमित्तम्। [1]श्रोत्रियं वक्ष्यति। त्रिवर्षपूर्वः श्रोतियोऽभिवादनमर्हति स त्रिवर्षपूर्वतामात्रेणाभिवादनमर्हति, न पूर्वसंस्तवमपेक्षते ॥ १२ ॥

अनु०—दस वर्ष तक किसी पुरवासी के साथ मित्रता, पाँच वर्ष तक एक शाखा के अध्ययन से उत्पन्न मित्रता अभिवादन का कारण होती है किन्तु श्रोत्रिय यदि तीन वर्ष से कम समय का परिचित हो तो भी उसे अभिवादन करना चाहिए ॥१२॥

ज्ञायमाने वयोविशेषे वृद्धतरायाऽभिवाद्यम् ॥ १३ ॥

क्रमार्थमिदम् [2]वयोविशेषे ज्ञायमाने पूर्वं वृद्धतरायाऽभिवाद्यम् अभिवादनं कर्तव्यम्। पश्चाद्वृद्धायेति ॥ १३ ॥

अनु०—अवस्था ज्ञात होने पर अनेक व्यक्तियों में जो सबसे वृद्ध हो उसका पहले अभिवादन करना चाहिए ॥ १३ ॥

विषमगतायाऽगुरवे नाभिवाद्यम् ॥ १४ ॥

उच्चैस्थाने नोचैस्स्थाने वाऽवस्थितो विषमगतः। तस्मै गुरुव्यतिरिक्ताय नाभिवाद्यम्। गुरवे त्वभिवाद्यमेव, दर्शने सति तूष्णीमवस्थानस्याऽयुक्तत्वात् ॥ १४ ॥

'यत्तत्स्मृतं कारणमप्रमेयं ब्रह्म प्रधानं प्रकृतिप्रसूतिः ।
आत्मा गुहा योनि[1] रनाद्यनन्तः क्षेत्रं तथैवामृतमक्षरं च ॥" इति

पुराणे दर्शनात् । तस्यां शेते तया सहाऽऽविभागमापन्नस्तिष्ठतीति गुहाशय आत्मा ।

[2] 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् ।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः, इति च मन्त्रान्तरम् । अहन्यमानस्य न ह्यसौ शरीरे हन्यमानेऽपि हन्यते[3] तथा चोक्तं भगवता– [4]'न हन्यते हन्यमाने शरीर' इति । विकल्मषस्य निर्लेपस्य । सर्व एव हि धर्माधर्मादिरन्तःकरणस्य धर्मः, आत्मनि त्वध्यस्तः । एवंभूतस्यात्मनः सर्व एव प्राणिनः ब्रह्माद्यास्तिर्यगन्ताः प्राणादिमन्तः संघाताः पूः पुरं उपभोगस्थानम् । यथा राजा पुरमधिवसन् सचिवैरानीतान् भोगानुपभुङ्क्ते,तथाऽयं देवादिशरीरमधिवसन् करणैरुपस्थापितान् भोगानुपभुङ्क्ते, तथायं देवादिशरीरमधिवसन् करणैरुपस्थापितान् भोगानुपभुङ्क्ते। तमेवंभूतमचलं सर्वगतत्वेन निश्चलम् । चलनिकेतं निकेतं स्वस्थानं शरीरं तद्यस्य चलं तं येऽनुतिष्ठन्ति उपासते एवंभूतोऽहमिति प्रतिपद्यन्ते, तेऽमृताः मुक्ता भवन्तीति ॥ ४ ॥

विवरणम्

कथं तदनुष्ठानमिति ? उच्यते—

यदिदमिदिहेदिह लोके विषयमुच्यते ।
विधूय तत् कविरेतदनुतिष्ठेद्गुहाशयम् ॥ ५ ॥

अनु०—इस संसार में जो भी पदार्थ इन्द्रिय के विषय कहे गये हैं उन सभी का परित्याग करके विद्वान व्यक्ति गुहा में स्थित (बुद्धिरूपी) गुफा में शयन करने वाले आत्मा का साक्षात्कार करने के लिए प्रयत्नशील होवे ।

टि०—इस पद्य में इह का दो बार प्रयोग लोक और स्वर्ग लोक दोनों का वाचक है ॥ ५ ॥

---

१. अनाद्यनन्तं इति. ख० पुस्तके २. तै० आ० (नारायणोपनिषदि) १०. १
३. 'तथा चोक्तं भगवता–'न हन्यते हन्यमाने शरीरे ।' इति नास्ति क० पुस्तके ।
४. भगवद्गी० २. २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदिदं प्रत्यक्षतोऽवगम्यमानं स्त्र्यन्नपानादिसंभोगलक्षणम्। इदिति क्विब्निर्दर्थे। यत्किञ्चिदिदं प्रत्यक्षम्। इहाऽस्मिन् लोके। विषयम्। इदंशब्दसामानाधिकरण्यान्नपुंसकलिङ्गप्रयोगो विषयमिति। उभयलिङ्गो वा विषयशब्दः। द्वितीय इच्छब्द इहशब्दश्च। तयोः क्वचिन्नियोगः। इच्छब्दश्चार्थे। इहशब्दोऽमुष्मिन्नर्थे। लोकशब्दः काकाक्षिवदुभयत्र सम्बध्यते। इह लोके इह च लोकेऽमुष्मिंश्च यदिदं विषयमुच्यते,स्वर्गादिलोके पार्श्वस्थमध्यस्थो व्यपदिशति इह लोके इति च लोके इत तत्सर्वं विधूय परित्यज्य। कविः क्रान्तदर्शी, मेधावीत्यर्थः। फलं साधनं च तद्विधूय एषणात्रयाद् व्युत्थायेत्यर्थः अनुतिष्ठेद् गुहाशयं यथोक्तलक्षणमात्मतत्त्वम्॥ ५॥

उज्ज्वला

विषयसङ्गपरित्यागेनाऽयमुपास्य इत्याह—

यदिदं, विषयं, सेतदिति सर्वत्र लिङ्गव्यत्ययश्छान्दसः। एवमितिशब्दे तकारस्य दकारः। इतिशब्दः प्रसिद्धौ। हशब्द आश्चर्ये। इतिशब्देनावृत्तेन शब्दादिषु विषयेष्ववान्तरप्रकारभेदः प्रतिपाद्यते। विषयापहृतचेतसो हि वदन्ति-'इति ह तस्या गीतम्, इति ह तस्याः सुखस्पर्शः, इति ह तस्या रूपं निष्टप्तमिव कनकम्, इति ह तस्याः स्वादिष्ठोऽधरमणिः, इति ह तस्या गन्धो घ्राणतर्पण' इति। एवं दिव्यमानुषभेदोऽपि द्रष्टव्यः। अत्राऽनन्तरमपर इति शब्दोऽध्याहार्यः। इति ह इति हेति योऽयं लोके विषय उच्यते, सामान्यापेक्षमेकवचनम्, एतद्विधूय गुहाशयमनुतिष्ठेत्। कविर्मेधावी॥ ५॥

विवरणम्

तत् क्वाऽनुष्ठातव्यमिति। उच्यते—

आत्मन्नेवाऽहमलब्ध्वैतद्धितं सेवस्व नाऽहितम्।
अथाऽन्येषु प्रतीच्छामि साधुष्ठानमनपेक्षया।
महान्तं तेजसस्कायं सर्वत्र निहितं प्रभुम्॥ ६॥

अनु०—मैंने महान अनन्त तेज शरीर सर्वत्र व्याप्त प्रभु आत्मा का जिसका ज्ञान दूसरी वस्तुओं के ऊपर ध्यान न देकर एकाग्रचित्त होकर प्राप्त करना चाहिए, ज्ञान प्राप्त नहीं किया और दूसरी वस्तुओं (इन्द्रियों आदि) में उसे प्राप्त करने का प्रयत्न करता रहा। किन्तु अब परम ज्ञान प्राप्त कर वैसा नहीं रह गया। तुम लोग भी उस कल्याणकारी उत्तम मार्ग का सेवन करो विषयों के पीछे मत दौड़ो जो हितकारी मार्ग नहीं है॥ ६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मन्नेव आत्मन्येव। प्रत्यगात्मा हि परमात्मा। सर्वं ह्यत्रानुष्ठेयम्। यदि देहादन्यत्राऽनुष्ठीयेत, सोऽनात्मा कल्पितः स्यात्। तस्माद् देहादिसङ्घात आत्मन्येव विधूय बाह्यासङ्गं गुहाशयमात्मतत्त्वमनुष्ठेयम्। किमन्येष्वननुष्ठेयमिति भगवतो मतम्? बाढम्, प्रथममेव नान्येष्वनुष्ठेयमात्मतत्त्वम्। कथं तर्हि? सर्वप्रयत्नेनाऽपि स्वदेहादिसङ्घाते यथोक्तमात्मतत्त्वं न लभेत, अथाऽहमन्येष्वादित्यादिषु प्रतीच्छामि अभिवाञ्छामि। साधुष्ठानं साधोः परमात्मनः उपलब्धिस्थानं, यत्र गुहाशायं ब्रह्मतत्त्वमनुष्ठेयम्। अनपेक्षयाऽन्यत् पुत्रवित्तलोकादिसुखं छित्त्वा निःस्पृहतया। न ह्यात्मानुष्ठानं बाह्यार्थाकाङ्क्षा च सह सम्भवतः। कस्मात् पुनरनेकान्यन्यानि हितप्रकाराण्यनपेक्ष्याऽऽत्मानुष्ठानमेव यत्नत आस्थीयत इत्यत आहाऽऽचार्यः—यथान्यान्यहितानि हितबुद्ध्या परिगृहीतानि, न तथैवमात्मसेवनम्। किं तर्हि? (ए) तद्धितमेव। तस्मात् सेवस्वेति। किंविशिष्टश्चाऽऽत्मा सेवितव्य इत्याह—महान्तम् अमितान्तम् अनन्त (र) त्वादबाह्यत्वाच्च महानात्मा, तं महान्तम्। गुणैर्वोपाधिसहचारिभिर्महान्तं, बृंहणमिति यद्वत्। तेजसस्कायं तेजःशरीरमित्यर्थः। चैतन्यात्मज्योतिःस्वरूपम्। तद्धि तेजसां तेजः। [1]'येन सूर्यस्तपति तेजसेद्धः' [2]'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। सर्वत्र सर्वदेहेषु ब्रह्मादिस्तम्बपर्यन्तेषु। निहितं स्थितम्, उपलब्धिरूपेणाभिव्यक्तमित्यर्थः। न हि ब्रह्मणोऽभिव्यक्तिनिमित्तत्वव्यतिरेकेण कस्यचिदाधारत्वसम्भवः। निराधारं हि ब्रह्म, सर्वगतत्वोपपत्तेः प्रभुं प्रभवति सर्वानीश्वरान् प्रति, अचिन्त्यशक्तित्वात्। एवमाद्यनन्तगुणविशिष्टमात्मानं सेवस्वेति ॥ ६ ॥

उज्ज्वला

विषयत्यागे हेतुमाह—

शिष्यं प्रत्याचार्यस्य वचनमेतत्। द्वौ चात्र हेतू विषयाणां त्यागे–पराधीनत्वमहितत्वं च। महान्तं गुणतः। तेजसस्कायं तेजसश्शरीरं तेजोराशिं स्वयंप्रकाशम्। [3]'आत्मज्योतिः सम्राडिति होवाचे'ति बृहदारण्यकम्। सर्वत्र निहितं सर्वगतम्। प्रभुं स्वतन्त्रम्। एवंभूतं गुहाशयं एतावन्तं कालं अहमात्मन्, सप्तम्येकवचनस्य लुक् आत्मनि। अस्मिन् मदीये सङ्घाते अन्यानपेक्षयैव लब्धुं योग्यमलब्ध्वा अथान्येषु इन्द्रियादिषु तं नं विषयं प्रतीच्छामि लङर्थे लट्, प्रत्यैच्छम्। इदानीं तु तं लब्ध्वा न तयावियोऽस्मि। त्वमप्येतदेव हितं साधुष्ठानं साधुमार्गं सेवस्व नाहितं विषयानुधावनमिति ॥ ६ ॥

---

१. तै० ब्रा० १३. ९. ७ २. मुण्ड० २. २. १०
३. बृह० उ० ४. ३. ६, अत्र पाठभेदो दृश्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वभूतेषु यो नित्यो विपश्चिदमृतो ध्रुवः ।
अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्छुचिः ।
स सर्वं परमा काठा स वैषुवतं स वै वैभाजनं पुरम् ॥ ७ ॥

अनु०–वह आत्मा सभी प्राणियों में नित्य अर्थात् अनश्वर शाश्वत रूप में विद्यमान है, अमर है, ध्रुव अर्थात् विकाररहित है, ज्ञानस्वरूप है, अंगहीन तथा शब्द और स्पर्श गुण से परे है। सूक्ष्म शरीर से भी वर्णित है। अत्यन्त शुद्ध है वही सम्पूर्ण विश्व है, परम लक्ष्य है। शरीर के भीतर उसी प्रकार से अवस्थित है जिस प्रकार सत्र यज्ञ में विषुवत नाम का दिन मध्य में होता है। आत्मा उसी प्रकार सभी लोगों द्वारा प्राप्य है जैसे अनेक मार्गों से युक्त नगर में सभी लोग आते हैं ॥ ७ ॥

विवरणम्

विशिष्टमात्मानं से वस्वेति क्रियापदमनुवर्तते। किं च सर्वभूतेषु ब्रह्मादिष्वनित्येषु यो नित्योऽविनाशो। विपश्चिन्मेधावी, सर्व इत्यर्थः। अमृतोऽत एव यो ह्यनित्योऽसर्वज्ञः स मर्त्यो दृष्टः; अयं तु तद्विपरीतत्वादमृतः ध्रुवः। अविचलः। निष्कम्पस्वभाव इत्यर्थः। अनङ्गः स्थूलशरीररहित इत्यर्थः। स्थूले हि शरीरे शिरआद्यङ्गानि सम्भवन्ति। अशरीर इति लिङ्गशरीरवर्जित इत्येतत्। अशब्दः नाऽस्य शब्दगुणः सम्भवति। शब्दविद्धि सन् अन्यथा शब्दात्मकः शब्दात्मकमेव विजानीयात्। न चैतदस्ति। अतोऽशब्दः। तथा अस्पर्शः आकाशवायुभूतद्वयगुणप्रतिषेधेन शब्दादयो गन्धावसानाः सर्वभूतगुणाः प्रतिषिद्धा वेदितव्याः। तत इदं सिद्धमाकाशादपि सूक्ष्मत्वम्। शब्दादिगुणवाहुल्याद्वाय्वादिषु स्थौल्यतारतम्यमुपलभ्यते। शब्दादिगुणाभावान्निरतिशयसूक्ष्मत्वं सर्वगतत्वादि चाऽप्रतिबन्धेन धर्मजातं तर्केणाऽपि शक्यं स्थापयितुम्। महान्, अत एव शुचिर्निरञ्जनः। अथवा शुचिः पावन इत्यर्थः। शुचि हि वस्तु पावनं दृष्टम्, यथा लोके वाय्वग्न्यादि। किञ्च य आत्मा प्रकृतः, स सर्वम्। [1]'इदं सर्वं यदयमात्मे' ति हि वाजसनेयके। न ह्यात्मव्यतिरेकेण किञ्चिन्निरूप्यमाणमुपपद्यते। अत एव परमा प्रकृष्टा। काष्ठा अवसानम्। [2]'सा काष्ठा सा परा गतिरि'ति काठके। संसारगतीनां अवसानं निष्ठा समाप्तिरित्यर्थः। स वैषुवतं मध्यं सर्वस्य, सर्वान्तरश्रुतेः। विषुवत्सु वा [3]दिवाकीर्त्येषु मन्त्रेषु नित्यं प्रका-

१. बृह० उ० ४. ५. ७   २. काठ० १. ३. ११

३ गवामयनाख्यस्संवत्सरसाध्यस्सत्रविशेषः। स एकषष्ट्यधिकशतत्रयदिवस-(३६१) साध्यः। तत्राशीत्युत्तरशत (१८०) दिनानि पूर्वं पक्षः। तावन्त्येव दिनान्युत्तरं पक्षः। मध्यगं यदहरेकाशीत्युत्तरशततमरू (१८१) पं स विषुवान्। तत्र दिवाकीर्त्याख्यं साम ब्रह्मसाम भवति। तेन च साम्ना परमात्मा गीयते। अतो विषुवद्वत् मध्यस्थानत्वात् तत्प्रतिपाद्यत्वाद्वा ब्रह्म वैषुवतमिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्यं भवतीति वैषुवतः। स परमात्मा।

ननु 'स सर्वं परमा काष्ठा स वैषुवत'मित्युक्तम्। कस्मात् पुनस्तदात्मतत्त्वं विभक्तमुपलभ्यत इति। उच्यते—स परमात्मा वैभाजनं, विभक्तिर्विभजनं विवेक आत्मनो यस्मिन् देहे क्रियते, तत् विभाजनमेव वैभाजनम्। आत्मनो विवेकोपलब्ध्यधिष्ठानं हि शरीरम्। तच्चाऽनेकधा विभक्तम्। तदुपाध्यनुवर्तित्वाद् वैभाजनम् सर्वथा शुद्धमेव सर्वैर्नोपलभ्यते। किं तर्हि? विभक्तो विपरीतश्चोपलभ्यते॥ ७॥

उज्ज्वला

पुनरप्यसौ कीदृश इत्याह—

सर्वभूतेषु मनुष्यादिषु सङ्घातेषु यो नित्यः विनश्यत्स्वपि न विनश्यति विपश्चित् मेधावी चित्स्वरूपः। अमृतः नित्यत्वादेवामरणधर्मा। अतः ध्रुवः एकरूपः, विकाररहितः। न प्रधानवद्विकारिणस्सतो धर्मिरूपेणाऽस्य नित्यत्वमित्यर्थः। अनङ्गः करचरणाद्यङ्गरहितः। अशब्दोऽस्पर्श इति भूतगुणानामुपलक्षणम्। शब्दादिगुणरहितः अशरीरः सूक्ष्मशरीरेणाऽपि वर्जितः। महाञ्छुचिः महत्त्वं शौचस्य विशेषणम्। परमार्थतोऽत्यन्तशुद्धः। स सर्वं प्रकृत्यभेदद्वारेण। स एव परमा काष्ठा, ततः परं गन्तव्याभावात्। स वैषुवतं विषुवान्नाम गवामयनस्य मध्ये भवमहः। 'एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्ये'ति दर्शनात्। विषुवानेव वैषुवतम्। तद्यथा संवत्सरस्य मध्ये भवति एवमङ्गानामेषमध्ये। [1]"मध्यं ह्येषामङ्गानामात्मे'ति बह्वृचब्राह्मणम्। स एव च वैभाजनं पुरं विविधैर्मार्गैर्भजनीयं विभजनम्। तदेव वैभाजनं प्रज्ञादिरनुशतिकादिश्च। यथा समृद्धं पुरं सर्वैरर्थिभिः प्राप्यमेवमयमपीति॥ ७॥

तं योऽनुतिष्ठेत्सर्वत्र प्राध्वं चाऽस्य सदाऽऽचरेत्।
दुर्दर्शं निपुणं युक्तो यः पश्येत्स मोदेत विष्टपे॥ ८॥

अनु०—जो व्यक्ति उस आत्मा का चिन्तन करता है, सर्वत्र और सभी अवस्थाओं में उसके अनुकूल आचरण करता है, जो समाहित होकर सूक्ष्म से भी अत्यन्त सूक्ष्म कठिनाई से दीख पड़ने वाले आत्मा का दर्शन करता है, वह परमलोक में सभी दुखों से मुक्त होकर निरन्तर सुख का अनुभव करता है॥ ८॥

विवरणम्

अतस्तदुपाध्यनुवर्तिस्वभावदर्शनमविद्याख्यं हित्वा विद्यया शास्त्रजनितदर्शनेन तं यथोक्तलक्षणमात्मानमनुतिष्ठेत्। सर्वत्र सर्वस्मिन् काले। किञ्च न

१. ऐ० ब्रा० ६. ५. ८. ख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

केवलमनुष्ठानमात्रमस्य । प्राध्वं बन्धनम् आत्मैकत्वरसप्रज्ञतां स्थिरां वाह्यैषणाव्यावृत्तरूपां सर्वसंन्यासलक्षणाम् । तद्धि बन्धनं विदुषो ब्राह्मणि एवं हि बद्धो ब्रह्मणि । संसाराभिमुखो नाऽऽवर्तते । तस्माद् बन्धनं चाऽस्य सदाऽऽचरेत् । तदनुष्ठानबन्धने सदाचरतः किं स्यादिति ? उच्यते—दुर्दर्शं दुःखेन ह्येषणात्यागादिना स दृश्यत इति दुर्दर्शम् । निपुणं यस्माद्धि दुर्दर्शं तस्मान्निपुणम् । अत्यन्तकौशलेन समाहितचेतसा युक्तो यः पश्येत् साक्षादुपलभेत—अहमात्मेति, स मोदेत । एवं दृष्ट्वा हर्षमानन्दलक्षणं प्राप्नुयात् । विष्टपे विगतसन्तापलक्षणेऽस्मिन् ब्रह्मणीत्यर्थः ॥ ८ ॥

उज्ज्वला

तमेवंभूतमात्मानं योऽनुतिष्ठेदुपासीत यश्चाऽस्य सर्वत्र सर्वास्ववस्थासु सदा प्राध्वमानुकूल्यमाचरेत् । आनुकूल्यं प्रतिषिद्धवर्जनं नित्यनैमित्तिककर्मानुष्ठानं च । यश्च दुर्दर्शं निपुणं [1]सूक्ष्मतः युक्तः समाहितो भूत्वा पश्येत् साक्षात्कुर्यात् । सः विष्टपे विगततापे स्वे महिम्नि स्थितो मोदेत सर्वदुःखवर्जितो भवति । संसारदशायां वा तिरोहितं निरतिशयं स्वमानन्दमनुभवतीति ॥ ८ ॥

॥ इत्यापस्तम्बसूत्रवृत्तावुज्ज्वलायां द्वाविंशी कण्डिका ॥ २२ ॥

आत्मन् पश्यन् सर्वभूतानि न मुह्येच्चिन्तयन्कविः । आत्मानं चैव सर्वत्र य पश्यत्स वै ब्रह्मा नाकपृष्ठे विराजति ॥ ९ ॥ १ ॥

अनु०—सभी प्राणियों को अपने में स्थित देखता हुआ विद्वान् मोह न प्राप्त करे । (अथवा जो सभी प्राणियों को अपनी आत्मा में ध्यान करता हुआ देखता है वही मेधावी है) । जो आत्मा का दर्शन सभी वस्तुओं में करता है वह ब्राह्मण स्वर्ग लोक में प्रतिष्ठित और देदीप्यमान होता है ॥ १ ॥

विवरणम्

किञ्च आत्मन् पश्यन् आत्मनि पश्यन् उपलभमानः । सर्वभूतानि सर्वाणि (भूतानि) । सर्वेषां भूतानामात्मस्वरूपतामेव पश्यन्नित्यर्थः । सर्वत्राऽऽत्मानं च परम् । न मुह्येत् मोहं न गच्छेत् । न ह्यात्मैकत्वदर्शिनो मोहावतारः; [2]'तत्र को मोह' इति च मन्त्रलिङ्गात् । कीदृग्विशिष्टमात्मदर्शनं मोहनिबर्हणमित्याह—चिन्तयन् उपसंहृतकरणः कविः मेधावी सन् ध्यायमानः । न शब्दजनितदर्शनमात्रेण मोहापगमः । सर्वभूतेष्वनुप्रविष्टमेकं संव्यवहारकाले यो हि युक्तः पश्येत्, स वै ब्रह्मा ब्राह्मणः । नाकपृष्ठे सुकरागौ (?) ब्रह्मणि । विराजति विविधं दीप्यते ॥ ९ ॥

---

१. सूक्ष्ममेतं इति क. ख. पु २. ईशा. उ. ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उज्वला

सर्वाणि भूतानि आत्मन् आत्मनि शेषत्वेन स्थितानि पश्यन् उपनिषदादिभिर्जानन्। पश्चाच्चिन्तयन् युक्तिभिर्निरूपयन्, यो न मुह्येत् मध्ये मोहं न गच्छेत्। कविर्मेधावी। पश्चाच्च सर्वत्रैव शेषत्वेन स्थितमात्मानं पश्येत् साक्षात्कुर्यात् स वै ब्रह्मा ब्राह्मणः नाकपृष्ठे तत्सदृशे स्वे महिम्नि स्थितो विराजति स्वयं प्रकाशते ॥ १ ॥

निपुणोऽणीयान् बिसोर्णाया यस्सर्वमावृत्य तिष्ठति। वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति। स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठो विभाजः। तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः ॥ १० ॥ २ ॥

अनु०--वह ज्ञानवान् है, कमल-नाल के बिसतन्तु से भी सूक्ष्म है. जो सम्पूर्ण विश्व को व्याप्त करके स्थित है। जो पृथ्वी से अधिक भारी है, नित्य है, सम्पूर्ण विश्व को अपने में समाविष्ट किए हुए स्थित है। वह परमात्मा इन्द्रियों से उत्पन्न होने वाले इस संसार के ज्ञान से भिन्न है, जो ज्ञान इन्द्रिय-विषयों से अभिन्न होता है। वह अपने परम प्रकृष्ट लोक में स्थित होता है, वह सम्पूर्ण संसार को विविध रूपों में विभक्त करता है। उसी परमात्मा से ही शरीर उत्पन्न होते हैं, अतः वह सृष्टि का मूल कारण है, नित्य है, विकाररहित है ॥ २ ॥

विवरणम्

किञ्च निपुणः सर्ववित् अणीयान् अणुतरो बिसोर्णायाः बिसतन्तोरपि। कोऽसौ? यः प्रकृत आत्मा सर्वं समस्तं जगदावृत्य संव्याप्य तिष्ठति। किञ्च वर्षीयान् वृद्धतरः स्थूलतरश्च पृथिव्याः। सर्वात्मको हि सः। ध्रुवः नित्यः सर्वं कृत्स्नमारभ्य संस्तम्भनं कृत्वा। तिष्ठति वर्तते। 'येन द्यौरुग्रा पृथवी च दृढा' इति मन्त्रलिङ्गात्[1]। स सर्वेश्वरः सर्वज्ञः एको विज्ञेय इत्यर्थः। स परमात्मा इन्द्रियैर्जन्यते यज्ज्ञानं जगतोऽस्य, तस्मात् ज्ञानादन्यो विलक्षणः 'लौकिकज्ञानादन्य इति विशेषणाज्ज्ञानात्मक इत्यतेत् सिद्धम्। सत्यं ज्ञानमनन्तमि'ति च श्रुतेः। अस्य जगत इन्द्रियजन्यज्ञानादन्य इत्युक्तम्। अतश्च तद्व्यतिरिक्तं जगदिति प्राप्तम्। अतस्तन्माभूदित्याह—अनन्यस्य अपृथग्भूतस्य जगतः, ज्ञेयात् ज्ञातव्यात् परमार्थस्वरूपाद्व्यात् परमेश्वराद् घटादेरिव मृदः। स च परमेष्ठी परमे प्रकृष्टे स्वे महिम्नि हृदाकाशेऽवस्थातुं शीलमस्येति परमेष्ठी। स्वयमेव विभाजः विभक्तो देवपितृमनुष्यादिना ज्ञातृज्ञेयज्ञानभेदेन च, यस्मात् स एव ज्ञेय आत्मा स्वतो विभजति जगदनेकधा। तस्मादेवाऽऽत्मनः कायाः शरीरा-

---

१. ऋ ८. ७. ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्याकाशादिक्रमेण प्रभवन्ति सर्वे ब्रह्मादिलक्षणाः। अतो मूलं स जगतः। "यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः। अत एव स शाश्वतिकः। यो हि पृथिव्यादिविकारः, सोऽबादिक्रमेण विनश्येत्, परं मूलकारणमापद्यते, सोऽशाश्वतिकोऽनित्यः। अयं चाऽऽत्मा परं मूलम्। न तस्याऽप्यन्यन्मूलमस्ति, यतो जातो विनश्येत्, मूलमापद्यते, ततस्तद्विलक्षणत्वाच्छाश्वतिकः शश्वदेकरूपः। अतो नित्यः एकत्वमहत्त्वमूलत्वेभ्यश्च ॥ १० ॥

उज्ज्वला

निपुणो मेधावी चित्स्वरूपः। बिसोर्णायाः बिसतन्तोरप्यणीयान् सूक्ष्मः। यः सर्वमावृत्य व्याप्य तिष्ठति। यश्च पृथिव्या अपि वर्षीयान् प्रवृद्धतरः सर्वगतत्वादेव सर्वमारभ्य विष्टभ्य शेषित्वेनाऽधिष्ठाय तिष्ठति। ध्रुवः एकरूपः। अस्य जगतो यदिन्द्रियैर्ज्ञानं ज्ञानं इन्द्रियजन्यं तस्मात्। कीदृशात्? अनन्यस्य ज्ञेयात्, पञ्चम्यर्थे षष्ठी, ज्ञेयात् नीलपीताद्याकारादनन्यभूतं नीलपीताद्याकारं, तस्माद्विषज्ञानादन्य इत्यर्थः। श्रूयते च [2]'तस्माद्वा एतस्माद्विज्ञानमयात्। अन्योऽन्तर आत्माऽऽनन्दमय' इति।

[3]'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः।

तमेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥' इति पुराणम्। स्वभावतः स्वच्छस्य चिद्रूपस्याऽऽत्मनो नीलपीताद्याकारकालुष्यं तद्रूपाया बुद्धेरनुरागकृतं भ्रान्तमित्यर्थः। वैषयिकज्ञानादन्य इति विशेषणेन ज्ञानात्मक इत्यपि सिद्धम्।[4] 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति च श्रुतिः। एवंभूतस्याऽऽत्मा परमेष्ठी परमे स्वरूपे तिष्ठतीति। विभाज इत्यस्य परेण सम्बन्धः। विभजत्यात्मानं देवमनुष्यादिरूपेण नानाशरीरानुप्रवेशेनेति विभाक्। तस्माद्विभाजो निमित्तभूतात् सर्वे काया देवमनुष्यशरीराणि प्रभवन्ति उत्पद्यन्ते। स मूलं प्रपञ्चसृष्टेर्भोक्तृतया मूलकारणम्। स नित्यः अविनाशी। शाश्वतिक एकरूपः अविकारः ॥ २ ॥

विवरणम्

एवं यथोक्तमात्मानं विदितवत आध्यात्मिका योगा न्यायसहिता अप्रतिबन्धेन भविष्यन्ति। मिथ्याप्रत्ययपूर्वका हि दोषाः। दोषनिमित्तश्च धर्माधर्मजनितः संसारः दोषनिवृत्तावत्यन्तं विनिवर्तते इत्येतमर्थं दर्शयिष्यन्नाह—

दोषाणां तु निर्घातो योगमूल इह जीविते।
निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ॥ ११ ॥ ३ ॥

---

१. तै. उ. ३. १ २. तै. उ. २. ५
३. विष्णु पु. १. १. ६ ४. तै. उ. २. १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०--किन्तु इस जीवन में (क्रोध आदि) दोषों का विनाश योग से ही होता है। प्राणियों को जलाने वाले इन दोषों को नष्ट करके पण्डित (ब्रह्मविद्) कल्याण प्राप्त करता है ॥ ३ ॥

दोषाणां तु क्रोधादीनां निर्घातः विनाशः । योगा अक्रोधादयः, तन्मूलः तन्निमित्तमित्येतत् । अक्रोधादिषु हि सत्सु प्रतिद्वन्द्विनो दोषा दुर्बलत्वान्निर्हन्यन्ते । इह जीवत इति दोषप्रभवकर्मनिमित्तत्वाज्जीवितस्य देहधारणावसानो दोषव्यापार इत्येतद् दर्शयति । तत्प्रतिपक्षेष्वक्रोधादिषु कथं नु नाम मुमुक्षवः प्रयत्नातिशयं कुर्युरिति योगदोषयोरितरेतरविरोधित्वे सति स्थितिगतिवद् योगेभ्यो दोषाणामेव निर्घातः, न तु विपर्यय इत्येतत् । कथमिति चेत् ? उच्यते—सम्यग्दर्शनसचिवत्वाद् बलवन्तो योगाः । मिथ्याप्रत्ययसचिवत्वात् दुर्बलत्वान्निर्हन्यन्ते । निहन्तीत्येतदप्युक्तम् । बुद्धिबलवद्भ्यस्तद्धीनानां लोके निर्घातो दृष्टः । 'अक्रोधनः' (१. १. २३) 'क्रोधादींश्च—' (१. ११. २५) इति लिङ्गात् । निर्हृत्य अपहृत्य । भूतदाहान् दोषेषु (न?) ह्युद्भूतेषु भूतानि दह्यन्त इव अग्निना परितप्यन्ते । अतो भूतदाहा दोषा उच्यन्ते । तान् निर्हृत्य । क्षेमं निर्भयं मोक्षं गच्छति ।

"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" "अभयं वै जनक प्राप्तोऽसि' 'न भवति विदुषां ततो भयम्' इत्यादिश्रुतिस्मृतिभ्यः । न दोषप्रशममात्रेणाऽब्रह्मविदः क्षेमप्राप्तिरित्याह—पण्डित इति । ब्रह्मविदि ह्यत्र पण्डितशब्दः प्रयुक्तो, न शास्त्रविदि । [1]"तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य" इति श्रुतेः । इहाऽऽत्मविद्याधिकारात् ।

यदि तर्हि दोषनिर्हरणं पण्डितोऽप्यपेक्षेत, तं प्रति न हि ब्रह्मविद्या क्षेमप्राप्तिनिमित्तम् । यदि ब्रह्मविद्यैव क्षेमप्राप्तिनिमित्तं, ब्रह्मविद्यानन्तरमेव न दुःखमुपलभेत । नैष दोषः । उक्तो ह्यत्र परिहारः—सम्यग् ज्ञानबलावष्टम्भाद् बलिनो योगा दुर्बलान् दोषान् मिथ्याप्रत्ययभवान् निर्हन्तुमलमिति । तस्माद् ब्रह्मविद्ययैव क्षेमप्राप्तिः । अन्यथा दोषनिर्हरणकर्मक्षययोरसम्भवात् ।

विद्यया चेद् दोषनिर्हरणकर्मक्षयावश्यं भवतः, तत इदमयत्नकार्यत्वाद् दोषनिर्हरणस्य नित्यानुवादरूपमनर्थकम् , निर्हृत्येति, न, प्रवृत्तकर्माक्षिप्तत्वाद् दोषाणाम् । द्विविधानि ह्यनेकजन्मान्तरकृतानि कर्माणि—फलदानाय प्रवृत्तान्यप्रवृत्तानि च । यत्तु प्रवृत्तं कर्म, तेनाक्षिप्ता दोषाः कर्त्तुः सुखदुःखादिफलदानाय, दोषाभावे फलारम्भकत्वानुपपत्तेः । न हि रागद्वेषादिशून्ये सुखदुःखं प्रवृत्तिलब्धिः कदाचित् कस्यचिदिह दृश्यते । तस्मात् फलदानाय प्रवृत्तेन कर्मणाऽऽ-

१. बृ. उ. ३. ५. १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षिप्ता दोषाः प्रसङ्गेन प्राप्तबला यत्नतो निर्हर्तव्याः । प्रवृत्त्याधिक्यहेतुत्वप्रसङ्गात् । अतएवेदमुक्तम्–दोषाणां तु निर्घातो योगमूले इह जीवित इति । मन्दमध्यमोत्तमापेक्षत्वाच्च । ब्रह्मविदामपि न सर्वेषां समा ब्रह्मप्रतिपत्तिः, विवेकातिशयदर्शनात् कस्यचित् । 'एष ब्रह्मविदां वरिष्ठ' इति च श्रुतेः सम्यग्दर्शनसम्पन्न' इति च स्मृतेः। मन्दमध्यमब्रह्मविदपेक्षया त्यागवैराग्येन्द्रियजयविधेरर्थवत्त्वम् ,उत्तमब्रह्मविदां त्वर्थप्राप्तमेतत् सर्वमित्यनुवादमात्रम्।[1] 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते, इति वचनात्, गुणातीतलक्षणवचनेभ्यश्च । प्रवृत्तकर्माक्षिप्तदोषात् तज्जनितचेष्टाभ्यश्च भवति विदुषोऽपि देहान्तरोत्पत्तिरिति चेद्—मुक्तेषुवत् प्रवृत्तकर्माक्षिप्तत्वाद् विद्वद्दोषचेष्टानां प्रवृत्तकर्मविभागेनैवोपक्षीणशक्तित्वात् प्रयोजनान्तराभावाच्च न जन्मान्तरारम्भकत्वमुपपद्यते । यद्यप्रवृत्तं कर्म, ततस्यवावस्थमेव ब्रह्मविद्याहुताशनदग्धबीजशक्तित्वान्नालं जन्मान्तरारम्भाय, 'क्षीयन्ते चाऽस्य कर्माणि' [2]'ज्ञानाग्निः सर्वकर्माणि' इत्यादिश्रुतिस्मृतिभ्यः। अतः सिद्धा पण्डितस्य दोषनिर्हरणात् क्षेमप्राप्तिः ॥ ११ ॥

उज्ज्वला

दोषाणां वक्ष्यमाणानां क्रोधादीनां निर्घातः निर्मूलनम् । इह जीविते योगमूलः योगा वक्ष्यमाणा अक्रोधादयः तन्मूलकः । अतश्च तान् भूतदाहीयान् भूतानि दहतः क्रोधादीन्दोषान् निर्हृत्य क्षेमं गच्छति आत्मत्राणद्वारेण । पण्डितो [3]लब्धज्ञानः आत्मसाक्षात्कारी । क्षेमं अभयं मोक्षम् [4]'अभयं वै जनक प्राप्तोऽसी'ति बृहदारण्यकम् ॥ समाप्ताः श्लोकाः ॥ ३ ॥

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ॥ १२ ॥ ४ ॥

अनु०––अब हम उन दोषों का उदाहरण प्रस्तुत करेंगे जो प्राणियों का नाश करते हैं ॥ ४ ॥

भूतानां दाहो भूतदाहः तस्मै हिताः भूतदाहीयाः तस्मै हितमिति छः ।

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषो-
द्यमत्याशपरीवादावसूया काममन्यू अनात्म्यम-
योगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

अनु०–क्रोध, हर्ष, रोष, लोभ, मोह, दम्भ, द्रोह अर्थात् दूसरे को अनिष्ट करने की इच्छा, असत्य भाषण,अतिभोजन, दूसरे पर मिथ्या दोष लगाना, दूसरे के गुणों से

१. श्रीभ० गीता २. ५९. २. श्रीभगव. ४. ३७.
३. लब्धज्ञानः आत्मसाक्षात्कारी इति क. ख. पु. ४. बृ. उ. ६. २. ४.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलना, काम, द्वेष, इन्द्रियों को वश में न रखना, मन को समाहित न करना—ये प्राणियों का विनाश करने वाले दोष हैं और ये दोष योग के माध्यम से ही समाप्त होते हैं ॥ ५ ॥

विवरणम्

तत्र क्रोधस्ताडनाक्रोशनादिहेतुरन्तःकरणविक्षोभो गात्रस्वेदकम्पनादिलिङ्गः। हर्षस्तद्विपरीतोऽभीष्टलाभजनितो बाष्परोमाञ्चनादिलिङ्गः। रोषोऽनिष्टविषयो मानसो विक्रियाविशेषः। लोभः परद्रव्येप्सा, स्वद्रव्याविनियोगस्तीर्थे। मोहः वेकिता। दम्भ आत्मनो धार्मिकत्वप्रकाशनम्। द्रोहः परानिष्टचिकीर्षा। मृषोकार्याकार्याविद्यमनृतवचनम्। अत्याशपरीवादौ अत्याशोऽतिमात्रमशनम्। परीवादोऽसमक्षं परदोषाभिधानम्। असूया परगुणेष्वक्षमा। काममन्यू कामः स्त्रीव्यतिकराभिलाषः। मन्युस्तद्विघातकृत्सु द्वेषः। अनात्म्यम् अनात्मवत्ता। एष क्रोधादिरयोगः, असमाधानलक्षणो ह्येष चेतसो विक्षेपप्रकारः। तेषां योगसूलो निर्घातः ॥ १२ ॥ १३ ॥

उज्ज्वला

[1]ताडनाक्रोशादिहेतुकोऽन्तःकरणविक्षोभः स्वेदकम्पादिलिङ्गः क्रोधः। हर्षः इष्टलाभाच्चेतस उद्रेको रोमाञ्चादिलिङ्गः। रोषः क्रोधस्यैव कियानपि भेदो मित्रादिषु प्रतिकूलेषु मनसो वैलोम्यमात्रकार्यकरः। लोभो द्रव्यसङ्गः, यो धर्मव्ययमपि रुणद्धि। मोहः कार्याकार्ययोरविवेकः। स च प्रायेण क्रोधादिजन्योऽपि पृथगुपदिश्यते कदाचित्तदभावेऽपि सम्भवतीति। दम्भो धार्मिकत्व[2] प्रकाशनेन लोकवञ्चनम्। द्रोहोऽपकारः। मृषोद्यमनृतवादः। अत्याशोऽत्यशनम्। परीवादः परदोषाभिधानम्। असूया परगुणे[3]ष्वक्षमा। कामः स्त्रीसंसर्गः मन्युः गूढो द्वेषः अनात्म्यं अजितेन्द्रियत्वं जिह्वाचापलादि। अयोगो विक्षिप्तचित्तता। एते भूतदाहीया दोषाः। तेषां योगसूलो निर्घातः ॥ ५ ॥

के पुनस्ते योगा इति, उच्यते—

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन् विधिना [4]सार्वगामी भवति ॥ १४ ॥ ६॥

---

१. आक्रोशादि इति ख० पु० २. प्रदर्शनेन इति क० पु० ३. अक्षमता इति क० पु०
४. सर्वगामी इति विवरणानुमतः पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—क्रोधहीनता, हर्ष का अभाव, रोष न करना, अलोभ, मोह का अभाव, दम्भ का न होना, द्रोह न करना, सत्य वचन, भोजन में संयम, परदोष कथन से विमुख होना, असूया का अभाव, स्वार्थहीन उदारता, दान आदि न लेना, सरलता, कोमलता, भावावेगों का शमन, इन्द्रियों को वश में करना, सभी प्राणियों के साथ प्रेम, आत्मा के चिन्तन में मन को समाहित करना, आर्यों के नियम के अनुसार आचरण, क्रूरता का त्याग, सन्तोष—इन उत्तम गुणों का विधान सभी चार आश्रमों के श्रेष्ठ जनों समयाचारपूर्वक किया है, जो इनका शास्त्रोक्त विधि से आचरण करता है वह विश्वात्मा को प्राप्त करता है।। ६ ।।

विवरणम्

अक्रोधोऽहर्षः इत्येवमाद्या अयोगविपरीताः। अतस्ते समाधिलक्षणत्वाद् योगः। संविभागः आत्मनो यात्रासाधनस्याऽर्थिभ्यः संविभजनम्। त्यागः। दृष्टादृष्टेष्टभोगानां शक्तितः परित्यजम्, तत्साधनानां च। आर्जवम् ऋजुता, अदुष्टाकलनपूर्विका वाङ्मनःकायानां प्रवृत्तिः। मार्दवं मृदुत्वम्। शमोऽन्तःकरणोपशमः। दमो बाह्यकरणापेशमः। इदमन्यद् योगलक्षणं संक्षेपत उच्यते–सर्वभूताविरोधो योगः,विरोधे हि भूतानां पीडा, तदभावेऽपीडा। स एव सर्वभूतापीडालक्षणो योगः। आर्यम् आर्याणां भावः अक्षुद्रता। आनृशंसम् आनृशंस्यम्, अक्रौर्यम्। तुष्टिः लब्धव्यस्याऽलाभेऽपि चेतसः प्रसन्नतयाऽवस्थानं लाभ इव। सर्वभूताविरोधलक्षणांहिसा परिव्राजकस्यैव सम्भवतीत्यार्यादीनां त्रयाणामन्येषां चाऽविरुद्धानां सर्वाश्रमान् प्रति प्राप्तिरितीतिशब्दसामर्थ्याद्, इतिशब्दस्य च प्रकारवचनत्वादार्यादीनीत्थंप्रकाराणि सर्वाश्रमान् प्रति गमयति सर्वाश्रमाणां समयपदानीति। 'समयस्थानानीत्येतत्। अवश्यानुष्ठेयानीत्यर्थः। तान्येतानि यथोक्तान्यनुतिष्ठन् विधिना सर्वगामी सर्वगमनशीलः, ज्ञानाभिव्यक्तिक्रमेण। भवति मुच्यते इत्यर्थः ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवत्पादाचार्यस्य कृतिषु आपस्तम्बीयधर्मशास्त्राध्यात्मपटविवरणम् ॥ ॐ ॥

उज्वली

के पुनस्ते योगाः ? तानाह—

एते चाऽक्रोधादयोऽपि भावरूपाः न क्रोधाद्यभावमात्रम्, क्रोधादिनिर्घातहेतुतयोपदेशात्। के पुनस्ते ? अक्रोधः, क्रोधादिषु प्रसक्तेष्वपि मा कार्षमिति सङ्कल्पः। अहर्षः, इष्टलाभालाभेषु चेतस ऐकरूप्यम्। अरोपः मित्रादिषु प्रतिकूले-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्वपि मनोविकाराभावः। अलोभः सन्तोषोऽलम्बुद्धिः। अमोहोऽवधानम्। आदम्भो धर्मानुष्ठानम्। अद्रोहः परेष्वपकारिष्वप्यनपकारः। अनसूया परगुणेष्वभिमोदनम्। सत्यवचनं यथादृष्टार्थवादित्वम्। संविभागः आत्मान[1]मुपरुध्याऽप्यग्रादिदानम्। त्यागोऽपरिग्रहः। आर्जवं मनोवाक्कायानामेकरूपत्वम्। मार्दवं सूपगम्यता। शमः मन्युपरित्यागः। दमः[2]इन्द्रियजयः। एताभ्यामेव गतत्वात् पूर्वत्र स्वस्मिन् क्रमे अकामः, अमन्युः, आत्मवत्वमिति नोपदिष्टम्। सर्वभूतैरविरोधः। सर्वग्रहणं क्षुद्रैरविरोधार्थम्। योगः ऐकाग्र्यम्। आर्याणां भावः आर्यं शिष्टाचारानुपालनम्। आनृशंसं आनृशंस्यं व्यवहारपचनादौ प्रसक्तनैष्ठुर्यस्य वर्जनम्। तुष्टिरनिर्वेदः समयो व्यवस्था। सा च प्रकरणाद्धर्मज्ञानाम्। पदं विषयः। एते अक्रोधादयः सर्वेषामाश्रमाणां सेव्याः,न केवलं योगिनामेवेति धर्मज्ञानां समय इत्यर्थः। एते हि भाव्यमानाः क्रोधादीन् समूलघातं घ्नन्ति। अतश्च तान्यनुतिष्ठन् विधिना सार्वगामी भवतिः तान्यक्रोधादीनि तुष्टथन्तानि। विधिना यथाशास्त्रम्। अनुतिष्ठन् सार्वगामी सर्वस्मै हितः सार्वः आत्मा तं गच्छति प्राप्नोति। 'विधिने'ति वचनात्[3]'प्राणिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेत्।' इत्यादिके विषये अनृतवचनादावपि न दोष इति॥ ६॥

इति श्रीहरदत्तविरचितायामापस्तम्बधर्मसूत्रवृत्तावुज्ज्वलायां
त्रयोविंशी कण्डिका॥ २३॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां प्रथमप्रश्नेऽष्टमः पटलः॥ ८॥

---

१. अवरुध्य इति क० पु० २. इन्द्रियनिग्रहः इति ग० पु०

३. द्वित्रेष्वप्यादर्शपुस्तकेषु 'प्राणिनां तु वधो यत्र'' इत्येव मुद्रितपुस्तकेषु पाठस्समस्ति। (या० स्मृ० २. ८३) किञ्च मनौ एतत्समानार्थकश्लोक एवमुपलभ्यते—

शूद्रविट्क्षत्रविप्राणां यत्रर्तोक्तौ भवेद्वधः।
तत्र वक्तव्यमनृतं तद्धि सत्याद्विशिष्यते॥ इति। (म० स्मृ० ८. १०४)

अनयोरेकार्थत्वमभ्युपगम्यैव विज्ञानेश्वरेणाऽपि "यत्र वर्णिनां शूद्रविट्क्षत्रविप्राणां सत्यवचनेन वधस्सम्भाव्यते" इति याज्ञवल्कीयं वचनं व्याख्यातम्। अन्यैरपि विश्वरूपापरार्कादिभिः 'वर्णिनाम्' इत्येवं पाठः स्वीकृतः। अतोऽत्रापि 'वर्णिनां' इत्येव पाठस्साधीयानिति युक्तमुत्पश्यामः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नवमः पटलः

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् ॥ १ ॥

क्षत्रियं हत्वा गवां सहस्रं ब्राह्मणेभ्यो दद्यात्। किमर्थम्? वैरयातनार्थं वैरं पापं तस्य यातनं निर्हरणं तदर्थम् ऋषभश्चात्राऽधिकः सर्वत्र प्रायश्चित्तार्थ" (२४. ४)इति वक्ष्यति। तेन प्रायश्चित्तरूपमिदं दानम्। प्रायश्चित्तं च पापक्षयार्थम्। तत्किमर्थं वैरयातनार्थमित्युच्यते? केचिन्मन्यन्ते—नाऽभुक्तं क्षीयते कर्म पुण्यमपुण्ये च। प्रायश्चित्तं तु नैमित्तिकं कर्मान्तरं [1]यथा गृहदाहादौ क्षामवत्यादय इति। तान्निराकर्तुमिदमुक्तम्। श्रौतेऽप्युक्तं—[2]'दोषनिर्घातार्थानि भवन्ती'ति। अपर आह—यो येन हन्यते स हतो म्रियमाणस्तस्मिन्वैरं करोति—अपि नामाऽहमेनं जन्मान्तरेऽपि वध्यासमिति। तस्य वैरस्य यातनार्थमिदमिति प्रायश्चित्तार्थत्वमपि वक्ष्यमाणेन सिद्धमिति ॥ १ ॥

अनु०—क्षत्रिय की हत्या करने पर पाप को दूर करने के लिए एक सहस्र गायों का दान करे।

टि०—वैरयातनार्थम् का अर्थ हरदत्त ने 'पाप का निर्हरण-करने के लिए' किया है। प्रायश्चित्त पाप के नाश के लिए किया जाता है, तब 'वैरयातनार्थ' क्यों कहा गया है? प्रायश्चित्त नैमित्तिक कर्म होता है। कुछ लोगों के अनुसार वैरयातनार्थ का प्रयोग इस अर्थ से किया गया है कि मारा जाने वाला व्यक्ति मरते समय मरने वाले के प्रति वैर का भाव बना लेता है तथा दूसरे जन्म में बदला लेने का संकल्प करते हुए मरता है उसके इस वैर का शमन करने के लिए प्रायश्चित्त किया जाता है ॥ १ ॥

शतं वैश्ये ॥ २ ॥

वैश्ये हते गवां शतं दद्यात् ॥ २ ॥

अनु०—वैश्य का वध करने पर सौ गायों का दान करे ॥ २ ॥

दश शूद्रे ॥ ३ ॥

शूद्रे हते दश दद्यात्। गा इति प्रकरणाद्गम्यते ॥ ३ ॥

अनु०—शूद्र का वध करने पर दस गायों का दान करे ॥ ३ ॥

---

१. 'यस्य गृहान् दहत्यग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत् भागधेयेनैवैनँ शमयति नाऽस्याऽपरं गृहान् दहति' (तै० सं० २. २. २) इति विहिता अहिताग्नेर्यजमानस्य गृहे दग्धे तादृशगृहदाहनिमित्तका क्षामवदग्निदेवताकेष्टिः क्षामवतीष्टिः।

२. आप० श्रौ० ९. १. ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋषभश्चाऽत्राधिकः सर्वत्र प्रायश्चित्तार्थः ४

सर्वेष्वेतेषु निमित्तेषु ऋषभोऽत्यधिको देयः। न केवलं गा एव। इदं प्रायश्चित्तत्रयं मानवेन समानविषयम्। यथाऽऽह—

'अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः।
ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः॥
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम्।
वसन् दूरतरे ग्रामाद्वृक्षमूलनिकेतनः॥
एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः।
प्रमाप्य वैश्यं वृत्तस्थं दद्याद्वैकशतं गवाम्॥
एतदेव व्रतं कृत्स्नं षण्मासान्श्छूद्रहा चरेत्।
ऋषभैकादशा वाऽपि दद्याद्विप्राय गास्सिताः॥' इति॥ ४॥

अनु०—इन सभी निमित्तों में प्रायश्चित के लिए गायों के अतिरिक्त एक साँड़ का भी दान करे॥ ४॥

स्त्रीषु चैतेषामेवम्॥ ५॥

एतेषां क्षत्रियादीनां स्त्रीषु च हतासु एवमेव प्रायश्चित्तं यथा पुरुषेषु॥ ५॥

अनु०—इन (क्षत्रिय आदि) वर्णों की स्त्रियों का वध करने पर भी वैसा ही प्रायश्चित्त करना होता है जैसा इन वर्णों के पुरुषों के वध के संबद्ध में विहित है॥ ५॥

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाऽभिशस्तः॥ ६॥

उक्तेषु यौ पूर्वौ वर्णौ क्षत्रियवैश्यौ तयोर्यो वेदाध्यायः अधीतवेदः तं हत्वा अभिशस्तो भवति अभिशस्त इति ब्रह्मघ्नोऽभिधानम् सवनगतं वा,तयोरेव वर्णयोः यः सवनगतः सवनशब्देन न प्रातस्सवनादीन्युच्यन्ते,नापि यागमात्रम्। किं तर्हि? सोमयागः। तत्र यो दीक्षितः सवनगतः'ब्राह्मणो वा एष जायते यो दीक्षित'इति दर्शनात्। तं च हत्वाऽभिशस्तो भवति। पूर्वयोर्वर्णयोरिति किम्! ब्राह्मण मा भूत्। इष्यते ब्राह्मणे। वक्ष्यति च 'ब्राह्मणमात्रं 'चे'(२४.७.)ति। एवं तर्हि शूद्रे भूत्। न शूद्रो वेदाध्यायः सवनगतोऽवा भवति। इदं तर्हि प्रयोजनं पूर्वयोर्वर्णयोरेव यथा स्यात्तयोरेव यावनुलोमौ[2] करणाम्बष्ठौ तयोर्मा भूदिति। तेनान्ये वर्णधर्मा अनुलोमानामपि भवन्ति॥ ६॥

१, म० स्मृ० ११. १२७–१३०

२. इतरपुस्तकेषु "सवर्णाम्बष्ठौ'; इत्येव पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—प्रथम दो (क्षत्रिय और वैश्य) वर्णों के वेद के विद्वान् पुरुषों का अथवा इन दोनों वर्णों के सोमयाग में दीक्षित पुरुष का वध करने वाला अभिशस्त होता है।

टि०—अभिशस्त का अर्थ है 'ब्रह्मघ्न' महापातकी। यह नियम इन दोनों वर्णों के अनुलोम सम्बन्ध से उत्पन्न करण और अम्बष्ठ के विषय में नहीं होता—हरदत्त की व्याख्या ॥ ६ ॥

ब्राह्मणमात्रं च ॥ ७ ॥

हत्वाऽभिशस्तो भवति। मात्रग्रहणान्नाऽभिजर्नाविद्यासंस्काराद्यपेक्षा ॥

अनु०—वर्णमात्र से ही ब्राह्मण पुरुष की हत्या करने वाला अभिशस्त होता है।

टि०—मात्र का व्यवहार इस अर्थ से किया गया है कि उसका वेदज्ञ या विद्वान होना या संस्कार युक्त होना आवश्यक नहीं है ॥ ७ ॥

गर्भं च तस्याऽविज्ञातम् ॥ ८ ॥

तस्य ब्राह्मणमात्रस्य। गर्भं च स्त्रीपुन्नपुंसकभेदेनाऽविज्ञातम्। हत्वाभिशस्तो भवति ॥ ८॥

अनु०—वर्णमात्र से ही ब्राह्मण पुरुष की या गर्भ की, चाहे उस गर्भ का लिङ्ग अज्ञात क्यों न हो, हत्या करने वाला अभिशस्त होता है ॥ ८ ॥

आत्रेयीं च स्त्रियम् ॥ ९ ॥

"ऋतुस्नातामात्रेयीमाहु'रिति वसिष्ठः। तस्येति वर्तते। आत्रेयीं च ब्राह्मणस्त्रियं हत्वाऽभिशस्तो भवति। ब्रह्महा भवति। सम्भवत्यस्यां ब्राह्मणगर्भ इति। अत्रिगोत्रजा आत्रेयीत्यन्ये ॥ ९ ॥

अनु०– आत्रेयी (ऋतुस्नाता) ब्राह्मणस्त्री का वध करने वाला अभिशस्त होता है।

टि०—कुछ लोग आत्रेयी का अर्थ अत्रिगोत्र में उत्पन्न स्त्री करते हैं ॥ ९ ॥

तस्य निर्वेषः ॥ १० ॥

तस्य सर्वप्रकाराभिशस्तस्य निर्वेषः प्रायश्चित्तं वक्ष्यते ॥ १० ॥

अनु०—जब अभिशस्त व्यक्ति के प्रायश्चित्त का विधान किया जायगा ॥ १० ॥

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽर्धशाणोपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ ११ ॥

कृत्वेति वचनान्न परकृता कुटी ग्राह्या। वाक् यता नियता येन स वाग्यतः वाचंयमः। आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः। शवशिरः

१. वि० ध० १०. ९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्वजो यस्य स शवशिरोध्वजः। सकारलोपश्छान्दसः। स्वव्यापादितस्य शिरो ध्वजदण्डस्याग्रे प्रोतं कृत्वेत्यर्थः। यस्य कस्य चिच्छवस्येत्यन्ये। शणस्य विकारः शाणी पटी तस्या अर्धमर्धशाणी तस्याः पक्षमर्धशाणीपक्षं आयामविस्तारयोरुभयोरप्यर्धम्। अधो नाभि उपरिजानु च यथा भवति तथा तावन्तं प्रदेशमाच्छाद्य। सापेक्षत्वात् 'ग्रामे प्रतिष्ठेते' (२४.१४)ति वक्ष्यमाणेन सम्बन्धः। मध्ये क्रियान्तरविधिः ॥ ११ ॥

अनु०--वन में एक कुटी बनाकर, वाणी को रोककर, कुण्डे के ऊपर मनुष्य की खोपड़ी रखकर तथा शरीर का नाभि से घुटने तक का भाग सन के वस्त्र के चौथाई भाग से आच्छादित कर रहे ॥ ११ ॥

तस्य पन्था अन्तरा वर्त्मनी ॥ १२ ॥

तस्य ग्रामं प्रविशतः वर्त्मनी अन्तरा शकटादेर्गत्मनोर्मध्ये पन्था वेदितव्यः। अपर आह—यत्र रथ्यादावुभयोः पार्श्वयोर्वर्त्मनी भवतः तत्र तयोर्मध्येन सूकरादिपथेन सञ्चरेदिति ॥ १२ ॥

अनु०—(ग्राम में प्रवेश करते समय गाड़ी इत्यादि की) दोनों लीकों के बीच का भाग उसका मार्ग होवे ॥ १२ ॥

दृष्ट्वा चाऽन्यमुत्क्रामेत् ॥ १३ ॥

अन्यमार्यं दृष्ट्वा पथ उत्क्रामेत्। तत्र कौटिल्यः[1] 'पञ्चारत्नयो रथपथश्चत्वारो हस्तिपथः द्वौ क्षुद्रपशुमनुष्याणा'मिति। तेन मनुष्येषु द्वौ हस्तावुत्क्रामेदिति॥१३॥

अनु०—दूसरे (आर्य) व्यक्ति को देखकर मार्ग छोड़कर हट जावे।

टि०—कौटिल्य के अनुसार दो हाथ दूर हो जावे ॥ १३ ॥

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत ॥ १४ ॥

खर्परमात्रं खण्डम्। [2]लोहितकमनाप्रीतम्। एवम्भूतं शरावं भिक्षापात्रं गृहीत्वा ग्रामे प्रतिष्ठेत। ग्रामं गच्छेत् ॥ १४ ॥

अनु०—घटिया किस्म की धातु के पात्र का खर्पर (भिक्षापात्र के रूप में) लेकर गाँव में प्रवेश करे ॥ १४ ॥

कोऽभिशस्ताया भिक्षामिति[3] सप्ताऽगारं चरेत् ॥ १५ ॥

[4]अभिशस्तो ब्रह्महा। तस्मै मह्यं को धार्मिको भिक्षां ददातीति उच्चैर्ब्रुवाणः सप्ताऽगाराणि चरेत्। सप्तग्रहणमधिकनिवृत्त्यर्थम्। द्वित्रेष्वेवागारेषु यदि पर्याप्तं लभ्यते तदा तावत्येव ॥ १५ ॥

---

१. कौटि० अर्थ० २. ४. २२ २. लोहितं मनाक्ताम्रम् इति० क० पु०
३. सप्तागाराणि इति क० पु० ४. अभिशस्ते को धार्मिकः, इत्येव पाठः ग० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०--'मुझ अभिशस्त को कौन भिक्षा देगा' ऐसी पुकार लगाते हुए सात घरों में भिक्षाटन करे ॥ १५ ॥

सा वृत्तिः ॥ १६ ॥

सप्तस्वगारेषु या च यावती लभ्यते सैव वृत्तिः अपर्याप्ताऽपि ॥ १६ ॥

अनु०--इस प्रकार जो कुछ मिले उसी से जीविका निर्वाह करे (भले ही इस प्रकार प्राप्त भोजन अपर्याप्त होवे ॥ १६ ॥

अलब्ध्वोपवासः ॥ १७ ॥

यदि सप्तागारेषु न किञ्चिल्लभ्यते तदोपवास एव तस्मिन्नहनि ॥

अनु०--(यदि सात घरों में भिक्षाटन करने पर) कुछ भी न प्राप्त हो तो उपवास करे ॥ १७ ॥

गाश्च रक्षेत् ॥ १८ ॥

एवं प्रायश्चित्तं कुर्वन्नहरहर्गाश्च रक्षेत् ॥ १८ ॥

अनु०—इस प्रकार प्रायश्चित्त करते हुए गायों की रक्षा करे ॥ १८ ॥

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः ॥ १९ ॥

तासां गवां निष्क्रमणसमये प्रवेशनसमये च द्वितीयो ग्रामेऽर्थः प्रयोजनम् । भिक्षार्थं प्रथममुक्तम् । नाऽन्यथा ग्रामं प्रविशेदित्युक्तं भवति ॥

अनु०—जब गायें गाँव से निकलती हैं और प्रवेश करती हैं वह उसके लिए भिक्षार्थ ग्राम में दुबारा प्रवेश करने का समय होता है ॥ १९ ॥

द्वादश वर्षाणि[1] चरित्वा सिद्धः सद्भिस्सम्प्रयोगः ॥ २० ॥

एवं द्वादश वर्षाणि व्रतमेतच्चरित्वा सद्भिः सम्प्रयोगः कर्तव्यः । सद्भिः सह सम्प्रयुज्यते येन विधिना स कर्तव्यः । स शिष्टाचारे शास्त्रान्तरे च सिद्धः स उच्यते—कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत् । सा यद्यागत्य श्रद्दधाना भक्षयति तदा सम्यगनेन व्रतं चरितमिति जानीयात्, अन्यथा नेति ॥ २० ॥

अनु०—बारह वर्ष तक यह प्रायश्चित्त करने के बाद उस शास्त्रोक्त शिष्टाचार को करे जिसके द्वारा वह पुनः सज्जनों के समाज में प्रवेश योग्य हो जाय ॥२०॥

आजिपथे वा कुटिं कृत्वा ब्राह्मणगव्योऽपजिगीषमाणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः ॥ २१ ॥

---

१. 'व्रतमेतदिति अधिकं पुस्तके०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सङ्ग्रामेण जेतव्या दस्युवो येन पथा ग्रामं प्रविश्य गवादिकमपहृत्याऽपसरन्ति स आजिपथः। तस्मिन्वा कुटिं कृत्वा वसेत्। किं चिकीर्षन्! ब्राह्मणगव्यः[1] 'वा छन्दसी'ति पूर्वसवर्णाभावे यणादेशः। ब्राह्मणगवीरपजिगीषमाणः दस्यूनपजित्य प्रत्याहर्तुमिच्छन्। एवं वसन् दस्युभिर्ह्रियमाणं गवादिकमुद्दिश्य तैर्युद्धं कुर्वन् त्रिः प्रतिराद्धः तैरपजितः अपजित्य वा तान् गवादिकं प्रत्याहृत्य ब्राह्मणेभ्यो दत्त्वा मुक्तो भवति तस्मादेनसः। द्वादशवार्षिके प्रवृत्तस्येदम्। एवमुत्तरमपि ॥ २१ ॥

अनु०—अथवा (बारह वर्ष तक उपर्युक्त प्रायश्चित्त करने के बाद) चोरों के मार्ग में कुटी बनावे और चोरों से ब्राह्मणों की अपहृत गायों को छुड़ाने का प्रयत्न करता रहे, तीन बार परास्त होने पर अथवा उन पर विजय पाने पर वह पाप से मुक्त हो जाता है ॥ २१ ॥

आश्वमेधिकं वाऽवभृथमवेत्य मुच्यते ॥ २२ ॥

अथ वाऽश्वमेधावभृथे स्नात्वा मुच्यते ॥ २२ ॥

अनु०—अथवा अश्वमेध का अवभृथ स्नान करने पर पाप दूर होता है ॥ २२ ॥

धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव ॥ २३ ॥

धर्मस्याऽग्निहोत्रादेः, अर्थस्य च कुड्यकरणादेः[2] युगपद्यत्र सन्निपातः तत्रोभयानुग्रहासम्भवे धर्मलोपेन योऽर्थं गृह्णाति तस्याऽप्येतदेव प्रायश्चित्तम्। अथवा धर्मं हित्वाऽर्थहेतोः कौटसाक्ष्यादि करोति तद्विषयमेतत् अत्र गौतमः—

[3]'कौटसाक्ष्यं राजगामि पैशुनं गुरोरनृताभिशंसनं महापातकसमानी'ति। मनुरपि—

[4]'अनृतं च समुत्कर्षे राजगामि च पैशुनम्।
गुरोश्चाऽलीकनिर्बन्धः समानि ब्रह्महत्यया' ॥ इति ॥ २३ ॥

अनु०—धर्म और अर्थ दोनों का अन्तर्द्वन्द्व उपस्थित होने पर जो व्यक्ति अर्थ अर्थात् भौतिक लाभ का चयन करता है (और धर्म की उपेक्षा कर देता है) उसके लिए भी यही प्रायश्चित्त होता है ॥ २३ ॥

गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् ॥ २४ ॥

गुरुः पित्राचार्यादिः। श्रोत्रियोऽधीतवेदः। स यदि कर्मसमाप्तो भवति सोमान्तानि कर्माणि समाप्तानि यस्य स कर्मसमाप्तः। तौ हत्वा एतेनैवाऽनन्त-

१. पा० सु० ६. १. १०६
२. कुड्यकरणादेः इति नास्ति क०च० पु०
३. गौ० ध० २०. ९
४. म० स्मृ० ११. ५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोक्तेन विधिना ओत्तमादुच्छ्वासात् । उत्तम उच्छासः प्राणवियोगः । आ तस्मा-च्चरेत् ॥ २४ ॥

अनु०—गुरु (पिता, आचार्य आदि), वेद के विद्वान् तथा सोमयज्ञ का अन्तिम कर्म समाप्त कर लेने वाले श्रोत्रिय का वध करने वाला व्यक्ति इसी प्रायश्चित्त का आचरण अन्तिमश्वास रहते समय तक करे ॥ २४ ॥

नास्याऽस्मिल्लँोके प्रत्यापत्तिर्विद्यते ॥ २५ ॥

अश्वमेधावभृथादिषु सम्भवत्स्वपि अस्याऽस्मिंल्लोके अस्मिन् जीविते प्रत्यापत्तिः शुद्धिर्नास्तीत्यर्थः ।

अनु०—उसकी पाप से मुक्ति इस संसार में नहीं होती ॥ २५ ॥

कल्मषं तु निर्हण्यते ॥ २६ ॥

मृतस्य कल्मषं निर्हण्यते । [1]तन पुत्रादिभिः संस्कारादिः कर्तव्य इति भावः । अन्ये तु पूर्वं सूत्रे तन्निवृत्त्यर्थं मन्यन्ते । प्रत्यापत्तिः पुत्रादिभिः पित्रादिभावेन सम्बन्ध इति ॥ २६ ॥

अनु०—मृत्यु के बाद उस व्यक्ति के पाप दूर हो जाते हैं ॥ २६ ॥

इति हरदत्तविरचितायामापस्तम्बसूत्रवृत्तौ चतुर्विंशी कण्डिका ॥ २४ ॥

अथ पञ्चविंशी कण्डिका

गुरुतल्पगामी सवृषणं शिश्नं परिवास्याऽञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् ॥ १ ॥

गुरुरत्र पिता, नाऽऽचार्यादिः । तल्पशब्देन शयनवाचिना भार्या लक्ष्यते । सा च साक्षाज्जननी[2] । न तत्सपत्नी । तां गत्वा सवृषणं साण्डं शिश्नं परिवास्य क्षुरादिना छित्वाऽञ्जलावाधाय दक्षिणां दिशं व्रजेत् । अनावृत्तिम् आवृत्तिर्न क्रियते यस्यां तां दिशमनावर्तमानो गच्छेत् । अथ ये [3]दक्षिणस्योदधेस्तीरे वसन्ति तेऽपि यावद्देशं गत्वा उदधिमेव प्रवेक्ष्यन्ति । मरणं ह्यत्र विवक्षितम् । अत्र सर्वतः—

[4]पितृदारान् समारुह्य मातृवर्ज नराधमः ।
भगिनीं मातुराप्तां वा स्वसारं वाऽन्यमातृजाम् ॥
एता गत्वा स्त्रियो मोहात्[5] तप्तकृच्छ्रं समाचरेत् ॥ इति ।

१. तेन पुत्रादिभिस्संसरकाराद्यौर्ध्वदेहिकाः कार्या इति भावः० इति ख० पु०
२. तत्सपत्नी वा इति ग० पु०
३. अथेति नास्ति ग० पु०
४. संव० स्मृ० १५८. १५९
५. तप्तकृच्छ्रान् षडाचरेत्, इति. छ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारदस्तु—

'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा।
[1]पितृव्यपत्नी शिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गत्वा गुरुतल्पग उच्यते।
शिश्नस्योत्कृन्तनं तत्र नाऽन्यो दण्डो विधीयते ॥ इति ॥ १ ॥

अनु०—गुरु पत्नी से मैथुन करने वाला महापातकी आण्डकोष सहित जननेन्द्रिय को काटकर अपनी अञ्जलि में रखकर बिना रुके दक्षिण दिशा को तब तक चलता जाय जब तक गिर कर मृत्यु नहीं प्राप्त कर लेता।

टि०—गुरु से यहाँ पिता से तात्पर्य है। आचार्यादि से नहीं। तल्प का लाक्षणिक अर्थ भार्या है। यहाँ साक्षात् मातृगमन से अभिप्राय है, पिता की सपत्नियों से भी नहीं। दक्षिण समुद्र के किनारे निवास करने वाला व्यक्ति भी दक्षिण की ओर ही चले और समुद्र में प्रवेश करके मृत्यु प्राप्त करे ॥ १ ॥

ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात् ॥ २ ॥

आयसी ताम्रमयी वा अन्तस्सुषिरा स्त्रीप्रकृतिरत्र सूर्मिः। तां ज्वलितामग्नौ तप्ताम्। परिष्वज्य समाप्नुयात् समाप्तिं गच्छेत् म्रियेत ॥ २ ॥

अनु०—अथवा जलती हुई (लोह या ताँबे की) स्त्री प्रतिमा का आलिङ्गन करके जीवन को समाप्त करे ॥ २ ॥

सुरापोऽग्निस्पर्शां सुरां पिबेत् ॥ ३ ॥

'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।'

तस्याः पाता सुरापः। सः अग्निस्पर्शां [2]अग्निक्वथितां सुरां पिबेत्। तया दग्धकायः शुद्धयति ॥ ३ ॥

अनु०—सुरापान करने वाला अग्नि पर खौलायी गई सुरा पिए ॥ ३ ॥

स्तेनः प्रकीर्णकेशोंऽसे मुसलमाधाय राजानं गत्वा कर्माऽऽचक्षीत। तेनैनं हन्याद्वधे मोक्षः ॥ ४ ॥

स्तेनो ब्राह्मणस्वर्णहारी। अंसे द्वे स्कन्धे। मुसलमाधाय आयसं खादिरं वा धारयन्। राजानं गत्वा कर्माऽऽचक्षीत–एवंकर्माऽस्मि, शाधि मामिति। स तेन मुसलेन एनं स्तेनं हन्यात्, यथा मृतो भवति।[3] वधेन स्तेयात् मोक्षो भवति ॥ ४ ॥

---

१ पितृव्यसखिशिष्यस्त्री इति. क० पु० ६ २ अतिश्रपितां इति. ख० ग० ५०
३. वधे सति स्तेनस्य मोदो मुक्तिर्भवत्येनसो नान्यथा इति. क० च० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—चोर अपने केश बिखेरे हुए तथा कंधे पर मुसल रखकर राजा के पास जावे और उससे अपना कर्म बतावे। राजा उस मुसल से चोर के ऊपर प्रहार करे, उससे यदि उसका वध हो जाय तो चोरी के पाप से मुक्ति हो जाती है ॥४॥

अनुज्ञातेऽनुज्ञातारमेनः स्पृशति ॥ ५ ॥

यदि राजा दयादिना तमनुजानीयात् गच्छेति, तदा तमनुज्ञातारं राजनमेव तदेनः स्पृशति ॥ ५ ॥

अनु०—यदि राजा उसे क्षमा कर दे तो उसका पाप क्षमा करने वाले राजा को ही लग जाता है ॥ ५ ॥

अग्निं वा प्रविशेत् ॥ ६ ॥

उत्तरसृजु ॥ ६ ॥

अनु०—अथवा स्वयं को अग्नि में झोंक दे ॥ ६ ॥

तीक्ष्णं वा तप आयच्छेत् ॥ ७ ॥

तीक्ष्णं तपः महापराकादि। तद्वा आयच्छेत् आवर्तयेत् ॥ ७ ॥

अनु०—अथवा (महापराक आदि) कठोर तप का बार बार आचरण करे ॥७॥

भक्तापचयेन वाऽऽत्मानं समाप्नुयात् ॥ ८ ॥

भक्तमन्नम्। तस्याऽपचयो ह्रासः। प्रथमे दिने यावन्तो ग्रासाः ते एकेन न्यूना द्वितीये। एवं तृतीयादिष्वपि आ एकस्माद् ग्रासात्। तत्रापि यदि न समाप्तिः ततस्तत्रैव ग्रासपरिमाणापचयः कर्त्तव्यः। एवं भक्तापचयेनाऽऽत्मानं समाप्नुयात् समापयेत् ॥ ८ ॥

अनु०—अथवा भोजन में प्रतिदिन ह्रास करते हुए अपना जीवन समाप्त कर दे ॥ ८ ॥

कृच्छ्रसंवत्सरं वा चरेत् ॥ ९ ॥

अथ वा संवत्सरमेकं नैरन्तर्येण कृच्छ्रांश्चरेत्। एषामेनस्सु गुरुषु गुरूणि, लघुषु लघूनीति व्यवस्था ॥ ९ ॥

अनु०—अथवा एक वर्ष तक निरन्तर कृच्छ्र व्रत करे ॥ ९ ॥

अथाऽप्युदाहरन्ति ॥ १० ॥

अस्मिन्नेव विषये पुराणश्लोकमप्युदाहरन्तीत्यर्थः ॥ १० ॥

अनु०—इस विषय में इन श्लोकों को भी उद्धृत किया जाता है ॥ १० ॥

स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा ब्रह्महत्यामकृत्वा।
चतुर्थकाला मितभोजिनः स्युरपोऽभ्यवेयुः सवनानुकल्पम्।

---

१. अपोऽभ्युपेयुः इति. क० छ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थानासनभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुदन्ते ॥ ११ ॥

ब्रह्महत्याव्यतिरिक्तानि स्तेयादीनि कृत्वा चतुर्थकालाश्चतुर्थो भोजनकालो येषाम्। यथा–अद्य दिवा भुङ्क्ते श्वो नक्तमिति, ते तथोक्ताः। तथापि मितभोजिनः न मृष्टाशिनः। [1]अपोऽभ्यवेयुः भूमिगतास्वप्सु स्नानं कुर्युः। सवनानुकल्पं; तथा सवनानि प्रातस्सवनादीन्यनुक्लृप्तानि अनुसृतान्यनुष्ठितानि भवन्ति तथा[2] त्रिषवणमित्यर्थः। तिष्ठेयुरहनि, रात्रावासीरन्। एवं स्थानासनाभ्यां विहरन्तः कालक्षेपं कुर्वन्तः। एते त्रिभिर्वर्षैस्तत्पापमपनुदन्ते ॥ ११ ॥

अनु०—चोरी करने वाला सुरा पान करनेवाला गुरुपत्नीगामी प्रत्येक चौथे भोजन के समय थोड़ा भोजन करे तीन सवनों के समय स्नान करे, दिन खड़े होकर तथा रात्रि बैठे-बैठे बितावे। तीन वर्ष में ये कर्म उसके पाप को दूर कर देते हैं किन्तु ब्राह्मण की हत्या करने वाला इसका अपवाद होता है ॥ ११ ॥

प्रथमं वर्णं परिहाप्य प्रथमं वर्णं हत्वा सङ्ग्रामं गत्वाऽवतिष्ठेत तत्रैनं हन्युः ॥ १२ ॥

प्रथमो वर्णो ब्राह्मणः। तं हत्वा सङ्ग्रामं गत्वा सेनयोर्मध्येऽवतिष्ठेत। किं सर्वे? नेत्याह—प्रथमं वर्णं परिहाप्य ब्राह्मणवर्जमितरो वर्णः क्षत्रियादिरित्यर्थः। तत्र स्थितमेनं ते सैनिका हन्युः, त एनं हतं विदध्युः। अघ्नन्त एनस्विनः स्युः, यथा राजा स्तेनम्। स मृतश्शुद्ध्यति ॥ १२ ॥

अनु०—यदि प्रथम वर्ण को छोड़कर किसी अन्य वर्ण के व्यक्ति ने प्रथम वर्ण अर्थात् ब्राह्मण का वध किया है, तो वह युद्ध में जाकर दोनों पक्षों के बीच खड़ा हो जायं वहाँ सैनिक उसका वध करे तो मरने पर वह पाप से शुद्ध हो जाता है ॥१२॥

अपि वा लोमानि त्वचं मांसमिति हावयित्वाऽग्निं प्रविशेत् ॥ १३ ॥

अनन्तरोक्त एव विषये प्रायश्चित्तान्तरम्। इतिशब्दो लोहितादीनामप्युपलक्षणार्थः। आत्मनो लोमादीन्युत्कृत्य पुरोहितेन हावयित्वा होमं कारयित्वा पश्चात् स्वयं तस्मिन्नग्नौ प्रविशेत्, मृतः शुद्ध्यति। तत्राग्निमुपसमाधाय जुहुयात्[3] "लोमानि मृत्योर्जुहोमि, लोमभिर्मृत्युं वासये स्वाहा। त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये स्वाहा॥ लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं

१. अपोऽभ्युपेयुः इति. छ० पु०

२. सोमयागे प्रातर्मध्यन्दिने सायमिति त्रिषु कालेषु प्रातस्सवनं माध्यन्दिनं सवनं तृतीयसवनं इति सवनत्रयमनुस्यूततयाऽनुष्ठीयते तद्वत् कालत्रयेऽपि स्नानं कुर्युरित्यर्थः।

३ व० ध० २० २६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासये स्वाहा । स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्युं वासये स्वाहा । मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वासये स्वाहा । अस्थीनि मृत्योर्जुहोमि अस्थभिर्मृत्युं वासये स्वाहा । मज्जानं मृत्योर्जुहोमि मज्जभिर्मृत्युं वासयेस्वाहा । मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासये स्वाहा" । इत्येते मन्त्राः वसिष्ठेन पठिताः ॥१३॥

अनु०--अथवा अपने शरीर से रोम त्वचा मांस निकलवाकर अग्नि से हवन कराये और स्वयं को अग्नि में झोक दे ॥ १३ ॥

वायसप्रचलाकर्बहिणचक्रवाकहंसभासमण्डूकनकुलडेरिका-
श्वहिंसायां शूद्रवत्प्रायश्चित्तम् ॥ १४ ॥

वायसः काकः । प्रचलाकः कामरूपी कृकालासः । बर्हिणो मयूरः । चक्रवाको दिवा मिथुनचरः,रात्रो विरही । हंसो मानसवासी । भासो गृध्रविशेषः । नकुलमण्डूकादयः प्रसिद्धाः । डेरिका गन्धमूषिका । एतेषां समुदितानां वधे शूद्रवत्प्रायश्चित्तम् । प्रत्येकं वधे तु कल्प्यम् । केचित् प्रत्येकं वध एतत्प्रायश्चित्तमित्याहुः ॥ १४ ॥

अनु--कौआ गिरगिट मोर चक्रवाक हंस भासनाम का पक्षी मेढक नेवला डेरिका अथवा कुत्ते की हत्या करने पर वही प्रायश्चित्त करे जो शूद्र की हत्या पर किया जाता है ।

टि०—कुछ धर्मज्ञ इनके सबका वध करने पर शूद्रवध के समान प्रायश्चित्त मानते हैं कुछ लोगों के अनुसार इनमें से प्रत्येक के वध पर शूद्रवध के समान प्रायश्चित्त विहित है ॥ १४ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने पञ्चविंशी कण्डिका ॥ २५ ॥

अथ षड्विंशी कण्डिका

धेन्वनडुहोश्चाऽकारणात् ॥ १ ॥

धेनुः पयस्विनी गौः । अनड्वान् अनोवहनयोग्यो बलीवर्दः । तयोः कारणमन्तरेण हिंसायां शूद्रवत्प्रायश्चित्तं कर्तव्यम् । कारणं कोपो मांसेच्छा वा । ताभ्यां विना, अबुद्धिपूर्वमित्यर्थः । बुद्धिपूर्वं तु[1] 'गाश्च वैश्यव'दित्यादि स्मृत्यन्तरे द्रष्टव्यम् ॥ १ ॥

अनु०—विना कारण के दूध देने वाली गौ या बैल की हत्या करने पर शूद्र की हत्या के प्रायश्चित्त के समान ही प्रायश्चित्त करना होता है ।

धुर्यवाहप्रवृत्तो चेतरेषां प्राणिनाम् ॥ २ ॥

१, गौ० ध० २३. १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धुरं वहतीति धुर्यो बलीवर्दः । तेन वोढुं शक्त्या धुर्यवाहः । तावत्सु हिंसायाः प्रवृत्तौ सत्याम् इतरेषां प्राणिनां केवलं प्राणा एव येषां नाऽस्थीनि तेषां हिंसायां शूद्रवत्प्रायश्चित्तमिति । अत्र गौतमः [1]"अस्थन्वतां सहस्रं हत्वा अनस्थिमतामनुडुद्भारे चे'ति ॥ २ ॥

अनु०—अन्य दूसरे केवल प्राणियों का (जिसमें अस्थियाँ न होंवे) बैल के बोझ जितनी मात्रा में वध करने पर शूद्र के वध के प्रायश्चित्त के बराबर प्रायश्चित्त करना होता है ॥ २ ॥

अनाक्रोश्यमाक्रुश्याऽनृतं वोक्त्वा त्रिरात्रम-क्षीराक्षारलवणभोजनम् ॥ ३ ॥

येन यो न कथञ्चनाऽऽक्रोशमर्हति स पित्राचार्यादिरनाक्रोश्यः । तमाक्रुश्य अनृतं वोक्त्वा पातकोपातकवर्जं, त्रिरात्रं क्षीरादि भोजने वर्जयेत् । क्षीरग्रहणेन तद्विकाराणां दध्यादीनामपि[2] ग्रहणमित्याहुः ॥ ३ ॥

अनु०—जिस व्यक्ति के ऊपर किसी प्रकार आक्रोश नहीं करना चाहिए ऐसे पूज्य व्यक्ति पर आक्रोश करने वाला. (छोटी बात पर) असत्य भाषण करने वाला तीन दिन तक दूध मसाले और नमक के भोजन का परहेज करे ॥ ३ ॥

शूद्रस्य सप्तरात्रमभोजनम् ॥ ४ ॥

शूद्रस्त्वनन्तरोक्तविषये सप्तरात्रमुपवसेत् ॥ ४ ॥

अनु०—यदि शूद्र वर्ण का व्यक्ति यही अपराध करे तो वह सात दिन तक उपवास करे ॥ ४ ॥

स्त्रीणां चैवम् ॥ ५ ॥

क्षत्रियं हत्वे' (२४.१.) त्यादिषु अनृतवचनान्तेषु निमित्तेषु यानि प्रायश्चित्तान्युक्तानि तानि स्त्रीणामप्येवमेव कर्तव्यानि । एतत् 'चत्वारो वर्णा' इति जात्याभिधानादेव प्राप्तं[3] सन्नियमार्थमुच्यते—अत ऊर्ध्वं पुरुषस्यैव न स्त्रीणामिति । अपर आह—जात्याभिधानादेव सिद्धे अतिदेशार्थं वचनम् । अतिदेशेषु चाऽर्धं प्राप्यते इति स्मार्तो न्यायः । तेन स्त्रीणामर्धप्राप्त्यर्थं वचनमिति । तथा च भार्गवः—

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ॥' इति ॥ ५ ॥

अनु०—स्त्रियां भी उपर्युक्त प्रायश्चित्त करे ।

---

१. गौ० ध० २३. २०   २. वर्जनमाहुः इति. क० पु०

३. प्रायश्चित्तं प्राप्तम्. तन्नियम्' इति क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टि०—इसके बाद के प्रायश्चित्त पुरुष ही करें स्त्रियां नहीं ॥ ५ ॥

येष्वाभिशस्त्यं तेषामेकाङ्गं छित्वाऽप्राणिहिंसायाम् ॥ ६ ॥

येषु हतेषु 'सवनगतं वाऽभिशस्त, (३४.९) ईत्यादिना अभिशस्तत्वमुक्तं तेषामेकाङ्गं छित्वा शूद्रवत्प्रायश्चित्तं कुर्यात्। अप्राणिहिंसायां यदि छेदनेन तस्याङ्गस्य शक्ति[1]र्न हन्यते ॥ ६ ॥

अनु०—जिन पुरुषों की हत्या करने पर हत्या करने वाला अभिशस्त हो जाता है, उन व्यक्तियों के शरीर का एक अंग काटने पर, यदि उनका प्राण संकटापन्न नहीं होता (उस अंग की शक्ति नष्ट नहीं होती) तो शूद्र के वध के समान प्रायश्चित्त करना होता है ॥ ६ ॥

[2]अनार्यवपैशुनप्रतिषिद्धाचारेष्वभक्ष्या भोज्यापेयप्राशने शूद्रायां च रेतस्सिक्त्वाऽयोनौ च दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वाऽब्लिङ्गाभिरप उपस्पृशेद्वारुणीभिर्वाऽन्यैर्वा पवित्रमन्त्रैर्यथा कर्माभ्यासः ॥ ७ ॥

आर्याणां भाव आर्यम्। तद् यस्मिन्नाचारेऽस्ति तदार्यवम्। मत्वर्थीयो वप्रत्ययः। ततोऽन्यदनार्यवम्। असत्यभाषणादि। पैशुनं परदोषकथनं राजगामि प्रतिषिद्धाचारः 'ष्ठीवनमैथुनयोः कर्माऽप्सुपर्जये' (३०.१९) दित्यादेरनुष्ठानम्। अभक्ष्यं वृथाकृसरादि। अभोज्यं केशकीटाद्युपहतम्। अपेयम् अनिर्दशायाः गोः क्षीरादि। एतेषां प्राशने शूद्रायां च वेश्याप्रभृतौ रेतः सिक्त्वा। अयोनौ च जलादौ रेतः सिक्त्वा। दोषवच्च कर्म श्रौतमाभिचारिकम्। अभिसन्धिपूर्वं बुद्धिपूर्वं कृत्वा अनभिसन्धिपूर्वं वा परपीडादिकरं कर्म कृत्वा। अब्लिङ्गाभिः [3]''आपो हि ष्ठा मयोभुव' इति तिसृभि[4] हिरण्य वर्णाश्शुचयः पावका' इति चतसृभिरप उपस्पृशेत्। तूष्णीं प्रथमं स्नात्वा पश्चादेतैर्मन्त्रैर्मार्जनं कुर्यात्। वारुणभिर्वा [5]'इमं मे वरुण, तत्त्वा यामि; 'त्वन्नो अग्ने' इत्येताभिरन्यैर्वा पवित्रैः [6]'पवमानस्सुवर्जनः' इत्येतेनानुवाकेन [7]शुद्धवतीभिः [8]'तरत्समन्दीयेन च। यथा

---

१. न भज्यते. इति. घ० पु०। २. गौतमीये २६. १५ सूत्रं द्रष्टव्यम्।

३. तै० ५. ६. १० यो वश्शिवतमो रसः, तस्मा अरं गमाम वः, इत्यग्रिमे ऋचौ।

४. तै० सं० ६. ६. १ यासां राजा वरुणः, यसां देवा दिवि शिवेन मा चक्षुषा इत्यग्रियं ऋक्त्रयम्।

५. तै० सं० ४. २. ११ ६. तै० ब्रा० १. ४. ८

७. ऋ० सं० ८. ९५. ६ ८. ऋ० सं० ८. ९५. ७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्माभ्यासः[1] कृतः तावत्कृत्वो उपस्पृशेत्। रहस्यप्रायश्चित्तमेतदित्याहुः ॥७॥

अनु०—अनार्य आचरण का दोषी, दूसरों पर दोष लगाने वाला, निषिद्ध आचार का अनुसरण करने वाला, वर्जित वस्तु का भक्षण और पान करने वाला, शूद्रा स्त्री से मैथुन करके, योनि के अतिरिक्त अन्यत्र (अस्वाभाविक) वीर्य स्खलन करके दोषयुक्तजानबूझकर (शत्रु आदि के नाश के लिए अथवा अनजान ही अभिचारिक कर्म करने पर, आपोहिष्ठा मयोभुव' आदि तीन मन्त्रों से तथा 'हिरण्यवर्णाश्शुचयः पावकाः' आदि चार मन्त्रों से स्नान तथा जल से अभिषेक करे, अथवा वरुण के मन्त्रों 'इमं मे वरुण,' 'तत्त्वा यामि' 'त्वन्नो अग्ने' आदि मन्त्रों या ''पवमानस्सुवर्जनः'' अनुवाक से अपराध की मात्रा के अनुसार स्नान करे ॥ ७ ॥

गर्दभेनाऽवकीर्णी निर्ऋतिं पाकयज्ञेन यजेत ॥ ८ ॥

यो ब्रह्मचारी स्त्रियमुपेयात् सोऽवकीर्णी गर्दभेन निर्ऋतिं यजेत पाकयज्ञेन स्थालीपाकविधानेन। अत्र मनुः—

[2]'अवकीर्णी तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन, यजेत निर्ऋतिं निशि॥' इति।

हारीतस्तु—

'स्त्रीष्वपकीर्णी निर्ऋत्यै चतुष्पथे गर्दभं पशुमालभेत पाकयज्ञधर्मेण। भूमौ पशुपुरोडाशश्रवणमप्स्ववदानैः प्रचार्याऽऽज्यं जुहोति 'कामावकीर्णोऽऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा। कामाभिद्रुग्घोस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा'' इति ॥ ८ ॥

अनु०—(स्त्री सम्पर्क से) ब्रह्मचर्य को भंग करने वाला अवकीर्णी ब्रह्मचारी निर्ऋति के लिए पाकयज्ञ की विधि से गदहे की बलि प्रदान करे ॥ ८ ॥

तस्य शूद्रः प्राश्नीयात् ॥ ९ ॥

तस्य गर्दभस्य सर्पिष्मद्धविरुच्छिष्टं शूद्रः प्राश्नीयात् [3]'तेन सर्पिष्मता ब्राह्मण' मित्यस्याऽपवादः ॥ ९ ॥

अनु०—उस गर्दभ की बलि का हवन करने से अवशिष्ट मांस का शूद्र पुरुष को भक्षण करावे ॥ ९ ॥

मिथ्याधीतप्रायश्चित्तम् ॥ १० ॥

नियमातिक्रमेणाऽधीतं मिथ्याधीतम्। तद्दोषनिर्हरणाय प्रायश्चित्तं वक्ष्यते ॥ १० ॥

---

१. कृतः तथोपस्पृशेत्० इति क० पु० २. म० स्मृ० ११. ११८
३. आप० गृ० ७. १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०--नियम का उल्लंघन करके अध्ययन करने वाले ब्रह्मचारी के दोष का प्रायश्चित्त आगे बताया जायगा ॥ १० ॥

संवत्सरमाचार्यहिते वर्तमानो वाचं यच्छेत्स्वाध्याय एवोत्सृजमानो वाचमाचार्य आचार्यदारे वा भिक्षाचर्ये च ॥ ११ ॥

आचार्यहिते वर्तमानो वचंयमः स्यात्। [1]स्वाध्यायादिष्वेषु वाचमुत्सृजमानः। आचार्ये तं प्रति कार्यनिवेदने। एवमाचार्यदारे। भिक्षाचर्यं भिक्षाचरणम्। तत्र च 'भवति भिक्षां देही'ति। अस्मादेव ज्ञायते–असमावृत्तविषयमेतदिति ॥ ११ ॥

अनु०--एक वर्ष तक चुपचाप गुरु की सेवा करे, और केवल प्रतिदिन के स्वाध्याय के समय आचार्य, आचार्यपत्नी से किसी आवश्यक कार्य का निवेदन करते समय, और भिक्षाचरण के समय ही बोले ॥ ११ ॥

एवमन्येष्वपि दोषवत्स्वपतनीयेषूत्तराणि यानि वक्ष्यामः ॥ १२ ॥

यथा मिथ्याधीतस्येदं प्रायश्चित्तमेवमुत्तराणि यानि प्रायश्चित्तानि वक्ष्यामः तान्यन्येष्वपि। अपिशब्दान्मिथ्याधीतेऽपि। दोषवत्स्वपतनीयेषु पतनीयव्यतिरिक्तेषु कर्मसु येष्वाहत्य प्रायश्चित्तं नोक्तं तद्विषयाणि द्रष्टव्यानि ॥ १२ ॥

अनु०--इसी प्रकार उन्ही दोषों के लिए तथा अन्य दोषयुक्त कर्मों के लिए भी आगे बताये जाने वाले प्रायश्चित्त करने चाहिए ॥ १२ ॥

काममन्युभ्यां वा जुहुयात्कामोऽकार्षीन्मन्युरकार्षीदिति ॥ १३ ॥

स्वाहाकारान्ताभ्यां होमः। आज्यं द्रव्यम् ॥ १३ ॥

अनु०—काम और मन्यु के लिए 'कामोऽकार्षीत्' (ऐसा काम ने किया है) 'मन्युरकार्षीत्' (ऐसा मन्यु ने किया है) कहते हुए हवन करे ॥ १३ ॥

जपेद्वा ॥ १४ ॥

अस्मिन् पक्षे न स्वाहाकारः। केचित्तु 'कामाय स्वाहा' 'मन्यवे स्वाहे'ति होममिच्छन्ति। जपपक्षे तु सूत्रोपदिष्टौ मन्त्राविति। दोषाभ्यासानुरूपं जपहोमयोरावृत्तिः ॥ १४ ॥

अनु०—अथवा काम और मन्यु के मन्त्र का केवल जप करे ॥ १४ ॥

पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूत उदकमुपस्पृश्य सावित्रीं प्राणायामशस्सहस्रकृत्व आवर्तयेदप्राणायामशो वा ॥ १५ ॥

---

१. वागुत्सर्गस्स्वाध्याय एव इति. ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वणि पौर्णमास्याममावास्यायां वा। तिलानेव भक्षयति नान्यदोदनादिकमिति तिलभक्षः। श्वोभूते उदकमुपस्पृश्य स्नात्वा सावित्रीं प्राणायामशः प्राणायामेन एकस्मिन्प्राणायामे यावत्कृत्व आवर्तयितुं शक्यं तावत्कृत्व आवर्तयेत्। एवमा सहस्रपूर्तेः प्राणायामावृत्तिः। अप्राणायामशो वा [1]'जपकाले प्राणानायच्छेत्, तूष्णीं जपेद्वेति ॥ १५ ॥

अनु०—अथवा पर्वों पर (पौर्णमासी तथा अमावस्या को) तिल का भक्षण करके अथवा उपवास करके, दूसरे दिन स्नान करे, प्राणायाम करके गायत्री मन्त्र का एक हजार बार जप करे अथवा विना प्राणायाम किये ही गायत्री मन्त्र का एक हजार बार जप करे ॥ १५ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने षड्विंशी कण्डिका ॥ २६ ॥

श्रावण्यां वा पौर्णमास्यां तिलभक्ष उपोष्य वा श्वो भूते [2]माहानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वा ॥ १ ॥

गिरिप्रभवा समुद्रगामिनी नदी महानदी तत्र भवं महानदम्। समित्सहस्रं याज्ञिकस्य वृक्षस्य 'आदध्या'दिति वचनान्न होमधर्मः स्वाहाकारः[3] 'जुहोतिचोदना स्वाहाकारप्रदान,' इत्युक्तत्वात्। जपेद्वा ॥ १ ॥

अनु०—अथवा श्रावण महीने की पौर्णमासी को तिल का भक्षण करके या उपवास करके दूसरे दिन किसी बड़ी नदी में स्नान करे और एक सहस्र याज्ञिक वृक्ष की समिधाएँ गायत्री मन्त्र का जप करते हुए अग्नि पर रखे अथवा एक सहस्र वार गायत्री मन्त्र का जप करे ॥ १ ॥

इष्टियज्ञक्रतून्वा पवित्रार्थानाहरेत् ॥ २ ॥

पवित्रार्थाः शुद्ध्यर्थाः [4]मृगाराद्या इष्टयः। [5]यज्ञक्रतवः सोमयागा अग्निष्टोमादयः। तान्येतानि षष्ट् प्रायश्चित्तानि एनस्सु गुरुषु गुरूणि, लघुषु लघूनि ।२।

अनु०—अथवा अपनी शुद्धि के लिए (मृगरादि) इष्टियाँ, सोमयाग अग्निष्टोम आदि यज्ञ करे।

---

१. जपकाल इत्यादि नास्ति ख० च० पु०   २. महानदं इति छ० पु०

३. (आप० प० ३. ४.) "जुहोतिचोदना स्वहाकारप्रदान इत्युक्तत्वात्। जपेद्वा" इति नास्ति० क० छ० पु०

४. अग्नयेऽहोमुचेऽष्टाकपालः (तै० सं० ७. ५. २२) इति विहितोष्टिर्मृगोरिष्टिदर्शहविष्का।

५. यज्ञाः क्रतवः। इति क० छ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टि०—इस प्रकार छः विविध प्रायश्चित्त बताये गये हैं, अधिक दोष होने पर कठिन प्रायश्चित्त करे और कम दोष होने पर इनमें से सरल प्रायश्चित्त करे।—हरदत्त की व्याख्या ॥२॥

अभोज्यं भुक्त्वा नैष्पुरीष्यम् ॥ ३ ॥

अभोज्यस्य मार्जारादिमांसस्य भक्षणे निष्पुरीषभावः कर्तव्यः। यावदुदरं निष्पुरीषं भवति तावदुपवस्तव्यम् ॥ ३ ॥

अनु०—निषिद्ध भोजन का भक्षण करने पर तब तक उपवास करे जब तक पेट मलरहित नहीं हो जाता ॥ ३ ॥

तत्कियता कालेनाऽवाप्यते ? तदाह—

तत्सप्तरात्रेणाऽवाप्यते ॥ ४ ॥

तत् नैष्पुरीष्यम्। सप्तरात्रेणाऽवाप्यते सप्तरात्रमुपवस्तव्यमित्यर्थः। सप्तरात्रमुपवसेदित्येव सिद्धे नैष्पुरीष्यवचनाद्येषां त्रिरात्रेणैव तदवाप्यते तेषां तावतैव शुद्धिः। तथा च गौतमः—[1]'अभोज्यभोजने निष्पुरीषभावः त्रिरात्रावरमभोजनं सप्तरात्रं वे'ति ॥ ४ ॥

अनु०—पेट में मल का पूर्णतः अभाव सामान्यतः सात रात्रियों में होता है ॥४॥

हेमन्तशिशिरयोर्वोभयोस्सन्ध्योर्वोदकमुपस्पृशेत् ॥ ५ ॥

उभयोः सन्ध्ययोः सायं प्रातश्च। उदकमुपस्पृशेत् भूमिगतास्वप्सु स्नायात्। उद्धृताभिर्वा शीताभिः ॥ ५ ॥

अनु०—अथवा हेमन्त और शिशिर ऋतुओं में प्रातः और सायं ठण्डे जल से स्नान करे ॥ ५ ॥

कृच्छ्रद्वादशरात्रं वा चरेत् ॥ ६ ॥

द्वादशरात्रसाध्यो व्रतविशेषः कृच्छ्रद्वादशरात्रः ॥ ६ ॥

अनु०—अथवा बारह दिन का कृच्छ्र व्रत करे ॥ ६ ॥

तस्य विधिमाह[2]—

त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहम्, त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किञ्चनेति कृच्छ्रद्वादशरात्रस्य विधिः ॥ ७ ॥

आदितस्त्रिष्वहस्सु नक्तं नाऽश्नीयात्। दिवैव भुञ्जीत। ततस्त्र्यहमदिवाशी रात्रावेव भुञ्जीत। न दिवा। ततस्त्र्यहमयाचितमेव भुञ्जीत। याच्ञाप्रतिषेधोऽयम्। तेन स्वद्रव्यस्याऽप्रतिषेधः। तथा च गौतमः [3]'अथाऽपरं त्र्यहं न कंचन

१. गौ० ध० २६. ४

२. मनौ० ११. २११ श्लोको द्रष्टव्यः। ३. गौ० ध० २६. ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याचे'दिति । ततत्र्यहं नाश्नाति कञ्चन फलादिकमपीति । एवं कृच्छ्रद्वादशरात्रस्य विधिः । तत्र स्मृत्यन्तरवशाद्धविष्यमन्नं ब्रह्मचर्यं, स्त्रीशूद्रादिभिरसम्भाषणं च द्रष्टव्यम् ॥ ७ ॥

अनु०—(कृच्छ्र व्रत का नियम इस प्रकार है) तीन दिनों सन्ध्या को भोजन न करे, फिर अगले तीन दिनों दिन में भोजन न करे, फिर तीन दिन विना माँगे प्राप्त अन्न खाकर रहे और उसके बाद तीन दिन तक कुछ न खावे । इस प्रकार बारह दिन के कृच्छ्र व्रत की विधि है ॥ ७ ॥

एतमेवाऽभ्यस्येत् संवत्सरं स कृच्छ्रसंवत्सरः ॥ ८ ॥

एतमेव विधिं संवत्सरं निरन्तरमभ्यस्येत् । स एष कृच्छ्रसंवत्सरो वेदितव्यः । यः पूर्वोक्तः 'कृच्छ्रसंवत्सरं वा चरे' (२५. ९.) दिति ॥ ८ ॥

अनु०—यदि इसी व्रत की आवृत्ति वर्ष भर तक करे तो वह एक वर्ष का कृच्छ्रव्रत (कृच्छ्रसंवत्सर) होता है ॥ ८ ॥

अथाऽपरं बहून्यप्यपतनीयानि कृत्वा त्रिभिरनश्नन् पारायणैः कृतप्रायश्चित्तो भवति ॥ ९ ॥

अथाऽपरं प्रायश्चित्तमुच्यते । अनश्नतैव निरन्तरं त्रीणि पारायणानि कर्तव्यानि । आदित आरभ्याऽऽसमाप्तेर्वेदस्याऽध्ययनं पारायणम् । बहून्यपि । अपिशब्दात्किं पुनरेकं द्वे वा ॥ ९ ॥

अनु०—अब दूसरे व्रत का नियम इस प्रकार है । अनेक ऐसे दोष युक्त कर्म करनें पर, जिन कर्मों से पतन नहीं होता, यदि उपवास करते हुए अपने वेद की सम्पूर्ण शाखा की निरन्तर तीन बार पारायण करे तो दोष से मुक्ति हो जाती है ॥ ९ ॥

अनार्यां शयने बिभ्रद्ददद्वृद्धिं कषायपः । अब्राह्मण इव वन्दित्वा तृणेष्वासीत पृष्ठतप् ॥ १० ॥

अनार्यां शूद्रां तां शयने बिभ्रत् उपगच्छन् । ददद्वृद्धिं वृद्ध्यर्थं द्रव्यं ददत् । वृद्ध्याजीव इत्यर्थः । सुराव्यतिरिक्तं मद्यं कषायः । [1]तस्य पाता कषायपः । यश्चाऽब्राह्मण इव सर्वान् वन्दी भूत्वा स्तौति स सर्वोऽपि तृणेषूदयादारभ्याऽऽसीत । यावदस्याऽऽदित्यः पृष्ठं पश्चाद्भागं तपति । आदित्ये तपति तदानुगुण्याचरणात् स्वयमेव पृष्ठतबित्युच्यते । अभ्यासे अभ्यासो यावता शुद्धिं मन्यते ॥ १० ॥

अनु०—अनार्या अर्थात् शूद्रा से संभोग करने वाला, ब्याज पर धन देने वाले, (सुरा के अतिरिक्त अन्य) मादक द्रव का पान करने वाला, सबकी अब्राह्मण की तरह वन्दना करने वाला, घास पर (सूर्योदय के समय से) बैठकर अपनी पीठ को तपावे ॥

१. 'तत् पिबतीति कषायपः' इति ग० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदेकरात्रेण करोति पापं कृष्णं वर्णं ब्राह्मणस्सेवमानः चतुर्थकाल [1]उदकाभ्यवायी त्रिभिर्वर्षैस्तदपहन्ति पापम् ॥ ११ ॥

कृष्णो वर्णः शूद्रः । तमाज्ञाकरो भूत्वा वृत्त्यर्थं सेवमानः । शिष्टं स्पष्टं गतं च । अपर आह-- शूद्रां मैथुने सेवमान इति । अस्मिन्पक्षे ऋतावुपगमने अपत्योत्पत्ताविदं द्रष्टव्यम् । मनुः—

[2]वृषलीफेनपीतस्य निश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥' इति ॥ ११ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने सप्तविंशी कण्डिका ॥ २७ ॥

अनु०—कृष्ण वर्ण (शूद्र) की एक दिन और एक रात सेवा करने के दोष को ब्राह्मण वर्ण का पुरुष प्रति चौथे भोजनकाल पर स्नान करके तीन वर्ष में दूर कर देता है ।

टि०—कुछ लोगों ने सूत्र की व्याख्या इस प्रकार की है । ब्राह्मण शूद्रा से एक रात्रि में सम्भोग का दोष इस प्रायश्चित्त से दूर करता है ।

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु-
ज्वलायां प्रथमप्रश्ने नवमः पटलः ॥ ९ ॥

१. उदकाभ्युपायी इति छ० पु० २, म० स्मृ० ३. १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दशमः पटलः

यथा कथा च परपरिग्रहमभिमन्यते स्तेनो ह भवतीति कौत्सहरीतौ तथा काण्वपुष्करसादी ॥ १ ॥

[1]यथा कथा च आपद्यनापदि वा भूयांसमल्पं वा, परपरिग्रहं परस्वमभिमन्यते–ममेदमस्त्विवति बुद्धौ कुरुते [2]सर्वथा स्तेन एव भवतीति कौत्सादयो मन्यन्ते ॥ १ ॥

अनु०—जिस किसी अवस्था में (आपत्ति में या सामान्य अवस्था में) जो व्यक्ति दूसरे की सम्पत्ति को प्राप्त कर लेने का लोभ करता है, वह स्तेन होता है, ऐसा कौत्स और हारीत का तथा काण्व और पुष्करसादी का मत है ॥ १ ॥

सन्त्यपवादाः परपरिग्रहेष्विति वार्ष्यायणिः ॥ २ ॥

वार्ष्यायणिस्तु मन्यते केषुचित्परपरिग्रहेषु स्तेयस्याऽपवादास्सन्तीति ॥ २ ॥

अनु०—दूसरें की वस्तु ग्रहण करने के विषय में अपवाद भी हैं, ऐसा वार्ष्यायणि का मत है ॥ २ ॥

तानेवोदाहरति—

शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ॥ ३ ॥

शमी वीजकोशी तस्यामुष्यन्ते दह्यन्ते कालवशेन पच्यन्ते इति शम्योषाः कोशीधान्यानि मुद्गमाषचणकादीनि । युगं वहतीति युग्यः शकटवाही बलीवर्दः, तस्य घासो भक्षस्तृणादिः युग्यघासः। एते आदीयमानाः स्वामिनो न प्रतिषेधयन्ति स्वामिभिः प्रतिषेधं न कारयन्ति। एतेष्वादीयमानेषु स्वामिनो न प्रतिषेद्धुमर्हन्तीत्यर्थः। स्वयंग्रहणेऽपि न स्तेयदोष इति यावत्। अत्र स्मृत्यन्तरे विशेषः—

'चणकव्रीहिगोधूमयवानां मुद्गमाषयोः।
अनिषिद्धैर्ग्रहीतव्यो मुष्टिरेकाऽध्वनि स्थितैः ॥'

मनुस्तु—

[3]'द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥ ३ ॥

---

१. 'कथा' इति छान्दसं रूपं कथमित्यर्थ । दृष्टं च "तमब्रुवन् कथा हास्थाः" (तै० सं० २. ६. ३) "कथा मा निरभागिति" (तै० सं० ३. १. ९) इत्यादौ ।

२. बुद्धौ कृत्वाऽऽदत्त इत्यर्थः, इत्यधिकं क० छ० पु०

३. म० स्मृ० ८. ३४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—बीज कोश के भीतर पकने वाले बीज (कोशीधान्य, मुद्‌ग, माष, चणक आदि), तथा बैल को खिलाने के लिए घास ग्रहण करने वाले को इन वस्तुओं का स्वामी मना न करे ॥ ३ ॥

अतिव्यवहारो व्यृद्धो भवति ॥ ४ ॥

शम्योषादिष्वपि अतिव्यवहारो व्यृद्धो दुष्टो भवति, अतिमात्रापहारे स्तेयदोषो भवतीत्यर्थः ॥ ४ ॥

अनु०—किन्तु इन वस्तुओं को भी बहुत अधिक मात्रामें लेना दोषयुक्त होता है।

सर्वत्राऽऽनुमतिपूर्वमिति हारीतः ॥ ५ ॥

सर्वेषु द्रव्येषु सर्वास्ववस्थासु स्वाम्यनुमतिपूर्वमेव ग्रहणमिति हारीत आचार्यो मन्यते ॥ ५ ॥

अनु०—हारीत का मत है कि सभी अवस्थाओं में वस्तु ग्रहण करने से पहले स्वामी की अनुमति ले लेनी चाहिए ॥ ५ ॥

न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ॥ ६ ॥

'न पतितैः सव्यवहारो विद्यत' (२१.५) इत्युक्तेऽपि पुनरुच्यते–आचार्यादिषु विशेषं वक्ष्यामीति ॥ ६ ॥

अनु०—पतित आचार्य या निकट सम्बन्धी से मिलने के लिए न जावे ॥ ६ ॥

न चाऽस्माद्भोगानुपयुञ्जीत ॥ ७ ॥

अस्मात्पतितादाचार्यात् ज्ञातेर्वा पित्रादेः भोगान् भोगसाधनानि दायप्राप्तान्यपि नोपयुञ्जीत न गृह्णीयात् ॥ ७ ॥

अनु०—इस प्रकार के व्यक्तिसे अपने सुख की वस्तुएँ भी न ग्रहण करे ॥ ७ ॥

यदृच्छासन्निपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ॥ ८ ॥

यदि पतितैराचार्यादिभिर्यदृच्छया सन्निपातः सङ्गतिः स्यात् तदाऽविधिनोपसंगृह्य तूष्णीं तैस्सह किञ्चिदप्यसम्भाष्य व्यतिव्रजेत् गच्छेत्। न क्षणमपि सह तिष्ठेत् ॥ ८ ॥

अनु०—यदि सहसा वे मिल जाँय तो चुपचाप उनका चरणस्पर्श करके वहाँ से प्रस्थान कर देना चाहिए ॥ ८ ॥

माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा
नित्या पतितायामपि ॥ ९ ॥

पुत्रत्वस्य, स्वार्थिकस्त्वः। यथा 'देहत्वमेवान्य'दिति। पुत्रस्य कृते माता भूयांसि दृष्टार्थानि गर्भधारणाशुचिनिर्हरणस्तन्यदानप्रदक्षिणनमस्कारोपवासा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दोनि कर्माणि करोति तस्मात्तस्यां पतितायामपि शुश्रूषा अभ्यङ्गस्नापनादिका-नित्या नित्यमेव कर्तव्या ॥ ९ ॥

अनु०—माता पुत्र के लिए अनेक कर्म करती है, उसकी सेवा सदैव करनी चाहिए, भले ही वह पतिता हो गई हो ॥ ९ ॥

न तु धर्मसन्निवापः स्यात् ॥ १० ॥

एकस्मिन् धर्मे सहाऽन्वयो धर्मसन्निवापः। स पतितया मात्रा सह न कर्तव्यः। नामसुब्रह्मण्यां मातुर्नामग्रहणम्। वरुणप्रघासेषु 'यावन्तो यजमानस्याऽमात्याः सस्त्रीकास्तावन्त्येकातिरिक्तानी' त्येवमादिकमुदाहरणम्। किं पुनरेवमादिषु मातुरन्वयः शुश्रूषा ? ओमित्याह। अन्विता हि सा सम्मता मन्यते। निरस्ता तु विमता। वैश्वदेवार्थे च पाके सा न भोजयितव्या। मृतायास्तु तस्याः संस्कारादिकाः क्रियाः कर्तव्याः नेति विप्रतिपन्नाः ॥ १० ॥

अनु०—किन्तु धर्म के लिए किए जाने वाले कर्मों में पतिता माता के साथ किसी प्रकार का संबन्ध न रखे ॥ १० ॥

अधर्माहृतान् भोगाननुज्ञाय न वयं चाऽधर्मश्चेत्यभिव्याहृत्याऽधो नाभ्युपरिजान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्नक्षीराक्षारलवणं भुञ्जानो द्वादशवर्षाणि नाऽगारं प्रविशेत् ॥ ११ ॥

ब्राह्मणस्वहरणम्,

[२]चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥

इत्येवमादिकमुदाहरणम्। ये अधर्माहृता भोगास्ताननुज्ञाय परित्यज्य 'न वयं चाऽधर्मश्चे'ति प्रैषं ब्रूयात्। तस्यार्थः–वयं चाऽधर्मश्च सह न वर्तामह इति। अधो नाभीत्यादि (२४..११,) गतम्। नात्राऽर्धशाणीपक्षो भिक्षाचर्यं वा ॥११॥

अनु०—अधर्म से उपलब्ध सुख की वस्तुओं का त्याग कर दे 'हम और अधर्म साथ नहीं रहेंगे' ऐसा कहकर, नाभि से लेकर घुटनों तक का वस्त्र धारण कर प्रतिदिन तीन सवनों के समय स्नान करे और दूध, मसाला, नमक से वर्जित अन्न का भोजन करे तथा बारह वर्षतक घर में प्रवेश न करे ॥ ११ ॥

ततस्सिद्धिः ॥ १२ ॥

---

१ आप० श्रौ० ८. ५. ४१ करम्भपात्रनिर्माणे संख्याविधिरयम्।

२. म० स्मृ० ११. १७६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतस्य द्वादशवार्षिकस्याऽन्ते सिद्धिः शुद्धिर्भवति ॥ १२ ॥

अनु०—उसके बाद उसकी पाप से शुद्धि हो जाती है ॥ १२ ॥

अथ सम्प्रयोगस्स्यादार्यैः ॥ १३ ॥

प्रायश्चित्तोपदेशात् सिध्युपदेशाच्च सिद्धे पुनर्वचनं 'ज्ञानात्साम्यं तु गच्छती'त्यस्याऽपवादार्थम् ॥ १३ ॥

अनु०—इसके बाद वह आर्यों के साथ सम्पर्क कर सकता है ॥ १३ ॥

एतदेवाऽन्येषामपि पतनीयानाम् ॥ १४ ॥

उक्तव्यतिरिक्तानि यानि पतनीयानि पूर्वमुक्तानि तेषु यत्राऽऽहत्य प्रायश्चित्तं [1]नोक्तं तेषामप्येतदनन्तरोक्तमेव प्रायश्चित्तं वेदितव्यम्। उक्तविषये विकल्प इत्यन्ये। तत्र ज्ञानाज्ञानकृतो विकल्पः ॥ १४ ॥

अनु०—यह प्रायश्चित्त दूसरे भी पतनीय कर्मों के लिए करना चाहिए ॥ १४ ॥

गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत आदीप्याऽभिदहेदात्मानम् ॥ १५ ॥

यस्तु गुरुतल्पगामी सोऽन्तः प्रवेशयोग्यां सुषिरां सूर्मिं कृत्वा प्रविशेत् प्रविश्योभयतः पार्श्वयो [2]र्वह्निमादीपयेत्। आदीप्याऽऽत्मानमभिदहेत्। "ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुया (२५ २.)" दित्यत्रैव कियानपि विशेषः। अनन्तरोक्तस्य वैकल्पिकस्य निवृत्त्यर्थं वचनम् ॥ १५ ॥

अनु०—गुरुपत्नीगमन करने वाला भीतर प्रवेश करने योग्य खोखली, लोहे की बनी स्त्रीमूर्त्ति में प्रवेश करके दोनों ओर से अग्नि प्रज्वलित कराकर अपने को जला डाले ॥ १५ ॥

मिथ्यैतदिति हारीतः ॥ १६ ॥

हारीतस्त्वृषिर्मन्यते–एतदनन्तरोक्तं मरणान्तिकप्रायश्चित्तं मिथ्या न कर्तव्यमिति ॥ १६ ॥

अनु०—हारीत के अनुसार यह प्रायश्चित्त नहीं करना चाहिए ॥ १६ ॥

कुत इत्यत आह—

यो ह्यात्मानं परं वाऽभिमन्यतेऽभिशस्त एव स भवति ॥ १७ ॥

हिशब्दो हेतौ। यस्मात् य आत्मनं परं वाऽभिमन्यते मारयति सोऽभिशस्त एव भवति ब्रह्महैव भवति। [3]न च पतनीयापनोदनं चिकीर्षुरन्यत् पत-

---

१. अनुक्तं० इति. क० ख० पु० २. वह्निमिति नास्ति क० छ० पु०

३. न च महापातकस्य ब्रह्महत्या प्रायश्चित्तं भवितुमर्हतीति क० पुस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नीयं कर्तुमर्हतीति। हेत्वभिधानादभिशस्तवचनाच्चाऽन्येषामपि मरणान्तिकानां ब्रह्मणविषये निवृत्तिः॥ १७॥

अनु०—जो अपना या दूसरे का जीवन लेता है वह अभिशस्त ही होता है।१७।

किं तर्हि तस्य प्रायश्चित्तमिति? आह—

एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेन्नाऽस्याऽस्मिल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते॥१८॥

'अधोनाभ्युपरिजान्वि' (२८.११.) त्यादि यदनन्तरोक्तमेतेनैव विधिना। शिष्ट गतम्॥ १८॥

अनु०—ऐसा (गुरुतल्पगामी) व्यक्ति इसी (सूत्र ११ की) विधि से अन्तिम श्वास तक आचरण करे। उसे पाप से शुद्धि इस जीवन में नहीं मिलती। मृत्यु के बाद उसका पाप दूर होता है॥ १८॥

दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय 'दारव्यतिक्रमिणे भिक्षा' मिति सप्ताऽगाराणि चरेत्। सा वृत्तिः षण्मासान्॥ १९॥

[1]यस्तु अन्तरेणैव निमित्तं कौमारान् दारान् परित्यजति स दारव्यतिक्रमी। खरस्य, गर्दभस्याऽजिनं बहिर्लोम परिधाय वसित्वा दारव्यतिक्रमिणे भिक्षां दत्तेति सप्तागाराणि भिक्षां चरेत्। [2]कौमारदारपरित्यागिने भिक्षां दत्ते'ति वासिष्ठे। [3]सा वृत्तिः षण्मासान्। ततः सिद्धिः॥ १९॥

अनु०—जो विना कारण के पत्नी का परित्याग करता है वह गदहे का चमड़ा इस प्रकार धारण करे कि उसके रोएँ बाहर की ओर हों और सात घरों में यह कहते हुए भिक्षा माँगे 'पत्नी का परित्याग करने वाले को भिक्षा दो'। उसी भिक्षा से छः महीन तक जीविकानिर्वाह करते हुए रहे॥ १९॥

स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम्॥२०॥

भर्तुव्यतिक्रम इति छान्दसो रेफलोपः। व्यतिक्रमः परित्यागः। या तु स्त्री भर्तारं परित्यजत्यन्तरेण निमित्तं, तस्यास्तावन्तं कालं षण्मासान् कृच्छ्रद्वादशरात्राभ्यासः प्रायश्चित्तम्॥ २०॥

अनु०—किन्तु यदि पत्नी ने पति को त्याग दिया हो तो वह बारह दिनों का कृच्छ्र व्रत करते हुए उतने ही समय तक (छः मास तक) प्रायश्चित्त करे॥ २०॥

---

१. धर्मप्रजादिकमन्तरेण कौमारान् दारान्' इति क० ख० पु०

२. व०ध० कौमारदारव्यतिक्रमिणे इति. ख०पु० कौमारदारपरित्यागिने इति क०पु०

३. षण्मासादूर्ध्वं शुद्धः इति. ग० पु० 'सा वृत्ति'रित्यादि पृथक्सूत्रं च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भ्रूणहा श्वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय ॥ २१ ॥

अनु०—वेद वेदाङ्ग के ज्ञाता ब्राह्मण की हत्या करने वाला कुत्ते का या गदहे का चर्म रोओं को बाहर करके धारण करे और भोजन तथा जल पीने के लिए मनुष्य की खोपड़ी लिए रहे।

इत्यापास्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्नेऽष्टाविंशी कण्डिका ॥ २८ ॥

खटाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति। ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रयेत् 'न हि म आर्यैः सह सम्प्रयोगो विद्यते'। एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत्। नाऽस्यास्मिल्लोके प्रत्यापत्तिर्विद्यते। कल्मषं तु निर्हण्यते॥१॥

षडङ्गस्य वेदस्याऽध्येता, तदर्थवित्, प्रयोगशास्त्रस्य सव्याख्यस्यार्थवित् कर्मणामनुष्ठाताऽनुष्ठापयिता च ब्राह्मणो भ्रूणः। तथा च बौधायनः—[1]'वेदानां किञ्चिदधीत्य ब्राह्मणः। एकां शाखामधीत्य श्रोत्रियः। अङ्गाध्याय्यनूचानः। कल्पाध्याय्यृषिकल्पः। सूत्रप्रवचनाध्यायी भ्रूणः' इति। तं यो हतवान् स भ्रूणहा। सः शुनः खरस्य वाऽजिनं बहिर्लोमपरिधाय पुरुषस्य यस्य कस्यचिन्मृतस्य शिरः, प्रतीपानार्थम्। प्रतिर्धात्वर्थानुवादः [2]'उपसर्गस्य घञ्यमनुष्ये बहुल'मिति बाहुलको दीर्घः। पानमेव प्रतीपानम्। पानग्रहणमुपलक्षणम्। भोजनमपि तत्रैव। खटाङ्गं दण्डार्थे, खट्वाया अङ्गं खट्वाङ्गमीषादि तद्दण्डकृत्ये आदाय। 'भ्रूणहाऽस्मीत्येवं कर्मनिबन्धनमात्मनो नामधेयं प्रब्रुवाणश्चक्रम्येत इतस्ततश्चरेत्। कापालिकतन्त्रप्रसिद्धस्य खट्वाङ्गस्य वा ग्रहणम् भिक्षाचरणकाले च को भ्रूणघ्ने भिक्षां ददातीति चरेत्। चरित्वा ग्रामे प्राणवृत्तिं प्राणयात्रामात्रं प्रतिलभ्य शून्यागारं वृक्षमूलं वा निवासार्थमभ्युपाश्रयेत्—'न हि म आर्यैः सह सम्प्रयोगो विद्यत' इत्येवंमन्यमानः। कियन्तं कालमेवं चरितव्यमित्यत आह—एतेनैवेत्यादि। गतम्। श्रोत्रियं वा कर्मसमाप्त (२४. २४.)' मित्यत्र यः श्रोत्रियः [3]ग्रन्थधारी अर्थज्ञश्च न भवति अनुष्ठापयिता च न भवति तस्य ग्रहणम् ॥१॥

अनु०—डण्डे के स्थान पर चारपाई का पाया लेकर अपने कर्म का नाम लेकर घोषणा करता हुआ यह कहते हुए घूमे कि वेद और वेदाङ्ग के विद्वान् ब्राह्मण की

---

१. बौधा० गृ० १. ११ २. पा० सू० ६. ३. १२२

३. श्रुतिधारी इति. क० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हत्या करने वाले को कौन भिक्षा देगा ? इस प्रकार गाँव में ही जीविका निर्वाह करते हुए किसी सूने घर में या वृक्ष के नीचे निवास करे और यह जाने कि आर्यों के साथ उसे सम्पर्क की अनुमति नहीं है। इसी विधि से वह अन्तिम श्वास तक आचरण करे। इस लोक में उसकी शुद्धि नहीं होती है। किन्तु मृत्यु के बाद उसका पाप दूर हो जाता है ॥ १ ॥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २ ॥

क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादेनाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव। न तु प्रमादकृतमिति दोषभावः॥२॥

अनु०—जो प्रमादवश अनजान में हत्या करता है उसका भी उतना ही दोष होता है ॥ २ ॥

सह सङ्कल्पेन भूयः ॥ ३ ॥

सङ्कल्पेन सह वधे कृते भूयः प्रभूततरं भवति। तेन प्रमादकृते लघुप्रायश्चित्तम्, बुद्धिपूर्वे तु गुर्विति। यत्पुनः पूर्वमुक्तं 'दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वे (२६.७.)' ति तत्र तेषु प्रायश्चित्तेषु विशेषाभावादिदमुक्तम् ॥ ३ ॥

अनु०—संकल्प के साथ वध करने पर और भी अधिक पाप होता है ॥ ३ ॥

एवमन्येष्वपि दोषवत्सु कर्मसु ॥४ ॥

अन्येष्वपि हननव्यतिरिक्तेषु दोषवत्सु कर्मसु एवमेव द्रष्टव्यम्—अबुद्धिपूर्वं कृतेऽल्पो दोषः, बुद्धिपूर्वे महानिति ॥ ४ ॥

अनु०—यही नियम दूसरे दोषयुक्त कर्मों के विषय में भी लागू होता है ॥ ४ ॥

तथा पुण्यक्रियासु ॥ ५ ॥

पुण्यक्रियास्वप्येष एव न्यायः—अबुद्धिपूर्वेऽल्पं फलम्, बुद्धिपूर्वे महदिति। तद्यथा—ब्राह्मणस्स्वान्यपहृत्य चोरेषु धावत्सु यदृच्छया कश्चिच्छूर आगतस्तान् हन्यात्, स्वयमेव वा शूरं दृष्ट्वा चोरा अपहृतानि द्रव्याण्युत्सृज्य पलायेरन् तदा शूरस्याऽल्पं पुण्यफलम्। यदा तु बुद्धिपूर्वं स्वयमेव चोरेभ्यः प्रत्याहृत्य स्वानि स्वामिभ्यो ददाति तदा महदिति। एवं स्वभार्याबुद्ध्या परदारगमनेऽल्पम्, अन्यत्र महदिति ॥ ५ ॥

अनु०—उत्तम कर्मों के विषय में भी यही नियम होता है ॥ ५ ॥

टि०—अनजान में उत्तम कर्म करने का पुण्य अल्प होता है और संकल्प के साथ उत्तम कर्म करने का पुण्य अधिक होता है ॥ ५ ॥

परीक्षार्थोऽपि ब्राह्मण आयुधं नाऽऽददीत ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणदोषज्ञानं परीक्षा। तया अर्थः प्रयोजनं यस्य सः। एवंभूतोऽपि ब्राह्मण आयुधं न गृह्णीयात् किं पुनर्हिंसार्थ इत्यपिशब्दार्थः ॥ ६ ॥

अनु०—ब्राह्मण परीक्षा लेने के लिए भी हाथ में अस्त्र शस्त्र न ग्रहण करे ॥ ६ ॥

अस्य प्रतिप्रसवः—

यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन् दोष इति पुराणे ॥ ७ ॥

यस्तु हिंसार्थं मारणार्थमभिक्रान्तमभिपतितं हन्ति न तस्मिन् दोषो विद्यत इति पुराणे श्रुतम्। दोषाभावे हेतुः—यस्मान्मन्युरेव मन्युं स्पृशति न पुनः पुरुषः पुरुषम्। अत्र वसिष्ठबौधायनौ—

[1]स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम्।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥ इति ॥

मनुरपि—

[2]शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥
आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे।
स्त्रीविप्राभ्यवपत्तौ च घ्नन् धर्मेण न दुष्यति ॥' इति ॥

गौतमः—[3]प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीते'ति।

वसिष्ठः—

[4]अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
आततायिनमायान्तमपि वेदान्तपारगम्।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् ॥' इति ॥ ७ ॥

अनु०—जो हिंसा करने के लिए आक्रमण करने वाले को मारता है उसमें उसका क्रोध ही दूसरे व्यक्ति के क्रोध का स्पर्श करता है उसमें किसी प्रकार का दोष नहीं होता, ऐसा एक पुराण में कहा गया है ॥ ७ ॥

पतितैरकृतप्रायश्चित्तैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति प्रतिपादयितुं पूर्वपक्षमाह—

अथाऽभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवाहमानाः ॥ ८ ॥

---

१. व० ध० ३. १८ बौ० १. १०. १२ २. म० स्मृ० ८. ३४८-३४९
३. गौ० ध० ७. २५ ४. व० ध० ३. १६, १७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथशब्दोऽर्थान्तरप्रस्तावं सूचयति। अभिशस्ताः पतिताः। समवसाय चेरयु। अवसानं गृहम्। समित्येकीभावे। ग्रामाद्बहिरेकस्मिन् प्रदेशे गृहाणि कृत्वा चरेयुः। धार्म्यं वक्ष्यमाणं वृत्तमिति। सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा। निश्चित्येत्यर्थः। इतरेतरं याजयन्तः। इतरेतरमध्यापयन्तः परस्परं विवाहसम्बन्धं च कुर्वन्तश्चरेयुः वर्तेरन्निति ॥ ८ ॥

अनु०—जितने पतित लोग हों वे सभी गाँव से बाहर घर बनाकर एक साथ रहें और इसे अपनी धर्मसम्मत वृत्ति समझें। वे परस्पर एक दूसरे के यज्ञ कर्म करावें, एक दूसरे का अध्यापन करें और आपस में ही विवाह करें ॥ ८ ॥

पुत्रान् सन्निष्पाद्य ब्रूयुर्विप्रजताऽस्मदेवं ह्यस्मत्स्वार्यास्स-म्प्रत्यत्स्यतेति ॥ ९ ॥

अथ ते पुत्रान् सन्निष्पाद्य ब्रूयुः हे पुत्राः अस्मत् अस्मत्तः। विप्रव्रजत विविधं प्रकर्षेण च स्नेहमुत्सृज्याऽऽर्यसमीपं गच्छत। एवं ह्यस्मत्सु अस्मास्वार्याः शिष्टाः सम्प्रत्यपत्स्यत। 'आशंसायां भूतवच्चेति'[1] भविष्यति लुङ्। सकारात्परो यकारोऽपपाठश्छान्दसो वा। सम्प्रतिपत्तिं करिष्यन्ति। आर्याणामप्येतदभिप्रेतं भविष्यति। यस्मादस्माभिरेव पतनीयं कर्माऽनुष्ठितं न भवद्भिः। न च पतितेनोत्पादितस्य पातित्यम्, अन्यत्वात् ॥ ९ ॥

अनु०—यदि उनके पुत्र उत्पन्न हो तो उनसे इस प्रकार कहें कि हमें हर प्रकार से त्याग कर तुम चले जाओ। इस प्रकार आर्य लोग हम पर दोष छोड़कर तुम्हें स्वीकार करेंगे ॥ ९ ॥

एतदेवोपपादयति—

अथाऽपि न सेन्द्रियः पतति ॥ १० ॥

न हि पतितो भवन् सहेन्द्रियेण पतति, पुरुष एव पतति, नेन्द्रियं शुक्लमिति। अथापिशब्दावपि चेत्यस्यार्थे ॥ १० ॥

अनु०—क्योंकि मनुष्य अपनी इन्द्रियों के साथ पतित नहीं होता ॥ १० ॥

कथं न सेन्द्रियः पततीत्याह—

तदेतेन वेदितव्यमङ्गहीनोऽपि साङ्गं जनयति ॥ ११ ॥

तदनन्तरोक्तमर्थरूपमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यम्। चक्षुराद्यङ्गहीनोऽपि साङ्गं चक्षुरादिमन्तं जनयति, एवमधिकारविकलः साधिकारं जनयिष्यति। स्त्रिया अपि कारणत्वात् तस्याश्च दोषाभावात् ॥ ११ ॥

---

१. पा० सू० ३. ३. १३२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—यह बात इस उदाहरण से समझनी चाहिए कि अङ्गहीन व्यक्ति भी ऐसे पुत्र को उत्पन्न करता है जो सभी अङ्गों से पूर्ण होता है ॥ ११ ॥

दूषयति—

मिथ्यैतदिति हारीतः ॥ १२ ॥

एतदनन्तरोक्तमर्थरूपं मिथ्या न युक्तमिति हारीतो मन्यते ॥ १२ ॥

अनु०—हारीत के अनुसार यह ठीक नहीं है ॥ १२ ॥

कुत इत्याह—

दधिधानीसधर्मा स्त्री भवति ॥ १३ ॥

दधि धीयते यस्यां सा ददिधानो स्थाली । तया सधर्मा सदृशी स्त्री भवति ततः किम् ?

अनु०—स्त्री यज्ञ के उस स्थालीपात्र की तरह होती है जिसमें दधि रखा जाता है ॥ १३ ॥

यो हि दधिधान्यामप्रयतं पय आतञ्च्य मन्थति न तेन धर्मकृत्यं क्रियेत एवमशुचि शुक्लं यन्निर्वर्तते न तेन सह सम्प्रयोगो विद्यते ॥ १४ ॥

यो हि पुरुषः दधिधान्यां स्थाल्याम्, अप्रयतं श्वाद्युपहतम्, पय आतञ्च्यत-क्राद्यातञ्चनेन संस्कृत्य मन्थति न तेन तदुत्पन्नेन घृतादिना धर्मकृत्यं यागादिकं क्रियते । एवं पतितसम्बन्धेनाऽशुचि शुल्कं स्त्रियां निषिक्तं शोणितेनाक्तं यन्नि-र्वर्तते येन रूपेण निष्पद्यते न तेन सह सम्प्रयोगो विद्यते शिष्टानाम् । अत्र चा 'शुचि शुक्ल' 'मित्येत 'दर्थापि न सेन्द्रियः पतती' त्यस्य दूषणम् । न हि वाच-निकेऽर्थे युक्तयः क्रमन्ते । तथा च समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । यथाऽऽह वसिष्ठः—

[1]"पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः । सा हि परगामिनी तामरिक्था-मुपेयात्" ॥ इति ॥ १४ ॥

अनु०—जिस प्रकार कोई दधिधानी में अशुद्ध दूध को जल और तक्र मिलाकर मथे तो उससे उत्पन्न दधि से कोई यज्ञिय कर्म नहीं किया जा सकता, उसी प्रकार (पतित पुरुष के) अपवित्र वीर्य से जो पुत्र उत्पन्न होता है उससे किसी प्रकार का सम्पर्क नहीं होना चाहिए ।

टि०—आपस्तम्ब हारीत के इस विचार से सहमत हैं ।

अभीचारा[2]नुव्याहारावशुचिकरावपतनीयौ ॥ १५ ॥

अभिचारः एवाऽभीचारः । [3]'उपसर्गस्य घञी'ति दीर्घः । अभीचारः श्ये-

---

१. व. ध. ३. २. अनुव्यवहार इति क. ३. पा. सू., ६, ३. ११२.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नादिः । अनुव्याहारः शापः तौ ब्राह्मणविषयेऽपि क्रियमाणावशुचिकरेविव, न तु पतनीयौ ॥ १५ ॥

अनु०—(किसी ब्राह्मण के विरुद्ध) आभिचारिक क्रिया या शाप का प्रयोग करने पर इनका प्रयोग करने वाला अशुद्ध होता है, पतित नहीं होता ॥ १५ ॥

पतनीयाविति हारीतः ॥ १६ ॥

हारीतस्तु तावपि पतनीयाविति मन्यते ॥ १६ ॥

अनु०—हारीत का मत है कि इन कर्मों से पतन होता है ॥ १६ ॥

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान् द्वादशार्धमासान् द्वादश द्वादशाहान् द्वादश सप्ताहान् द्वादश त्र्यहान् द्वादश द्व्यहान् द्वादशाहं सप्ताहं त्र्यहं व्यहमेकाहम् ॥ १७ ॥

अशुचिकराणामपि कर्मणां येषामाहत्य प्रायश्चित्तं नोक्तं तेषामपि पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव प्रायश्चित्तिः । कियन्तं कालम् ? द्वादश मासाद्येकाहान्तम् ॥ १७ ॥

अनु०—अशुद्धि उत्पन्न करने वाले अपराधों के लिए भी पतनीय कर्मों का प्रायश्चित्त बारह मास तक, बारह अर्ध मास (पक्ष) तक, अथवा बारह बार बारह दिन, बारह सप्ताह, बारह बार तीन दिन, बारह बार दो दिन अथवा बारह दिन, एक सप्ताह, तीन दिन, दो दिन, अथवा एक दिन तक करे ॥ १७ ॥

किमविशेषेण सर्वेष्वेवाऽशुचिकरेष्वयं कालविकल्पः ? नेत्याह—

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः ॥ १८ ॥

इत्येषोऽशुचिकरनिर्वेषो यथा कर्माभ्यासस्तथा वेदितव्यः । बुद्धिपूर्वे सानुबन्धेऽभ्यासे च भूयांसं कालम् , विपरीते विपर्यय इति ॥ १८ ॥

॥ इत्यापस्तम्बसूत्र वृत्तौ प्रथमप्रश्ने एकोनत्रिंशी कण्डिका ॥ २९ ॥

अनु०—इस प्रकार अशुद्धि उत्पन्न करने वाले कर्मों का प्रायश्चित्त कर्म के अनुसार करना चाहिए ॥ १८ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने दशमः पटलः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैकादशः पटलः

'न समावृत्ता वपेरन्' (८.७.) स्नातस्तु काल' (१०.७.) इत्यादिषु प्रसक्तस्य स्नानस्य कालमाह—

विद्यया स्नातीत्येके ॥ १ ॥

वेदविद्या विद्या। तया सम्पन्नः स्नानं कुर्यादित्येकेमन्यन्ते। मनुरित्याह—

[1]'वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत्' ॥ इति ॥ १ ॥

अनु०—कुछ धर्मज्ञों का मत है कि ब्रह्मचारी विद्या का अध्ययन समाप्त करके स्नान करे। १ ॥

तथा व्रतेनाऽष्टाचत्वारिंशत्परीमाणेन ॥२॥

परिमाणमेव परिमाणम्। छान्दसो दीर्घः। अष्टाचत्वारिंशद्ग्रहणं[2]'पादूनम्, अर्धेन' (२.१३.१४) त्यादिपूर्वोक्तस्याप्युपलक्षणम्। अष्टाचत्वारिंशदादिपरिमाणेन व्रतेन [3]वा सम्पन्नः स्नायात् असम्पन्नोऽपि विद्यया ॥ २ ॥

अनु०—अथवा अड़तालिस वर्ष (छत्तीस या चौबीस वर्ष) का ब्रह्मचर्य पालन कर (विद्या से चाहें सम्पन्न हो या न हो) स्नान करे ॥ २ ॥

विद्या व्रतेन.चेत्येके ॥ ३ ॥

विद्येति तृतीयैकवचनस्याकारस्य[4] 'सुपां सुलुक्' इत्यादिना लुक्। विद्यया व्रतेन चोभाभ्यां सम्पन्नः स्नायादित्येके मन्यते। एवं च [5]"वेदमधीत्य स्नास्य' न्नित्यत्र वेदमधीत्येत्युपलक्षणम्। अत्र याज्ञवल्क्यः—

[6]'वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा।
अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥' इति।

---

१. म० स्मृ० ३. २.

२, पादूनम्, अर्धेन, त्रिभिर्वा' इत्येतेषां पूर्वोक्तानामुपलक्षणम्। इति. क० पु०

३. अथ ब्रह्मचर्यविधिः' इत्यारभ्य प्रपञ्चितेन समिदाधानभिक्षाचरणगन्धादिवर्जनादिरूपेण। अस्ति च तेषु व्रतशब्दः 'यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः" इति। इह तु समुदायाभिप्रायमेकवचनम्। तेन वा व्रतेन सम्पन्नस्स्नायात्। असम्पन्नोऽपि विद्यया। 'चत्वारि वेदव्रतानी' त्येषां तु ग्रहणमत्र नाऽऽशङ्कनीयम्। यथोक्तं विश्वरूपे। इत्यधिकः पाठो ग० पु०

४. पा० सू० ७. १. २९ ५. आप गृ० १२. १ ६. याज्ञ० स्मृ० १. ५२ १४ आ० ध०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

* अत्र व्रतशब्देनाऽग्नीन्धनभैक्षाचरणादयो ब्रह्मचारिधर्मा उच्यते। तेषु हि कालपरिमाणस्य श्रुतत्वात् पारं नीत्वेति युज्यते। दृश्यते च तेषु व्रतशब्दः। 'यथा व्रतेषु समर्थस्स्याद्यानि वक्ष्याम इति। न तु सावित्र्यादीनि वेदव्रतान्युच्यन्ते। तेषां तत्तत्प्रदेशाध्ययनशेषतया तदभावेऽभावाद्वेदं व्रतानि वेति विकल्पानुपपत्तेः। अतः कालविशेषावच्छिन्नानि व्रतानि वेदमुभयं पारं नीत्वेत्यर्थः*॥३॥

अनु० कुछ आचार्यों का मत है कि ब्रह्मचारी विद्या का ज्ञान प्राप्त करने तथा व्रत का समय समाप्त करने के बाद स्नान करे ॥ ३ ॥

तेषु सर्वेषु स्नातकवद्वृत्तिः ॥ ४ ॥

विद्यास्नातको व्रतस्नातक उभयस्नातक इति त्रयः स्नातका उक्ताः तेषु सर्वेषु स्नातकवत् 'तदर्हती'ति वतिः। स्नातकार्हा वृत्तिः पूजा[1] 'यत्राऽस्मा अपचिति' मित्यादिः कार्या। न तु व्रतस्नातके न्यूना, उभयस्नातकेऽधिकेति ॥ ४ ॥

अनु०—उपर्युक्त तीनों प्रकार से स्नान करने वालों के प्रति स्नातक के समान व्यवहार करना चाहिए ॥ ४ ॥

यद्यप्येवं तथाऽपि पूजयितुः फलविशेषोऽस्तीत्याह—

समाधिविशेषाच्छ्रुतिशेषाच्च पूजायां फलविशेषः ॥ ५ ॥

कर्तव्येषु कर्मस्ववधानं समाधिः श्रुतिः श्रुतम् ॥ ५ ॥

अनु०—स्नातक की पूजा का फल उसकी विशिष्ट कर्तव्यनिष्ठा तथा विशेष अध्ययन के अनुसार ही मिलता है ॥ ५ ॥

अथ स्नातकव्रतानि ॥ ६ ॥

इत उत्तरं स्नातकव्रतान्यधिकृतानि वेदितव्यानि। यद्यपि वक्ष्यमाणेषु कानिचित् साधारणान्यपि भवन्ति तथाऽपि भूम्ना स्नातकव्रतान्यधिक्रियन्ते ॥६॥

अनु०—अब स्नातक के व्रतों का निर्देश किया जायगा ॥ ६ ॥

पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा ॥ ७ ॥

यदा ग्रामान्निष्क्रामपि ग्रामं वा प्रविशति तदा पूर्वेण द्वारेणोत्तरेण वा कुर्यात्, न द्वारान्तरेण। शीलयेदिति वचनाद्यदृच्छया द्वारान्तरेण निष्क्रमणप्रवेशनयोरपि न प्रायश्चित्तम् ॥ ७ ॥

---

* एतच्चिन्हान्तर्गतो भोगोऽधिकपाठतया परिगणितः ख० पुस्तके। ग० पुस्तके नास्ति पाठः। अन्यत्र तु यथायथमस्ति।

१. आप० गृ० १३. २.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—वह गाँव में सामान्यतः पूर्व की ओर से अथवा उत्तर की ओर से प्रवेश करे ॥ ७ ॥

सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च ॥ ८ ॥

अहोरात्रयोः सन्धानं सन्धिः । तो च द्वौ—सायं प्रातश्च । [1]'सज्जोतिष्या-ज्योतिषोऽदर्शनात्' इति गौतमः । तयोस्सन्ध्ययोर्ग्रामाद्बहिरासीत । वाग्यतश्च भवेत् । मनुः पुनराह—

[2]'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमार्कदर्शनात् ।
पश्चिमां नु समासीत सम्यगृक्षविभावनात् ॥' इति

[3]'तिष्ठेत् पूर्वामासीतोत्तराम्, इति गौतमः । एते ब्रह्मचारिविषये । स्नातके आसनस्य वाङ्नियमनस्य चाऽत्र विधानात् ।

अन्ये तु–आसनग्रहणं स्थानस्याऽप्युपलक्षणम्, वाग्यमश्च लौकिक्या वाचो निवृत्तिः, न सावित्रीजपस्येति वर्णयन्ति ॥ ८ ॥

अनु०—प्रातःकाल तथा सायंकाल सन्ध्या के अवसरों पर ग्राम से बाहर बैठे और मौन रहे ॥ ८ ॥

टि०—'वाग्यतः' का यहाँ यह भी अर्थ लिया गया है कि लौकिक विषयों की चर्चा न करे ॥ ८ ॥

अहिताग्निविषयेऽस्याऽपवादः—

विप्रतिषेधे श्रुतिलक्षणं बलीयः ॥ ९ ॥

विरोधो विप्रतिषेधः अग्निहोत्रिणो बहिरासनमग्निहोत्रहोमश्च विरुध्येते । तथा च श्रूयते–'समुद्रो वा एष यदहो रात्रः 'तस्यैते गाथे तीर्थे यत्सन्धी तस्मात् सन्धौ होतव्यम्'' इति । तत्र श्रुतिलक्षणमग्निहोत्रमेव कर्तव्यम्, न स्मार्त्तं बहिरासनम् । तस्य कल्प्यमूलत्वादितरस्य च क्लृप्तमूलत्वादिति । जैमिनिरप्याह–[4]"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति ॥ ९ ॥

अनु०—(अग्निहोत्री स्नातक घर में अग्निहोत्र करे या गाँव से बाहर जाकर बैठे) इस प्रकार का विरोध उपस्थित होने पर वेद में आदिष्ट (अग्निहोत्र) ही प्रबल माना जायगा (स्मार्त्त नियम को वरीयता नहीं दी जायगी) ॥ ९ ॥

सर्वान्रागान्वाससि वर्जयेत् ॥ १० ॥

---

१. गौ० २. ११ 'सज्योतिषि' इत्यादि 'गौतम' इत्यन्तं नास्ति छ० पु०
२. म० स्मृ० २. १०१
३. गौ० ध० २. ११
४. इत्यादि नास्ति. छ० पु०
५. जै सू १० ३. ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुसुम्भादयस्सर्वे रागाः वाससि वर्जनीयाः, न केनचिद्रक्तं वासो बिभृयादिति ॥ १० ॥

अनु०—सभी प्रकार के रंगीन वस्त्रों का वर्जन करे ॥ १० ॥

कृष्णं च स्वाभाविकम् ॥ ११ ॥

यच्च स्वभावतः कृष्णं कम्बलादि तदपि न वसीत ॥ ११ ॥

अनु०—स्वभावतः कृष्ण वर्ण के वस्त्रों का भी वर्जन करे ॥ ११ ॥

अनूद्भासि वासो वसीत ॥ १२ ॥

उद्भासनशीलमुद्भासि उल्बणम्। ततोऽन्यदनूद्भासि। छान्दसो दीर्घः। एवंभूतं वासो वसीत आच्छादयेत् ॥ १२ ॥

अनु०—अधिक चमकीले वस्त्रों का परित्याग करे ॥ १२ ॥

अप्रतिकृष्टं च शक्तिविषये ॥ १३ ॥

प्रतिकृष्टं निकृष्टं जीर्णं मलवत् स्थूलं च। तद्विपरीतमप्रतिकृष्टम्। तादृशं च वासो वसीत शक्तौ सत्याम् ॥ १३ ॥

अनु०—और यथाशक्ति ऐसे वस्त्रों का भी वर्जन करे जो भद्दे और गन्दे हों ॥

दिवा च शिरसः प्रावरणं वर्जयेन्मूत्रपुरीषयोः कर्म परिहाप्य ॥ १४ ॥

चकारः पूर्वापेक्षया समुच्चयार्थः। दिवा शिरसः प्रावरणं पटादिना न कुर्यात्। किमविशेषेण ? नेत्याह—मूत्रपुरीषयोः कर्म क्रियां परिहाप्य वर्जयित्वा ॥ १४ ॥

अनु—दिन में मूत्र तथा मलत्याग के कर्मों के अवसर को छोड़कर अन्य समय में सिर न ढँके ॥ १४ ॥

शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्यात् भूम्यां किञ्चिदन्तर्धाय ॥ १५ ॥

दिवा रात्रौ च मूत्रपुरीषे कुर्वन् शिरः प्रावृत्य कुर्यात्। भूम्यां किञ्चिदन्तर्धाय तृणादिकम्, न साक्षात् भूम्यामेव। इह कामचारे प्राप्ते 'दिवा च शिरसः प्रावरणं वर्जये' दित्युक्तम्। तस्य पर्युदासः कृतः—'मूत्रपुरीषयोः कर्म परिहाप्ये' ति। तत्र मूत्रपुरीषकाले स एव कामचारः स्थितः। अत आरभ्यते—शिरस्तु प्रावृत्येति। एवं तर्हीदमेवाऽस्तु। न पूर्वः पर्युदासः। सोऽप्यवश्यं कर्तव्यः अन्यथा 'शिरस्तु प्रावृत्ये'त्यस्य रात्रौ चरितार्थत्वात् दिवा प्रतिषेध एव स्यात्। गौतमस्तु रात्रौ सदैव प्रावरणमाह[1] 'न प्रावृत्त्य शिरोऽहनि पर्यटेत्, प्रावृत्य रात्रौ, मूत्रोच्चारे चे'ति ॥ १५ ॥

---

१. गौ० ध० ६. ३५, ३६, ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—सिर को ढँककर ही तथा पृथ्वी पर कुछ (तृण आदि) रखकर ही मूत्र और मल का त्याग करे ॥ १५ ॥

छायायां मूत्रपुरीषयोः कर्म वर्जयेत् ॥ १६ ॥

'न चोपजीव्यच्छायास्वि'ति स्मृत्यन्तरे दर्शनात् यस्यां पथिकादयो विश्राम्यन्ति सा गृह्यते। तेन छत्रच्छायादेरप्रतिषेधः मेघच्छायाया अप्यप्रतिषेधः, अवर्जनीयत्वात् ॥ १६ ॥

अनु०— (वृक्षों की) छाया में मल-मूत्र त्याग के कर्म न करे ॥ १६ ॥

स्वां तु छायामवमेहेत् ॥ १७ ॥

छान्दसस्तुगभावः। द्वितीयाश्रुतेः प्रतिशब्दाध्याहारः। अवमेहनं मूत्रकर्म। अनुपजीव्यत्वान्नायं पूर्वस्य प्रतिषेधस्य विषय इति प्रतिप्रसवोऽयं न भवति। तेन सति सम्भवे स्वामेव छायां प्रत्यवमेढव्यम् ॥ १७ ॥

अनु०—किन्तु अपनी छाया भूमि पर पड़ रही हो तो उसमें मूत्रत्याग कर्म किया जा सकता है ॥ १७ ॥

[1]न सोपानन्मूत्रपुरीषे कुर्यात् ॥१८॥ कृष्टे ॥ १९ ॥ पथि ॥ २० ॥ अप्सु च ॥ २१ ॥ तथा [2]ष्ठेवनमैथुनयोः कर्माऽप्सु वर्जयेत् ॥ २२ ॥ अग्निमादित्यमपो ब्राह्मणं गा देवताश्चाऽभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत् ।२३

स्पष्टानि चत्वारि। ष्ठेवनमास्यश्लेष्मादीनामुत्सर्गः। देवताः देवताप्रतिमाः ॥ १८-२३ ॥

अनु०--जूते पहनकर मूत्र और मल का त्याग न करें ॥ १८ ॥

अनु०—जोते गए खेत में मूत्र और मल का त्याग न करे ॥ १९ ॥

अनु०--मार्ग के ऊपर मूत्र और मल का त्याग न करे ॥ २० ॥

अनु०—और न ही जल में मूत्र और मल का त्याग करे ॥ २१ ॥

अनु०—जल में थूकने या मैथुन कर्म करने का भी वर्जन करे ॥ २२ ॥

अनु०—अग्नि, जल, ब्राह्मण, गौ, देव प्रतिमा की ओर मुख करके मूत्र तथा मल का त्याग न करे ॥ २३ ॥

अश्मानं लोष्टमार्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत् ॥ २४ ॥

फलपाकावसाना ओषधयः। ये पुष्पैर्विना फलन्ति ते वनस्पतयः। 'आर्द्रा'

---

१. एतदादी 'कर्म वर्जये'दित्यन्तंमेकसूत्रतया परिगणितं ख. पुस्तके। सूत्रद्वादशकतया छेदः कृतः क० पु० २. ष्ठीवन इति. ख० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निति वचनात् शुष्केषु न दोषः। 'उध्र्वा' निति वचनाद्वातादिनिमित्तेन भग्नेषु न दोषः। एतैरश्मादिभिर्मूत्रपुरीषयोश्शोधनं न कुर्यात् ॥

अनु०—पत्थर के टुकड़े से, मिट्टी के ढेले से, (फल देने वाले) वृक्षों तथा वनस्पतियों को तोड़े गये हर पत्तों से शरीर में लगे मूत्र और मल को न पोंछे ॥ २४ ॥

अग्निमादित्यमयो ब्राह्मणं गा देवताद्वारं प्रति पादं च शक्तिविषये नाऽभिप्रसारयीत ॥ २५ ॥

शक्तौ सत्यां अग्न्यादीन्प्रति पादौ न प्रसारयेत् ॥ २५ ॥

अनु०—अग्नि, सूर्य, जल, ब्राह्मण, गौ, देवमन्दिर के द्वार की ओर यथाशक्ति पैर न फैलावे ॥ २५ ॥

अथाऽप्युदाहरन्ति ॥ २६ ॥

अनु०—इस विषय में यह उद्धरण भः दिया जाता है ॥ २६ ॥

इत्यापस्तम्बधर्मसूत्रे प्रथमप्रश्ने त्रिंशी कण्डिका ॥ ३० ॥

प्राङ्मुखोऽन्नानि भुञ्जीत्तोच्चरेद्दक्षिणामुखः।
उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति ॥ १ ॥

उक्चारः पुरीषकर्म। पादावनेजनं पादप्रक्षालनम्। भोजनादिषु चतस्रो नियम्यन्ते। मनुस्तु--

[1]"आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः।
श्रियं प्रत्यङ्मुखो भुङ्क्त [2]ऋतं भुङ्क्ते उदङ्मुखः' ॥ इति।

याज्ञल्क्यश्च—

[3]"दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥' इति ॥ १ ॥

अनु०—पूर्व की ओर मुख करके अन्न का भक्षण करे, तथा दक्षिण की ओर मुख करके मल त्याग करे, उत्तर की ओर मुख करके मूत्रत्याग करे और पश्चिम की ओर मुड़कर अपने पैरों को धोवे ॥ १ ॥

आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशं दक्षिणापरां वा ॥ २ ॥

आवसथो गृहम्। तस्य दूरतो मूत्रपुरीषे कुर्यात्, दक्षिणां दिशम्। द्वितीयानिर्देशादभिनिष्क्रम्येति गम्यते। दक्षिणापरा नैर्ऋती ॥ २ ॥

---

१. म० स्मृ० २. ५२ २. ऋतं सत्यं, तत्फलमिच्छन्।
३. या० स्मृ० १. १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—निवास स्थान से दूर दक्षिण या दक्षिण-पश्चिम दिशा में जाकर मूत्र और मल का त्याग करे ॥ २ ॥

अस्तमिते च बहिर्ग्रामादारादावसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेत् ॥ ३ ॥

अस्तमित आदित्ये बहिर्ग्रामान्मूत्रपुरीषे न कुर्यात्। तथा अन्तर्ग्रामेऽपि गृहस्य दूरतो न कुर्यात्। दृष्टार्थोऽयं प्रतिषेधश्चोरव्याघ्रादिशङ्कया। निर्भये देशे नाऽस्ति दोषः ॥ ३ ॥

अनु०—किन्तु सूर्यास्त हो जाने पर ग्राम से बाहर अथवा दूर जाकर मूत्र और मल का त्याग न करे ॥ ३ ॥

टि०—हरदत्त ने व्याख्या में संकेत किया है कि यह निषेध चोर और व्याघ्र आदि की शंका से किया गया है। जहाँ ऐसी शंका न हो वहाँ दूर जाया जा सकता है ॥३॥

देवताभिधानं चाऽप्रयतः ॥ ४ ॥

देवतानामग्न्यादीनामभिधानं चाऽप्रयतस्सन् वर्जयेत्। [1]अपिधानमित्यपि पाठे एष एवार्थः ॥ ४ ॥

अनु०—जब तक अपवित्र हो, तब तक किसी देवता का नाम न ले ॥ ४ ॥

परुषं चोभयोर्देवतानां राज्ञश्च ॥ ५ ॥

देवतानां राज्ञश्चेत्युभयोः। राश्यपेक्षया द्विवचनम्। परुषं निन्दां वर्जयेत् ॥ ५ ॥

अनु०—देवताओं तथा राजा के विषय में कोई निन्दापरक वचन भी न कहे ॥

ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जयेत् ॥ ६ ॥

ब्राह्मणं गां च पादेन नोपस्पृशेत्। इतिशब्दः प्रकारे। तेन विद्यावयोवृद्धानामब्राह्मणानामपि वर्जनम् ॥ ६ ॥

अनु०—अपने चरण से ब्राह्मण, गौ अथवा किसी भी इस प्रकार के पूज्य वस्तु का स्पर्श न करे ॥ ६ ॥

हस्तेन चाऽकारणात् ॥ ७ ॥

कारणमभ्यङ्गकण्डूयनादि। तेन विना हस्तेनाऽप्युपस्पर्शनं वर्जयेत् पूर्वोक्तानाम् ॥ ७ ॥

अनु०—कोई विशेष कारण न रहने पर उन्हें हाथ से भी न छुवे ॥ ७ ॥

गोर्दक्षिणानां कुमार्याश्च परीवादान्वर्जयेत् ॥ ८ ॥

गोरदक्षिणाया अपि दक्षिणानामगवामपि हिरण्यादीनां कुमार्याः कन्या-

---

१. अपिधानमित्यपाठः। एष एवार्थः इति ख०ग०पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याश्च दोषान् सतोऽपि न कथयेत्। अध्यात्मप्रकरणे योगाङ्गतया परीवादः प्रतिषिद्धः। अनन्तरं च वक्ष्यति[1] 'क्रोधादींश्च भूतदाहीयान् वर्जयेदिति। इदं तु वचनं गवादिषु प्रायश्चित्तातिरेकार्थम् ॥ ८ ॥

अनु०—गौ का, यज्ञ की दक्षिण का, किसी कुमारी कन्या का दोष न कहे ॥ ८ ॥

स्पृहतीं च गां नाऽऽचक्षीत ॥ ९ ॥

स्पृहतीं सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् ॥ ९ ॥

अनु०— गाय यदि फसल या अन्न खा रही हो तो स्वामी से न कहे ॥ ९ ॥

संसृष्टां च वत्सेनाऽनिमित्ते ॥ १० ॥

या च गौर्वत्सेन संसृज्यते तामपि न ब्रूयादनिमित्ते-इयं ते गौर्वत्सेन पीयत इति। 'अनिमित्ते' इति वचनात् [2]'यस्य हविषे वत्सा अपाकृता धयेयु' रित्यादिके निमित्ते सति वक्तुर्नास्ति दोषः ॥ १० ॥

अनु०—यदि गौ बछड़े के पास हो (बन्धन से खुलकर दूध पिला रही हो) तो स्वामी से न कहे, जब तक कोई विशेष निमित्त न हो ॥ १० ॥

नाऽधेनुमधेनुरिति ब्रूयात्। धेनुभव्येत्येव ब्रूयात् ॥ ११ ॥

या च गौरधेनुः पयस्विनी भवति तामप्यधेनुरिति न ब्रूयात् ॥ ११

अनु०--जो गाय दूध न दे रही हो उसे अधेनु न कहे अपितु ॥ ११ ॥

किं तर्हि धेनुभव्येत्येव ब्रूयात्--भविष्यन्ती धेनुर्धेनुभव्या। 'धेनोर्भव्यायां (सुम् वक्तव्य)इति सुम् न भवति। च्व्यन्तत्वेनाऽव्ययत्वात्। वक्तव्यत्वे च सति शब्दनियमोऽयम्। न पुनरधेनुदर्शन एवं वक्तव्यम् ॥ १२ ॥

अनु०—उसे 'धेनुभ्यव्य' कहे ॥ १२ ॥

[3] न भद्रं भद्रमिति ब्रूयात् ॥ १३ ॥

यत् भद्रं तत् भद्रमिति न ब्रूयात् ॥ १३ ॥

अनु०—जो भद्र हो उसे भद्र न कहे ॥ १३ ॥

किं तु ?

पुण्यं प्रशास्तमित्येव ब्रूयात् ॥ १४ ॥

पुण्यं प्रशास्तमित्यनयोरन्यतरेण शब्देन ब्रूयात्। प्रशास्तं प्रशस्तम्। छान्दसो दीर्घः ॥ १४ ॥

अनु०—अपितु 'पुण्य' और 'प्रशस्त' कहकर उसका उल्लेख करे ॥ १४ ॥

---

१. आप० ध० ३१. २३ २. आप० श्रौ० ९. १. २३

३. म० स्मृ० ४. १३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[1] वत्सतन्तीं च नोपरि गच्छेत् ॥ १५ ॥

वत्सानां बन्धरज्जुर्वत्सतन्ती। तस्या उपरि न गच्छेत् तां न लङ्घयेत्। वत्सग्रहणं गोजातेरुपलक्षणम् ॥ १५ ॥

अनु०—बछड़े के पगहे के ऊपर पैर रखकर न जावे ॥ १५ ॥

प्रेङ्खावन्तरेण च नाऽतीयात् ॥ १६ ॥

प्रेङ्खौ डोलास्तम्भौ। तोरणस्तम्भावित्यन्ये। तावन्तरेण नाऽतीयात्—तयोर्मध्ये न गच्छेत् ॥ १६ ।

अनु०—जिन खम्भों के बीच झूला लटकाया गया हो उन दोनों के बीच से न जावे ॥ १३ ॥

नाऽसौ मे सपत्न इति ब्रूयात् यद्यसौ मे सपत्न इति ब्रूयात् द्विषन्तं भ्रातृव्यं जनयेत् ॥ १७ ॥

असौ देवदत्तो मे सपत्न इति न ब्रूयात् सदसि। किं कारणम्? यद्यसौ मे सपत्न इति ब्रूयात्, द्विषन्तं क्रियाशब्दोऽयम्, विद्विषाणं भ्रातृव्यं सपत्नं जनयेत् 'व्यन् सपत्ने' इति भ्रातृशब्दे व्यन् प्रत्ययः। एवं ह्युक्ते स मन्येत—नाऽकस्मादयं ब्रूते नूनमस्य मयि द्वेषो वर्तत इति। ततश्च तत्प्रतीकारार्थं यतमानस्सपत्न एव जायते इति ॥ १७ ॥

अनु०—सभा में ऐसा न कहे कि अमुक व्यक्ति मेरा शत्रु है, यदि ऐसा कहता है कि अमुक व्यक्ति मेरा शत्रु है तो वह द्रोह करने वाले शत्रु को पैदा कर देता है ॥ १७ ॥

नेन्द्रधनुरिति परस्मै प्रब्रूयात् ॥ १८ ॥

इन्द्रधनुराकाशे पश्यन् परस्मै तेन शब्देन न ब्रूयात्। यद्यवश्यं वक्तव्यं मणिधनुरिति ब्रूयात्। गौतमीये [2]दर्शनात् ॥ १८ ॥

अनु०—इन्द्रधनुष देखने पर उसके विषय में दूसरे व्यक्ति से न कहे ॥ १८ ॥

न पततः सञ्चक्षीत ॥ १९ ॥

पततः पक्षिणः सङ्घीभूय स्थितान्न सञ्चक्षीत न गणयेत्—इयन्त एत इति। अपर आह—'पुण्यक्षयेण स्वर्गात्पततः सुकृतिनः परस्मै न सञ्चक्षीत-ज्योतींषि पतन्तीति न कथयेत् ॥ १९ ॥

अनु०—जब पक्षी एकत्र हुए हों तो उनकी संख्या की गणना न करे ॥ १९ ॥

उद्यन्तमस्तं यस्तं चाऽऽदित्यं दर्शने वर्जयेत् ॥ २० ॥

---

१. म० स्मृ० ४. ३८ २. गौ० ध० ९. २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदयसमये अस्तमयसमये वा आदित्यं न पश्येत्।

मनुस्तु[1]—

नेक्षेतोद्यन्तमादित्यं नाऽस्तं यन्तं कदाचन।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्॥' इति॥ २०॥

अनु०—उगते हुए तथा अस्त होते हुए सूर्य का दर्शन न करे॥ २०॥

दिवाऽऽदित्यः सत्वानि गोपायति नक्तं चन्द्रमाः। तस्मादमावास्यायां निशायां स्वाधीय आत्मनो गुप्तिमिच्छेत् प्रायत्यब्रह्मचर्यकाले चर्यया च॥ २१॥

दिवा अहनि। आदित्यः सत्वानि गोपायति प्राणिनो रक्षति, आलोकदानेन। नक्तं रात्रौ चन्द्रमाः। तस्मादमावास्यायां निशायां रात्रौ स्वाधीयः। वकारश्छान्दसः। अन्तिकबाढयोर्नेदसाधौ। बाढतरं भृशतरं आत्मनो गुप्तिं रक्षणमिच्छेत्। केन प्रकारेण? प्रायत्यब्रह्मचर्याभ्यां काले चर्यया च। अयं तावदर्थानुरूपः पाठः। अधीयमानस्तु प्रमादश्छान्दसो वा। प्रयतस्य भावः प्रायत्यं नित्यप्रायत्यादधिकेन प्रायत्येन स्नानादिजेन। ब्रह्मचर्येण मैथुनत्यागेन। काले कृतया चर्यया देवार्चनजपादिकया च॥ २१॥

अनु०—दिन में सूर्य जीवों की रक्षा करता है तथा रात्रि में चन्द्रमा। इसलिए अमावस्या की रात्रि में आत्मसंयम, ब्रह्मचर्य तथा समय के अनुरूप चर्या (देवार्चन आदि) के द्वारा प्रयत्नपूर्वक अपनी रक्षा करे॥ २१॥

कस्मात्पुनरस्यां रात्रौ चन्द्रमा न गोपायतीत्याह—

सह ह्येतां रात्रिं सूर्याचन्द्रमसौ वसतः॥ २२॥

एतां रात्रिम्। अत्यन्तसंयोगे द्वितीया। सर्वामेतां रात्रिं सूर्याचन्द्रमसौ सह वसतः। न च सूर्येण सह वसतश्चन्द्रमसः प्रकाशोऽस्ति॥ २२॥

अनु०—क्योंकि उस रात्रि सूर्य और चन्द्रमा एक साथ निवास करते हैं॥ २२॥

न कुसृत्या ग्रामं प्रविशेत्॥ २३॥

कुसृतिः कुमार्गः। तया ग्रामं न प्रविशेत्॥ २३॥

अनु०—किसी बुरे मार्ग से (अप्रचलित मार्ग से) ग्राम में प्रवेश न करे॥ २३॥

यदि प्रविशे 'न्नमो रुद्राय वास्तोष्पतय' इत्येतामृचं जपेदन्यां वा रौद्रीम्॥ २४॥

---

१ मनु० स्मृ० ४. ३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदि गत्यन्तराभावात् प्रविशेत्[1] 'नमो रुद्राये'त्यादिकामृचं जपेत्। अन्यां वा रौद्रीम्[2] 'इमां रुद्राय तवस' इत्यादिकाम्। अत्र वाजसनेयगृह्ये—[3] 'वनं प्रवेक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय वनसदे स्वस्ति मा सम्पारये' ति। पन्थानमारोक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय पथिषदे स्वस्ति मा सम्पारये'ति। अपः प्रवेक्ष्यन्ननुमन्त्रयते—'नमो रुद्रायाऽप्सुपदे स्वस्ति मा सम्पारये'ति। तस्माद्यत्किञ्चन कर्म कुर्वन् स्यात् सर्वं 'नमो रुद्राये' त्येव कुर्यात् 'सर्वो ह्येष रुद्र' इति श्रुतेरिति भारद्वाजगृह्येऽप्यस्मिन्विषये कियानेव भेदः॥ २४॥

अनु०—यदि कारण वश ऐसे मार्ग से प्रवेश करना पड़े, तो 'नमो रुद्राय वास्तोष्पतये' मन्त्र का जप करे, अथवा रुद्र देवता के प्रति उक्त किसी अन्य मन्त्र का जप करे।

नाऽब्राह्मणायोच्छिष्टं प्रयच्छेत्॥ २५॥

अब्राह्मणः शूद्रः। [4]"न शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्या'दिति वासिष्ठे दर्शनात्। तस्मा उच्छिष्टं न प्रयच्छे'दित्यनाश्रितविषयम्॥ २५॥

अनु०—अपने भोजन का उच्छिष्ट अन्न किसी ऐसे व्यक्ति को न देवे जो ब्राह्मण न हो॥ २५॥

यदि प्रयच्छेद्दन्तान् स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत्॥ २६॥

इदमाश्रितविषयम्। दन्तान्नखेन स्कुप्त्वा विलिख्य तन्मलं तस्मिन्नुच्छिष्टेऽवधाय प्रयच्छेत्। 'स्कुप्त्वे'ति स्कुभ्नातेः क्त्वाप्रत्यये छान्दसं भकारस्य चर्त्वम्। स्कुनोतेर्वा पकार उपजनः॥ २६॥

अनु०—यदि किसी अब्राह्मण को अपना उच्छिष्ट अन्न दे तो दाँतों को खरोचकर उनके मल को उस उच्छिष्ट अन्न में रखकर दे॥ २६॥

क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत्॥ २७॥

क्रोधादयो भूतदाहीया अध्यात्मपटले (२२.५) व्याख्याताः। तद्वचनं योगिविषयमित्ययोगिनोऽपि स्नातकस्य क्रोधादिनिवृत्त्यर्थमिदं वचनम्। इदमेव तर्ह्युभयार्थमस्तु—योग्यर्थमयोग्यर्थं च। एवं सिद्धे तद्वचनं क्रोधादिवर्जनस्य योगाङ्गत्वप्रतिपादनार्थम् तेन क्रोधाद्यनुष्ठाने योगसिद्धिर्न भवति। न पुनः स्नातकव्रतलोपप्रायश्चित्तमिति॥ २७॥

अनु०—क्रोध आदि जैसे उन दोषों से दूर रहे जो योग की सिद्धि में बाधक होते हैं।

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने एकत्रिंशी कण्डिका॥ ३१॥

१. ब्रा० ३. ७. ९ नमो रुद्राय वास्तोष्पतये। आयने विद्रवणे। उद्यायने यत्परायणे। आवर्तने निवर्तने। यो गोपायति तꣳ हुवे॥ इति समग्रा ऋक्॥

२. इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय' इतिरुद्राध्यायगता (तै०सं०४.५.१०)

३. पार० गृ० ३. १५. ११ ४. व० ध० १८ १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवचनयुक्तो वर्षाशरदं मैथुनं वर्जयेत् ॥ १ ॥

प्रवचनमध्यापनम्। तेन युक्तो वर्षासु शरदि च मैथुनं वर्जयेत् ऋतावपि॥१॥

अनु०—अध्यापन करने वाला वर्षा तथा शरद् ऋतुओं में मैथुन कर्म से विरत रहे ॥ १ ॥

मिथुनीभूय च न तया सह सर्वां रात्रिं शयीत ॥ २ ॥

मिथुनीभूय मैथुनं कृत्वा तथा भार्यया सह तां रात्रिं सर्वां न शयीत ॥ २ ॥

अनु०—यदि पत्नी के साथ मैथुन भी करे तो सम्पूर्ण रात्रि उसके साथ शयन न करे ॥ २ ॥

शयानश्चाऽध्यापनं वर्जयेत् ॥ ३ ॥

दिवा नक्तं च शयानस्याऽध्यापनप्रतिषेधः। स्वयं तु धारणार्थमधीयानस्य न दोषः ॥ ३ ॥

अनु०—(दिन में या रात्रि में) लेटकर न पढ़ावे ॥ ३ ॥

न च तस्यां शय्यायामध्यापयेद्यस्यां शयीत ॥ ४ ॥

यस्यां शय्यायां भार्यया सह शयीत रात्रौ तस्यां शय्यायामासीनोऽपि नाऽध्यापयेत् ॥ ४ ॥

उत्तर एक स्वच्छ स्थान पर रुद्र के लिए बलि अर्पित करे, इस प्रकार उसका घर समृद्ध होगा ॥ २४ ॥

ब्राह्मण आचार्यः स्मर्यते तु ॥ २५ ॥

तुशब्दोऽवधारणार्थो भिन्नक्रमश्च । ब्राह्मण एव सर्वेषामाचार्यः स्मर्यते धर्मशास्त्रेषु । इहाऽपि वक्ष्यति 'स्वकर्म ब्राह्मणस्ये' (२.१०.४.) त्यादि । अनुवादो ऽयमापदि कल्पान्तरं वक्तुम् ॥ २५ ॥

अनु०—स्मृतियों में कहा गया है कि केवल ब्राह्मण ही आचार्य हो सकता है ॥ २५ ॥

तदाह—

आपादि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनम् ॥ २६ ॥

कर्तव्यमित्यध्याहार्यम् । ब्राह्मणस्याऽध्यापयितुरलाभ आपात् । तत्राऽऽपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनं कर्तव्यम् । न त्वनधीयानेन स्थातव्यम् । 'ब्राह्मणेने'ति वचनाद्राजन्यवैश्ययोर्नाऽयमनुकल्पः ॥ २६ ॥

अनु०—आपत्तिकाल में ब्राह्मण क्षत्रिय या वैश्य से विद्याध्ययन कर सकता है ॥ २६ ॥

अनुगमनं च पश्चात् ॥ २७ ॥

अनुगमनं च पृष्ठतः कर्तव्यं यावदध्ययनम् । पश्चाद्ग्रहणं लज्जादिना कियत्यपि पार्श्वे गतिर्माभूदिति । सर्वशुश्रूषाप्रसङ्गे नियमः—ब्राह्मणस्याऽनुगमनमेव शुश्रूषेति । तथा च गौतमः—[1]'अनुगमनं शुश्रूषे'ति ॥ २७ ॥

अन०—शिष्य रहते समय उस क्षत्रिय या वैश्य गुरु के पीछे-पीछे भी चले । २७ ॥

तत ऊर्ध्वं ब्राह्मण एवाऽग्रे गतौ स्यात् ॥ २८ ॥

ततोऽध्ययनादूर्ध्वं समाप्तेऽध्ययने ब्राह्मण एवाग्रतो गच्छेत् ॥ २८ ॥

अनु०—अध्ययन समाप्त होने के बाद वह ब्राह्मण ही अपने क्षत्रिय या वैश्य गुरु के आगे-आगे चलेगा ॥ २८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्ज्वलायां द्वितीयप्रश्ने चतुर्थी कण्डिका ॥४॥

सर्वविद्यानामप्युपनिषदामुपाकृत्याऽनध्ययनं तदहः ॥ १ ॥

कर्मणि षष्ठी । सर्वविद्या अङ्गविद्या अप्युपनिषद उपाकृत्याध्येतुमारभ्य

---

१. गौ० ध० ७. २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदहरनध्ययनं तस्मिन्नहन्यध्ययनं न कर्तव्यम् । उपनिषद्ग्रहणं प्राधान्यख्यापनार्थम् । ब्राह्मणा आयाता, वसिष्ठोऽप्यायात इतिवत् ॥ १ ॥

अनु०—सभी विद्याओं और उपनिषद् का अध्ययन प्रारम्भ करने के बाद उस दिन अध्ययन न करे ॥ १ ॥

अधीत्य चाऽविप्रक्रमणं सद्यः ॥ २ ॥

अधीत्य 'वेदमधीत्य स्नास्य' न्नित्यवसरे आचार्यसकाशाद् सद्यो विप्रक्रमणं न कर्तव्यं नाऽपगन्तव्यम् प्रायेण सकारात्परसिकारमधीयते । तत्रात्येष एवार्थः । इकारस्तु छान्दसोऽपपाठो वा[२] ॥ २ ॥

अनु०—अध्ययन समाप्त करने के बाद गुरु के समीप से तत्काल नहीं चल देना चाहिए ॥ २ ॥

यदि त्वरेत गुरोः समीक्षायां स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवति ॥ ३ ॥

यदि कार्यवशात् गन्तुं त्वरेत तदा गुरोराचार्यस्य समीक्षायां सन्दर्शने संश्रये स्वाध्यायं प्रश्नावरमधीत्य यथाकामं गच्छेत् । एवं कृते उभयोः शिष्याचार्ययोः शिवं भवतीति ॥ ३ ॥

अनु०—यदि (किसी कार्य से) जाने की जल्दी हो तो आचार्य के सामने अपने स्वाध्याय का अध्ययन करके अपनी इच्छानुसार जावे । ऐसा करने पर शिष्य और आचार्य दोनों का शुभ होता है ॥ ३ ॥

समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखोऽभ्यागम्य तस्योपसङ्गृह्य न बीभत्समान उदकमुपस्पृशेत् पुरस्कृत्योपस्थाप्य यथोपदेशं पूजयेत् ४

समावृत्तं चेत् शिष्यं कृतदारमाचार्योऽभ्यागच्छेत् अतिथिधर्मेण । तमभिमुखोऽभ्यागम्य । तस्योपसंगृह्य । कर्मणि षष्ठी । तमुपसंगृह्य । यद्यपि तस्य चाण्डालादिस्पर्शः सम्भाव्यते, तथापि न बीभत्समान उदकमुपस्पृशेत् न स्नायात् । उपसंग्रहणे वा धूलिधूसरौ पादौ स्पृष्ट्वा न बीभत्समान उदकमुपस्पृशेत् । ततस्तं पुरस्कृत्य गृहप्रवेशे अग्रे कृत्वा । पूजासाधनान्युपस्थाप्य यथोपदेशं गृह्योक्तेन मार्गेण मधुपर्केण पूजयेत् । पूजाविधानं गृह्योक्तस्याऽयमनुवाद आसनादिषु विशेषं वक्तुम् ॥ ४ ॥

अनु०—समावर्तन के बाद यदि पहले के आचार्य घर आवें तो उनकी ओर बढ़कर अगवानी करे, उनके चरणों को ग्रहण करे, उसके बाद घृणा का भाव

---

१. आप० गृ० १२ १

२. एतदनन्तरं 'उपाकरणात् परमित्यन्ये' इति ङ० पुस्तकेऽधिकः पाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदर्शित करते हुए स्नान न करे। उन्हें आगे करके घर में प्रवेश करे और सत्कार की वस्तुएँ जुटाकर उपदिष्ट विधि के अनुसार उनका पूजन करे।

टि०—हरदत्त ने व्याख्या में यह स्पष्ट किया है कि यदि आचार्य का चण्डाल द्वारा स्पृष्ट होना ज्ञात हो अथवा उनके चरण धूलिधूसरित हो, तब भी उनके चरणों को बिना घृणा प्रदर्शित किए हुए स्पर्श करे ॥ ४ ॥

तमाह—

आसने शयने भक्ष्ये भोज्ये वाससि वा सन्निहिते निहीनतरवृत्तिः स्यात् ॥ ५ ॥

सन्निहित आचार्ये तस्मिन्नेव गृहे अपवरकादिकं प्रविष्टे आसनादिषु निहीनतरवृत्तिः स्यात्। तरप्निर्देशात् नीच आसने गुणतोऽपि निकृष्ट आसीत। एवं शयनादिष्वपि द्रष्टव्यम् ॥ ५ ॥

अनु०—यदि गुरु समीप में उपस्थित हों तो स्वयं उनकी अपेक्षा हीन अ सन, शय्या, भक्ष्य तथा भोज्य पदार्थ एवं वस्त्र धारण करे ॥ ५ ॥

तिष्ठन् सव्येन पाणिनाऽनुगृह्याचार्य[1]माचमयेत् ॥ ६ ॥

तिष्ठन्निति प्रह्व उच्यते, स्थानयोगात्। न हि साक्षात्तिष्ठन्नाचमयितुं प्रभवति। सव्येन पाणिना करकादिकमनुगृह्याऽधस्ताद्गृहीत्वा इतरेण द्वारमवमृश्येत्यर्थसिद्धत्वादनुक्तम्। एवं कृत्वाऽऽचार्यमाचमयेत् स्वयमेव शिष्यः। एवं हि स[2] सम्मतो भवति। आचार्ये प्रकृते पुनराचार्यग्रहणमातिथ्यदन्यत्राप्याचार्यमाचमयन्नेवमेवाचमयेदिति ॥ ६ ॥

अनु०—झुक कर खड़े होकर अपना बांया हाथ जलपात्र के नीचे रखे तथा दूसरे हाथ से उसका मुख झुकाकर गुरु को आचमन के लिए जल प्रदान करे ॥ ६ ॥

अन्यं वा समुदेतम् ॥ ७ ॥

वाशब्दः समुच्चये। अन्यमप्येवमेवाचमयेत्। स चेत् समुदेतः कुलशीलवृत्तविद्यावयोभिरुपेतो भवति ॥ ७ ॥

अनु०—इसी प्रकार अन्य अतिथियों को भी जो सभी उत्तम गुणों से सम्पन्न हों, आचमन के लिए जल प्रदान करे ॥ ७ ॥

स्थानासनचंक्रमणस्मितेष्वनुचिकीर्षन् ॥ ८ ॥

व्यवहितमपि स्यादित्यपेक्ष्यते। चिकीर्षया करणं लक्ष्यते। स्थानादिष्वाचार्यस्य पश्चाद्भावी स्यात्। न पूर्वभावी। न युगपद्भावी ॥ ८ ॥

---

१. आचामयेत् इति क० पु

२. धर्मयुतः इति० घ० पु० धर्मतो भवति० इति ? ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—(गुरु के) उठने, बैठने, चलने और मुस्कराने पर (गुरु के) बाद में उठे, बैठे, चले और मुस्कराये ॥ ८ ॥

सन्निहिते मूत्रपुरीषवातकर्मोच्चैर्भाषाहास[1]ष्ठीवनदन्तस्कवननिःशृङ्खण-भ्रूक्षेपणतालननिष्ठ्यानीति ॥ ९ ॥

वातकर्म अपानवायोरुत्सर्गः । उच्चैर्भाषा महता स्वनेन सम्भाषणं केनाऽपि । हासो हसनम् । ष्ठीवनं श्लेष्मादिनिरसनम् दन्तस्खलनं दन्तमलापकर्षणम् । परस्परघट्टनमित्यन्ये । निःशृङ्खणं नासिकामलनिस्सारणम् । भ्रूक्षेपणं भ्रूविक्षेपः । छान्दसो ह्रस्वः । तालनं हस्तयोरास्फालनम् । निष्ठ्यमङ्गुलिस्फोटनम् । इतिशब्दादन्यदपि स्वैरासनादिकम् । वर्जयेदित्यपेक्ष्यते । एतानि मूत्रकर्मादीन्याचार्यस्य सन्निधौ न कुर्यादिति ॥ ९ ॥

अनु०—गुरु के निकट होने पर मूत्र या मल का त्याग न करे, अपानवायु न छोड़े, ऊँची आवाज में न बोले, हँसे नहीं, थूके नहीं, अपने दातों को न साफ करे, छिनके नहीं, भौहें टेढ़ी न करे, ताली न बजावे और न अँगुलियों को चटकावे ॥९॥

दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत् ॥ १० ॥

उपस्पर्शनमालिङ्गनाघ्राणादि । भाषाः सम्भाषाश्चाटुप्रभृतयः । एता अप्याचार्ये सन्निहिते[2] दारप्रजाविषये विस्रब्धं न कुर्यात् । ज्वरादिपरीक्षायां न दोषः ॥ १० ॥

अनु०—अपनी पत्नी और बच्चों का आलिङ्गन, चुम्बन तथा उनसे मधुर भाषण भी गुरु के निकट रहने पर न करे ॥ १० ॥

वाक्येन वाक्यस्य प्रतिघातमाचार्यस्य वर्जयेच्छ्रेयसां च ॥ ११ ॥

आचार्यवाक्यस्य समीचीनस्येतरस्य वा आत्मीयेन वाक्येन तादृशेन प्रतिघातं न कुर्यात् । श्रेयसां च अन्येषामपि प्रशस्ततराणां वाक्यं वाक्येन न प्रतिहन्यात् ॥ ११ ॥

अनु०—गुरु के किसी वाक्य का अपने वाक्य से खण्डन न करे और दूसरे भी श्रेष्ठ जनों के बचनों को न काटे ॥ ११ ॥

सर्वभूतपरीवादाक्रोशांश्च ॥ १२ ॥

सर्वेषां भूतानां तिरश्चामपि । परीवादान् दोषवादान् । आक्रोशान् अश्लीलवादांश्च वर्जयेत् । परीवादस्य पुनःपुनर्वचनमतिशयेन वर्जनार्थम् ॥ १२ ॥

अनु०—सभी प्राणियों में किसी का भी दोष न कहे और न किसी पर अपना आक्रोश व्यक्त करे ॥ १२ ॥

---

१. ष्ठेवन० इति० क० पु २. 'दारे प्रजाविषयेऽपि' इति० क० छ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यया च विद्यानाम् ॥ १३ ॥

विद्यया च विद्यानां परीवादक्रोशान् वर्जयेत्। ऋग्वेद एव श्रोत्रसुखः अन्ये श्रवणकटुका इति परीवादाः। तैत्तिरीयकमुच्छिष्टशाखा, [1]याज्ञवल्क्यादीनि ब्राह्मणानीदानींतनानि इत्याद्याक्रोशः ॥ १३ ॥

अनु०—किसी विद्या के साथ तुलना करके दूसरी विद्याओं को हीन न बतावे ॥ १३ ॥

यया विद्यया न विरोचेत पुनराचार्यमुपेत्य नियमेन साधयेत् ॥ १४ ॥

यया विद्ययाऽधीतया श्रुतया वा न विरोचेत न यशस्वी स्यात्, तामित्यर्थाद्गम्यते। तां विद्यां पुनस्साधयेत्। यथा सम्यक् सिद्धा भवति तथा कुर्यात्। कथम्? आचार्यं तमेवा[2]न्यं वा उपेत्य उपसद्य। नियमेनाऽपूर्वाधिगमे विद्यार्थस्य यो नियम उक्तः तेन शुश्रूषादिना ॥ १४ ॥

अनु०—यदि वह पहले पढ़ी गयी विद्या की किसी शाखा में निष्णात न हुआ हो उस विद्या की शाखा का पुनः गुरु के समीप जाकर अध्ययन करे तथा नियमों का पालन भी पूर्ववत् करे ॥ १४ ॥

अस्मिन्विषयेऽध्यापयितुर्नियमः—

उपाकरणाद्योत्सर्जनादध्यापयितुर्नियमो लोमसंहरणं मांसं श्राद्धं मैथुनमिति वर्जयेत् ॥ १५ ॥

लोमसंहरणं लोमवापनम्। इदमनाहिताग्निविषयम् आहिताग्नेस्तु [3]"अप्यल्पशो लोमानि वापयत इति वाजसनेयकम्" इति ॥ १५ ॥

अनु०—उपाकरण से लेकर उत्सर्जन तक अध्यापन करने वाला इन नियमों का पालन करे—शरीर के केशों को न काटे, मांस श्राद्ध के अन्न का भक्षण न करे, मैथुन न करे ॥ १५ ॥

ऋत्वे वा जायाम् ॥ १६ ॥

ऋतुकाले वा जायामुपेयात्। स्त्रीणामृतुदिनानि षोडश। तत्र भवः काल ऋत्व्यः। [4]भवे छन्दसीति यत्प्रत्यये [5]'ऋत्व्यवास्त्व्ये'ति सूत्रेण यणादेशो निपातितः। ऋत्व्य इति रूपसिद्धिः। अत्र यलोपश्छान्दसः। चातुर्मास्येषु प्रयुक्तम्—[6]'ऋत्वे वा जायाम्, नोपर्यास्ते' इति यथा ॥ १६ ॥

---

१. याज्ञवल्क्यादि ब्राह्मणादीदानींतनम् इति० क० छ० पु

२. अन्यं वा इति नास्ति च० पु

३. आप० श्रौ० ४. १. ५

४. पा० सू० ४. ४. ११०

५. पा० सू० ६. १. १७५

६. आप श्रौ० ८, ४. ६. ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—अथवा ऋतुकाल में पत्नी के साथ मैथुन करे ॥ १६ ॥

यथागमं शिष्येभ्यो विद्यासम्प्रदाने नियमेषु च युक्तः स्यादेवं वर्तमानः पूर्वापरान् सम्बन्धानात्मानं च क्षेमे युनक्ति ॥ १७ ॥

येन प्रकारेणाऽऽगमः पाठार्थयोः तथैव शिष्येभ्यो निर्मत्सरेण विद्या सम्प्रदेया । एवंभूते विद्यासम्प्रदाने युक्तो [1]वहितः स्यात् । ये च गृहस्थस्य नियमोऽध्यापनेऽन्यत्र च, तेष्वपि युक्तः स्यात् । एवं युक्तो वर्तमानः पूर्वान् पितृपितामहप्रपितामहान् । अपरांश्च पुत्रपौत्रनप्तॄन् । सम्बन्धान् । कर्मणि घञ् । सम्बन्धिनः पुरुषान् । आत्मानं च क्षेमे अभये स्थाने नाकस्य पृष्ठे । युनक्ति स्थापयति ॥ १७ ॥

अनु०—विद्या प्रदान करते समय इस प्रकार सावधान होकर विद्या प्रदान करे कि शिष्य को पाठ और अर्थ का बोध हो जाय, तथा अध्यापन के समय गृहस्थ के विहित नियमों का कड़ाई से पालन करे, जो इस प्रकार आचरण करता है वह स्वयं स्वर्ग का सुख प्राप्त करता है तथा उसके वंशज और पूर्वज भी कल्याण के भागी होते है ॥ १७ ।

मनसा वाचा प्राणेन चक्षुषा श्रोत्रेण त्वक्छिश्नोदरारम्भणानास्रावान् परीवृञ्जानोऽमृतत्वाय कल्पते ॥ १८ ॥

यैः पुरुष आस्राव्यते बहिराकृष्यते । ते आस्रावाः शब्दादयो विषयाः । ते विशेष्यन्ते त्वक्छिश्नोदरारम्भणात् आरभ्यन्ते[2] आलम्ब्यन्त इत्यारम्भणाः । तत्र त्वगालम्बनाः स्रक्चन्दनादयः । शिश्नालम्बनाः स्त्र्युपभोगादयः । उदरालम्बना भक्ष्यभोज्यादयः । उपलक्षणं त्वगादिग्रहणम् । एवंभूतानास्रावान् मनआदिभिः पञ्चभिरिन्द्रियैः परिवृञ्जानस्सर्वतो वर्जयन् अमृतत्वाय मोक्षाय कल्पते । तत्र वागिति रसनेन्द्रियमाह । प्राण इति घ्राणम् ॥ १८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने पञ्चमी कण्डिका ॥ ५ ॥

अनु०—जो मन से, वाणी से, प्राण से, नेत्रों, कानों, त्वचा, शिश्न, उदर से विषयों के उपभोग का पूरी तरह परिवर्जन करता है वह मोक्ष प्राप्त करता है ॥ १८ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां द्वितीयप्रश्ने द्वितीयः पटलः ॥ २ ॥

---

१. विहितः इति क० ङ० पु०

२. आलभ्यन्ते इति च० पु०

३. अभक्ष्या अभोज्यादयः इति० क० च० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ तृतीयः पटलः

जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् ॥ १ ॥

अविज्ञात पूर्वो यो धर्मार्थमध्ययनार्थमागच्छेत् उपसीदेत् 'उपसन्नोऽस्मि भगवन् , मैत्रेण चक्षुषा पश्य, शिवेव मनसाऽनुगृहाण, प्रसीद् मामध्यापयेति। तस्य जात्याचारसंशये सति। अग्निमुपसमाधाय 'यत्र क्वचाग्निमित्याद्यन्यदुपदध्या (२.२ १३.१४.) दित्यन्तं कृत्वा। तत्सन्निधौ जातिमाचारं च पृच्छेत्—'किंगोत्रोऽसि सौम्य, किमाचारश्चासीति॥ १॥

अनु०—अध्ययन के लिये आये हुए व्यक्ति की जाति और आचार के विषय में शङ्का हो तो अग्नि के उपसमाधान की विधि के अनुसार अग्नि प्रज्वलित करे और उससे उसके जाति और आचार के विषय में प्रश्न करे ॥ १ ॥

साधुतां चेत्प्रतिजानीतेऽग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽऽनुख्याता साधुतां चेत्प्रतिजानीते साध्वस्मा अस्तु वितथ एष एनस इत्युक्त्वा शास्तुं प्रतिपद्यते ॥ २ ॥

स चेत्साधुतां प्रतिजानीते—साधुजन्माऽस्मि, अमुष्य पुत्रोऽमुष्य पौत्रोऽमुष्य नप्ता, साध्वाचारश्चास्मि, पित्रैवो [1]पानेषि, शिक्षिताचारश्चास्मि, सम्यक्चावर्तिषि' विधिबलेन तु बाल्य एव स दिष्टां गतिं गतः, एतस्मात्केवलमन धीतवेद इति, तत्रोऽग्निरुपद्रष्टे'त्यादिकं मन्त्रमुक्त्वा शास्तुं शासितुमध्यापयितुं धर्माश्चोपदेष्टुं प्रतिपद्येत उपक्रमेत ॥ २ ॥

अनु०—यदि वह अपने को उत्तम कुल का तथा उत्तम आचार वाला बतावे तो गुरु इस प्रकार कहे समीप से देखने वाला अग्नि, सुननेवाला वायु—तथा आदित्य इसकी साधुता के साक्षी हों, इसे कल्याण प्रदान करें, इसके पाप को शान्त करें और ऐसा कहकर अध्यापन में प्रवृत्त हो ॥ २ ॥

पञ्चयज्ञान्ते 'अतिथीनेवाग्रे भोजये'दित्युक्तम्। तत्प्रकारं वक्तुं तस्याऽवश्यकर्तव्यतामनेनाऽऽह—

अग्निरिव ज्वलन्नतिथिरभ्यागच्छति ॥ ३ ॥

अतिथिर्गृहानभ्यागच्छन्नग्निरिव ज्वलन्नभ्यागच्छति। तस्मादसौ भोजनादिभिरवश्यं तर्पयितव्यः। निराशस्तु गतो गृहान् दहेदिति ॥ ३ ॥

अनु०—अतिथि अग्नि की तरह जलता हुआ घर में आता है ॥ ३ ॥

---

१. उपनायिषि० इति० घ० ङ० पु० २. सर्वे ···गताः इति क० च० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदानीमतिथिलक्षणं वक्तुं तदुपयोगिश्रोत्रियलक्षणमाह—

धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ॥ ४ ॥

विद्यार्थस्य यो नियमः स धर्मः। तेन वेदानां यां काञ्चन शाखामधीत्य श्रोत्रियो भवति। पुरुषस्य हि प्रतिवेदमेकैका शाखा भवति। या पूर्वैः परिगृहीताऽध्ययनानुष्ठानाभ्यां सा प्रतिवेदं स्वशाखा। तामधीत्य श्रोत्रियो भवति, न तु प्रतिवेदमेकैकामधीत्य श्रोत्रियो भवतीति। लोकविरोधात्। लोके हि यां कांचनैकां शाखामधीयानः श्रोत्रिय इति प्रसिद्धः॥ ४ ॥

अनु०—जो (ब्रह्मचर्य के) नियमों का पालन करते हुए वेद की किसी एक शाखा का पूरी तरह अध्ययन करता है वह श्रोत्रिय कहलाता है ॥ ४ ॥

अतिथिलक्षणमाह—

[1]स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो [2]नाऽन्यप्रयोजनः सोऽतिथिर्भवति ॥ ५ ॥

आदितो यच्छब्दो द्रष्टव्यः। अन्ते स इति दर्शनात्। मध्ये च श्रोत्रियलक्षणोपदेशात्। तदुपजीवनेन सूत्रं योज्यम्। यः श्रोत्रियः स्वधर्मयुक्तं स्वधर्मनिरतं कुटुम्बिनं भार्यया सह वसन्तं गृहस्थम्। आश्रमान्तरनिरासार्थमिदमुक्तम्। न हि ते पचमाना भवन्ति। भिक्षवो हि ते। अभ्यागच्छति उद्दिश्याऽऽगच्छति। धर्मपुरस्कारः[3] आचार्याद्यर्थं भिक्षणं धर्मः तं पुरस्करोतीति धर्मपुरस्कारः। कर्मण्यण्। धर्मप्रयोजनः नान्यप्रयोजनः। य एवंभूत एवंभूतमुद्दिश्याऽऽगच्छति नान्येच्छया सोऽतिथिरिति। [4]'बौधायनस्तु श्रान्तोऽदृष्टपूर्वः केवलमन्नार्थी नाऽन्यप्रयोजनस्सोतिथिर्भवति। अथ वा सर्ववर्णानामन्यतमः काले यथोपपन्नः सर्वेषामतिथीनां श्रेष्ठोऽतिथिर्भवती'ति ॥ ५ ॥

अनु०—जो व्यक्ति अपने धर्म में निरत रहने वाले गृहस्थ के यहाँ केवल धर्म के प्रयोजन से जाता है, किसी अन्य प्रयोजन से नहीं वह अतिथि होता है ॥ ५ ॥

तस्य पूजायां शान्तिः स्वर्गश्च ॥ ६ ॥

तस्यातिथेः पूजायां कृतायां शान्तिरुपद्रवाणामिह भवति। प्रेत्य च स्वर्गलाभः ॥ ६ ॥

अनु०—ऐसे व्यक्ति का सत्कार करने से उपद्रवों की शान्ति होती है तथा स्वर्ग का फल प्राप्त होता है ॥ ६ ॥

तमभिमुखोऽभ्यागम्य यथावयस्समेत्य तस्यासनमाहारयेत् ॥ ७ ॥

---

१. एतदादि ११ सूत्रार्धं यावदेकीकृतम् छ० पु २. नान्नप्रयोजन; इति क० पु
३. आचार्यस्यार्थे इति० घ० ङ० पु ४. एतदादि ११ सूत्रे निवेशितं छ० पु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमतिथिमभिमुखोऽभ्यागच्छेत्। अभ्यागम्य यथावयः वयसोऽनुरूपं प्रत्युत्थानाभिवादनादिना समेयात् सङ्गच्छेत। समेत्य च तस्यासनमाहारयेत् शिष्यादिभिः। अभावे स्वयमाहरेत्॥ ७॥

अनु०—ऐसे अतिथि की उठकर अगवानी करे, उसकी अवस्था के अनुसार उसका आदर करे, उससे मिले और उसके लिए आसन ले आवे॥ ७॥

शक्तिविषये नाऽबहुपादमासनं भवतीत्येके॥ ८॥

शक्तौ सत्यां अबहुपादमासनं न देयम्। किं तु बहुपादमेव पीठादिकमित्येके मन्यन्ते। [1]स्वमतं त्वबहुपादमपोति॥ ८॥

अनु०—कुछ आचार्यों का कथन है कि यदि सम्भव हो तो अतिथि का आसन अनेक पायों वाला होवे॥ ८॥

तस्य पादौ प्रक्षालयेच्छूद्रमिथुनावित्येके॥ ९॥

द्वौ शूद्रौ तस्य पादौ प्रक्षालयेतामित्येके मन्यन्ते। दासवत इदम्॥ ९॥

अनु०—उसके चरणों को धोवे। कुछ आचार्यों का कथन है कि अतिथि के पैरों को दो शूद्र धोवें॥ ९॥

अत्र विशेषः—

अन्यतरोऽभिषेचने स्यात्॥ १०॥

अभिषेचनं करकादिना जलावसेकः। तमेकः कुर्यात्। इतरः प्रक्षालनम्॥ १०॥

अनु०—उनमें से एक जल गिरावे (दूसरा पैर धोवे)॥ १०॥

तस्योदकमाहारयेदन्मृण्मयेनेत्येके॥ ११॥

मृण्मयेन पात्रेण तस्योदकमाहर्तव्यमित्येके मन्यन्ते। [2]स्वमतं तु तैजसेन॥ ११॥

अनु०—कुछ आचार्यों का अभिमत है कि अतिथि के लिए मिट्टी के पात्र में जल लावे। ११॥

नोदकमाहारयेदसमावृत्तः॥ १२॥

यदा असमावृत्तो ब्रह्मचारी आचार्यप्रेषितः स्वयमेव वाऽतिथिरभ्यागच्छति तदा नासावुदकमाहारयेत् नासावुदकाहरणस्य प्रयोजकः। नास्मा उदकमाहर्तव्यमिति॥ १२॥

अनु०—किन्तु जिस अतिथि का समावर्तन न हुआ हो उस अतिथि के लिए स्वयं जल न लावे॥ १२॥

---

१. स्वयं त्वबहुपामप्यनुमन्यते इति च० पु० २. स्वयं तु ङ० च० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अध्ययनसांवृत्तिश्चात्राऽधिका ॥ १३ ॥

अत्र असमावृत्तेऽतिथौ अध्ययनसंवृत्तिश्चाधिका इतरस्मादतिथेः। अध्ययनस्य सह निष्पादनमध्ययनसंवृत्तिः। यः प्रदेशस्तस्याऽऽगच्छति स तेन सह कियन्तञ्चित्कालं वक्तव्य इति। प्रसिद्धे तु पाठे पूर्वपदान्तस्य समोऽकारस्य छान्दसो दीर्घः॥ १३॥

अनु०—इस प्रकार के असमवावृत्त अतिथि के आने पर अन्य अतिथियों की अपेक्षा अधिक समय तक उसके साथ स्वाध्याय की आवृत्ति करे ॥ १३ ॥

सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्ध्येनेति ॥ १४ ॥

ततः पदप्रक्षालनस्य समध्ययनस्य वाऽनन्तरमतिथिं प्रियवचनेन सान्त्वयेत्। सान्त्वयित्वा गव्यादिभीरसैः फलादिभिश्च भक्ष्यैरन्ततोऽद्भिरपि तावत्तर्पयेत् तृप्तिं कुर्यात्। 'अवरार्ध्येने'ति जघन्यकल्पतां सूचयति। अप्यन्तत इत्यर्थः। इतिशब्दादेवमादिभिरन्यैरपि॥ १४॥

अन०—अतिथि के साथ सौहार्द पूर्वक संभाषण करे, दूध या अन्य पेय पदार्थों से उसे संतुष्ट करे, खाद्य पदार्थ से तृप्त करे और कम से कम जल ही प्रदान करे ॥ १४ ॥

आवसथं दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनं चेति ॥ १५ ॥

आवसथो विश्रामस्थानम्। उपरिशय्या खट्वा। उपस्तरणं तूलिका। उपधानमुपबर्हणम्। अवस्तरणमुपरिपटः। तत्सहितमुपधानमुपस्तरणं च। अभ्यञ्जनं पादयोः तैलं घृतं वा। एतत्सर्वं दद्यात्। भोजनात्प्रागूर्ध्वं वा अपेक्षिते काले। इतिशब्दादन्यदप्यपेक्षितम्॥ १५॥

अनु०—अतिथि को रहने के लिए स्थान दे, शय्या, चटाई, तकिया, चादर, अञ्जन आदि अन्य आवश्यक वस्तुएँ प्रदान करे॥ १५ ॥

अन्नसंस्कर्तारमाहूय व्रीहीन् यवान्वा तदर्थान्निर्वपेत् ॥ १६ ॥

यः पचति तमन्नसंस्कर्तारमाहूय तदर्थानतिथ्यर्थान् व्रीहीन्यवान्वा निर्वपेत् पृथक्कृत्य दद्यात्—अमुष्मै पचेति। व्रीहियवग्रहणमुपलक्षणम्। इदं भुक्तवत्सु सर्वेष्वतिथावुपस्थिते द्रष्टव्यम्॥ १६॥

अनु०—(सभी के भोजन कर लेने के बाद अतिथि के आने पर) रसोई बनाने वाले को बुलाकर अतिथि का भोजन बनाने के लिए जौ या चावल प्रदान करे ॥१६॥

भोजनकाले त्वाह—

उद्धृतान्यन्नान्यवेक्षेतेदं भूया३इद३मिति ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावन्तो भोक्तारस्तावद्वा अन्नान्युद्धृत्य पृथक्पात्रेषु कृत्वा स्वयं संविभागं कृत्वा तान्यन्नान्यवेक्षेत–किमिदं भूयः प्रभूतमिदं वेति । विचारे प्लुतः । [1]"पूर्वं तु भाषाया'मित्येतदुपक्षितं छान्दसोऽयं [2]प्रयोग इति ॥ १७ ॥

अनु०—(यदि अतिथि के आने पर भोजन तैयार हो तो) वह स्वयं भोजन का अंश यह कहते हुए निकाले कि यह अंश अधिक है या यह अंश ॥ १७ ॥

भूय उद्धरेत्येव ब्रूयात् ॥ १८ ॥

एवमवेक्ष्याऽतिथ्यर्थं भूय उद्धरेत्येव ब्रूयात् ॥ १८ ॥

अनु०—(अतिथि के लिए) अधिक अंश निकालो, इस प्रकार कहे ॥ १८ ॥

द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण वा मीमांसमानस्य मीमांसितस्य वा ॥ १९ ॥

यं स्वयमतिथिं द्विषन्भवति यो वाऽऽत्मानं द्वेष्टि यो वाऽऽत्मानं दोषेण मीमांसते आत्मनि स्तेयादिदोषं सम्भावयति । यो वा दोषेण मीमांसितः यत्र लौकिका दोषं सम्भावयन्ति, तस्याऽस्य सर्वस्यान्नं नाश्नीयात् ॥ १९ ॥

अनु०—शत्रुता रखने वाला उस व्यक्ति का अन्न न खावे जिससे शत्रुता हो, अथवा जो व्यक्ति अतिथि से द्वेष रखता हो उस व्यक्ति का अन्न अतिथि न खावे । किसी प्रकार का दोष लगाने वाले गृहस्थ का अथवा जिस गृहस्थ के विषय में किसी पाप या अपराध की आशंका हो उसका अन्न अतिथि न खावे ॥ १९ ॥

तत्र हेतुः—

पाप्मानं हि स तस्य भक्षयतीति विज्ञायते ॥ २० ॥

यः एवंविधस्याऽन्नमश्नाति, स तस्य पाप्मानमेव भक्षयतीति विज्ञायते २०

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने षष्ठी कण्डिका ॥ ६ ॥

अनु०—क्योंकि जो व्यक्ति इस प्रकार के व्यक्ति का अन्न खाता है वह उसके पापों का ही भक्षण करता है, ऐसा (वेद में) कहा गया है ॥ २० ॥

स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः ॥ १ ॥

स एषोऽभिहितो मनुष्ययज्ञः प्राजापत्यः प्रजापतिना दृष्टः, तद्दैवत्यो वा । कुटुम्बिनो नित्यप्रततो, यज्ञः नाऽग्निष्टोमादिवत् कादाचित्कः ॥ १ ॥

अनु०—यह अतिथि सत्कार गृहस्थों के लिए नित्य किया जाने वाला प्राजापत्य यज्ञ होता है ॥ १ ॥

---

१. पा० सू० ८, ९७ २. प्लुतप्रयोगः इति च. पु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्याऽग्नीन् सम्पादयति—

योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः ॥ २ ॥

योऽतिथीनां जाठरोऽग्निः स आहवनीयः, तत्र हि हूयते । यः कुटुम्बे गृहे अग्निरौपासनः स गार्हपत्यः, नित्यधार्यत्वात् । यस्मिन् पच्यते[1] लौकिकाग्नौ सोऽन्वाहार्यपचनः दक्षिणाग्निः, तत्र [2]ह्यन्वाहार्यं पच्यते ॥ २ ॥

अनु०—अतिथियों के उदर में जो अग्नि होती है वही आहवनीय अग्नि है, जो पवित्र गृह्य अग्नि घर में होती है वह गार्हपत्य अग्नि है, जिस अग्नि पर भोजन पकाया जाता है वह दक्षिणाग्नि है ॥ २ ॥

ऊर्जं पुष्टिं प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥३॥

योऽतिथेः पूर्वमश्नाति स गृहाणां कुलस्य सम्बन्धि ऊर्गादिकमश्नाति भक्षयति विनाशयति । ऊर्गन्नम् । इष्टमग्निहोत्रादि । पूर्तं स्मार्तं कर्म[3] कूपखातादि । अन्ये प्रसिद्धाः ॥ ३ ॥

अनु०—जो अपने अतिथि से पहले भोजन करता है वह अपने कुल के अन्न को, समृद्धि को, सन्तान को, पशुओं और उन पुण्य फलों का ही भक्षण करता है ॥ ३ ॥

पय उपसेचनमन्नमग्निष्टोमसम्मितं सर्पिषोक्थ्यसम्मितं, मधुनाऽतिरात्रसम्मितं, मांसेन द्वादशाहसम्मित, मुदकेन प्रजावृद्धिरायुषश्च ॥

पय उपसेचनं यस्य तदन्नम[4]ग्निष्टोमतुल्यम् । सर्पिषा, उपसिक्तमिति प्रकरणाद्गम्यते तदुक्थ्यतुल्यम् । मधुनोपसिक्तमन्नमतिरात्रतुल्यम् । मांसेन सह दत्तमन्नं द्वादशाहतुल्यम् । उदकेन सह दत्तेन प्रजावृद्धिर्भवति । आयुषश्च । उपसमस्तमपि वृद्धिरिति सम्बध्यते ॥ ४ ॥

---

१. भ्राष्ट्राग्नौ इति क० च० पु

२. दर्शपूर्णमासेष्टावृत्विजां दक्षिणात्वेन यद्देयमन्नं तदन्वाहार्यपचनम्

३. तडागादि इति ङ० पु० तडागखननादि इति घ० पु

अग्निहोत्रं तपस्सत्यं वेदानां चानुपालनम् ।
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ॥
वापीकूपडागादि देवतायतनानि च ।
अन्नप्रदानमारामः पूर्तमित्यभिधीयते ॥

४. अग्निष्टोमोक्थ्यातिरात्राः ज्योतिष्टोमस्य संस्थाविशेषाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—(अतिथि को दिया गया) दूध से युक्त अन्न अग्निष्टोम का फल उत्पन्न करता है, घृतमिश्रित भोजन उक्थ्य का फल प्रदान करता है मधु से युक्त भोजन अतिरात्र यज्ञ का फल देता है, मांस से युक्त भोजन द्वादशाह यज्ञ का फल देता है, अन्न और जल अनेक सन्तानों तथा दीर्घ जीवन को प्रदान करता है ॥ ४ ॥

प्रिया अप्रियाश्चाऽतिथियः स्वर्गं लोकं गमयन्तीति विज्ञायते ॥ ५ ॥

प्रियाः प्रसिद्धाः अप्रिया उदासीनाः, द्विषतो निषिद्धत्वात् ॥ ५ ॥

अनु०—अतिथि चाहे प्रिय हों या अप्रिय हों सत्कार करने पर स्वर्ग को ही पहुँचाते हैं ॥ ५ ॥

स यत्प्रातर्मध्यन्दिने सायमिति ददाति सवनान्येव तानि भवन्ति ॥६॥

त्रिषु कालेषु दीयमानान्यन्नानि अस्य यज्ञस्य [1]प्रातस्सवनादीनि त्रीणि भवन्ति । तस्मात्सर्वेषु कालेषु दातव्यमिति ॥ ६ ॥

अनु०—वह जो प्रातः, मध्याह्न तथा सायंकाल भोजन देता है वह (इस प्राजापत्य यज्ञ का) तीन सवन होता है ॥ ६ ॥

यदनुतिष्ठत्युदवस्यत्येव तत् ॥ ७ ॥

यत् गन्तुमुत्तिष्ठन्तमतिथिमनूत्तिष्ठति तदुदवस्यत्येव[2] उदवसानीया साऽस्य यज्ञस्येति । प्रायेणोच्छब्दं न पठन्ति । केवलमनुशब्दमेव पठन्ति । तत्राप्यर्थः स एव ॥ ७ ॥

अनु०—जो जाने के लिए उठे हुए अतिथि के पीछे उठता है वह उदवसनीया इष्टि का प्रतीक है ॥ ७ ॥

यत्सान्त्वयति सा दक्षिणा प्रशंसा ॥ ८ ॥

यत् सान्त्वयति प्रशंसति सा प्रशंसा दक्षिणा ॥ ८ ॥

अनु०—अतिथि से मधुर भाषण करना ही (यज्ञ की) दक्षिणा है ॥ ८ ॥

यत्संसाधयति ते [3]विष्णुक्रमाः ॥ ९ ॥

संसाधनमनुव्रजनम् ॥ ९ ॥

अनु०—जब वह प्रस्थान करते हुए अतिथि के पीछे चलता है तब उसके पग विष्णुक्रम ही होते हैं ॥ ९ ॥

यदुपावर्तते [4]सोऽवभृथः ॥ १० ॥

---

१. सवनपदार्थः १. २५. १४. (पृ० १४७) सूत्रे टिप्पण्यां विवृतः

२. उदवसानीया नाम यज्ञसमाप्तौ क्रियमाणेष्टिः । उदवसाय क्रियते इत्युदवसानीया

३. दर्शपूर्णमासयोर्यजमानकर्तव्यतया विहिताः (आप० श्रौ० ४. १४, ६.) पदप्रक्षेपाः

४. 'वारुणेनैककपालेनावभृथमवयन्ति' इति विहितस्सोमयागस्यान्ते क्रियमाणस्तदङ्गभूत इष्टि विशेषोऽवभृथः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपावर्तनं अनुव्रज्य प्रत्यावर्तनम् ॥ १० ॥

अनु०—जब वह अतिथि को पहुँचाकर लौटता है तब वह यज्ञ के अन्त में किया जाने वाला अवभृथ स्नान ही होता है ॥१०॥

इति ब्राह्मणम् ॥ ११ ॥

इति ब्राह्मणमित्यस्य सर्वेण सम्बन्धः ॥ ११ ॥

अनु० -- इस प्रकार एक ब्राह्मण अतिथि का सत्कार करे (क्षत्रिय, क्षत्रिय अतिथि का तथा वैश्य, वैश्य अतिथि का सत्कार करे) ॥ ११ ॥

राजानं चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामात्मनः कारयेत् ॥१२॥

[1]राजा अभिषिक्तः क्षत्रियः । सोऽतिथयेऽभ्यागताय आत्मनोऽपि सकाशात् श्रेयसीं पूजां कारयेत् पुरोहितेन ॥ १२ ॥

अनु०—यदि कोई अतिथि राजा के समीप आवे तो राजा अपनी अपेक्षा उसके लिए अधिक पूजा करवाये ॥ १२ ॥

आहिताग्नि चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्—व्रात्य क्वाऽवात्सीरिति, व्रात्योदकमिति, व्रात्य तर्पयंस्त्विति ॥ १३ ॥

यद्याहिताग्निमुद्दिश्यातिथिरागच्छेत्, तत एनमतिथिं स्वयमेवाभिमुख उपसर्पेत् अत्र स्वयमिति वचनादनाहिताग्निरन्येन शिष्यादिना कारयन्नपि न दुष्यति । तमभ्युदेत्य ब्रूयात्—व्रात्य क्वावात्सीरिति कुशलप्रश्नः । व्रते साधुर्व्रत्यः स एव व्रात्य इति पूजनाभिधानम् । क्व पूर्वस्यां रात्र्यामुषितवानसीति । 'व्रात्योदक' मित्युदकदानम् । 'व्रात्य तर्पयंस्त्वि'ति गोरसादिभिस्तर्पणम् । अनुस्वारसकारौ छान्दसौ । क्रियाभेदात्प्रतिमन्त्रमितिशब्दः । एतत्सर्वेषु कालेषु कर्तव्यम् ॥ १३ ॥

अनु०—यदि किसी अग्निहोत्री के यहाँ अतिथि आवे तो वह स्वयं उसकी अगवानी करे, और कहे । हे व्रात्य (अपने व्रत का पालन करने वाले), (पिछली रात्रि) तुमने कहाँ निवास किया ? फिर 'हे व्रात्य, यह उदक है, व्रात्य, तृप्त होइए' ऐसा कहकर जल, दूध, रस आदि प्रदान करे ॥ १३ ॥

पुराऽग्निहोत्रस्य होमादुपांशु जपेत्—व्रात्य यथा ते मनस्तथाऽस्त्विति, व्रात्य यथा ते वशस्तथाऽस्त्विति, व्रात्य यथा ते प्रियं तथाऽस्त्विति, व्रात्य यथा ते निकामस्तथाऽस्त्विति ॥ १४ ॥

स यदि होमकालेऽप्यासीत, तदा पुरा होमादपरेणाग्निं दर्भेषु सादयित्वा

---

१. राजेत्येतानभिषिक्तानाचक्षते इत्यैतरेयब्राह्मणम् । ऐ० ब्रा० ८. १४. ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रात्य तथा ते मन' इत्यादिमन्त्राननुपांशु जपेत् ब्रूयात् । तत्र प्रतिमन्त्रमितिशब्द-प्रयोगादर्थभेदाच्चतुर्णां विकल्पः । समुच्चय इत्यन्ये । अत्र चाऽध्वर्युर्युजमानो वा यो होता स जयेत् । ततो जुहुयात् ॥ १४ ॥

अनु०—(यदि अतिथि अग्निहोत्र होम के समय भी उपस्थित हो तो) तो अग्निहोत्र होम करने से पहले उसे अग्नि के उत्तर में बैठाकर इस प्रकार जप करे—व्रात्य, वैसा ही हो जैसा तुम्हारा मन चाहता है, हे व्रात्य, वैसा ही हो जैसी तुम्हारी इच्छा है, हे व्रात्य, वैसा ही हो, जैसा तुम्हारे प्रिय है, हे व्रात्य, यह पूर्णतः तुम्हारी इच्छा के अनुरूप होवे ॥ १४ ॥

यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्—व्रात्याऽतिसृज होष्यामीत्यतिसृष्टेन होतव्यमनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाह ॥ १५ ॥

उद्धृतेष्विति बहुवचनं सभ्यावसथ्यापक्षेम् । यस्य तु त्रयोऽग्नयः, तस्यापि । अहुतेष्वित्यनेन सामानाधिकरण्यात् होमोऽपि त्रिष्वपि भवति । तेनाऽऽहवनीयहोमानन्तरमतिथावागतेऽपि त्रिषु होमो न कृत इति वक्ष्यमाणो विधिर्भवत्येव कः पुनरसौ ? स्वयमेनमभ्युदेत्य ब्रूयात् । व्रात्याऽतिसृज, अनुजानीहि होष्यामीति । ततो जुहुधीत्यतिसृजेत् । अति सृष्टेन होतव्यम् । यदि पुनरनतिसृष्टोऽननुज्ञातो जुहुयात् , तस्य दोषमाथर्वणिकानां ब्राह्मणवाक्यमाह । [2]तदत्र न पठितं तत्र प्रत्येतव्यम् । अत्र पक्षे स्वयं होमो नियतः ॥ १५ ॥

अनु०—यदि अतिथि उस समय आते जब अग्नियाँ रख तो दी गई हो किन्तु उनमें हवन न किया गया हो, तो अग्निहोत्री स्वयं अतिथि की अगवानी करे और कहे, व्रात्य, मुझे आज्ञा दीजिए, मैं हवन करना चाहता हूं, तब अतिथि की आज्ञा प्राप्त कर हवन करे । यदि वह बिना आज्ञा लिए हवन करता है तो दोष होता है ऐसा एक ब्राह्मण ग्रन्थ का वचन है ॥ १५ ॥

एकरात्रं चेदतिथीन्वासयेत्पार्थिवाँल्लोकानभिजयति द्वितीययाऽऽन्तरिक्ष्यांस्तृतीयया दिव्यांश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमिताँल्लोकानभिजयतीति विज्ञायते ॥ १६ ॥

य एकां[3]रात्रिमतिथीन् गृहे वासयति, स पृथिव्यां भवान् लोकानभिजयति । द्वितीयया रात्र्या आन्तरिक्ष्यान् । तृतीयया दिव्यान् । चतुर्थ्या परावतः सुखस्य

---

१. अग्निहोत्रहवनकर्ता होता
२. नास्तीदं वाक्यं घ० पुस्तके
३. एकरात्रं इति घ० पु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परा मात्रा येषु लोकेषु तानभिजयति। अपरिमिताभीरात्रिभिरपरिमितान् लोकानिति विज्ञायते ब्राह्मणं भवति॥ १६॥

अनु०—जो व्यक्ति अतिथि एक रात्रि अपने घर में ठहराता है वह पृथ्वी के सुखों को प्राप्त करता है, जो दूसरी रात्रि ठहराता है वह अन्तरिक्ष लोकों को जीतता है, तीसरी रात्रि ठहराने वाला स्वर्गीय लोकों को प्राप्त करता है और चौथी रात्रि ठहराने वाला असीम आनन्द का लोक जीत लेता है अनेक रात्रियों तक अतिथि को ठहराने से असीम सुखों की प्राप्ति होती ऐसा (वेद में) कहा गया है॥ १६॥

असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति॥ १७॥

विद्यादिभीरहितोऽसमुदेतः। स चेदतिथिरिति ब्रुवाण आगच्छेत्तदा तस्मै आसनादिकं श्रोत्रियायैव ददामीत्येवं मनसि कृत्वा दद्यात्। एवं ददतोऽस्य तद्दानं समृद्धं भवति श्रोत्रियायैव दत्तं भवति॥ १७॥

इति द्वितीयप्रश्ने सप्तमी कण्डिका॥ ७॥

अनु०—यदि कोई विद्याविहीन व्यक्ति अतिथि कहलाने का ढोंग करता हुआ आता है, तो श्रोत्रिय के लिए आसन, जल और अन्न देता हूँ ऐसा संकल्प करते हुए ये वस्तुएँ प्रदान करें। इस प्रकार उसके दान का पुण्य अधिक बढ़ जाता है, जैसे कि वे वस्तुएँ किसी वेद के विद्वान् श्रोत्रिय को ही अर्पित की गई हों॥ १७॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविचितायामुज्ज्वलायां द्वितीयप्रश्ने तृतीयः पटलः॥ ३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चतुर्थः पटलः

येन कृतावसथः स्यादतिथिर्न तं प्रत्युत्तिष्ठेत्प्रत्यवरोहेद्वा पुरस्ताच्चेदभिवादितः ॥ १ ॥

येन गृहस्थेनाऽतिथिः कृतावसथःस्यात् [1]कृतावासः दत्तावासः स्यात्। द्वितीययान्तरिक्ष्यानित्यादिवचनात् द्वितोयादिष्वहस्सु तं प्रति न प्रत्युत्तिष्ठेत्। नाऽप्यासनात् प्रत्यवरोहेत्। स चेत्तस्मिन्नहनि पूर्वमेवाभिवादितः। अनभिवादिते तु अभिवादनार्थं प्रत्युत्तिष्ठेत्, प्रत्यवरोहेच्च ॥ १ ॥

अनु०—(जब अतिथि एक से अधिक दिन ठहरे तो) जिस गृहस्थ ने अतिथि को ठहराया हो उसने यदि प्रथम दिन अतिथि का अभिवादन कर लिया हो तो दूसरे दिन या उसके बाद के दिन उस अतिथि का अभिवादन करने के लिए अपने आसन से न तो उठे और न उतरे ॥ १ ॥

शेषभोज्यतिथीनां स्यात् ॥ २ ॥

'अतिथीनेवाग्रे भोजये'(२.३.११.) दित्येव सिद्धे वचनमिदं प्रमादाद्यन्न दत्तमतिथये, तन्न भुञ्जीतेत्येवमर्थम् ॥ २ ॥

अनु०–अतिथियों को भोजन कराने के बाद ही भोजन करे ॥ २ ॥

न रसान् गृहे भुञ्जीताऽनवशेषमतिथिभ्यः ॥ ३ ॥

आगामिभ्योऽतिथिभ्यो यथा न किञ्चित् गृहेऽवशिष्यते, तथा गव्यादयो रसा न भोज्याः। सद्यस्सम्पादयितुमशक्यत्वाद्रसानाम् ॥ ३ ॥

अनु०—घर में रखे हुए दूध आदि रसवाले पदार्थों को पूरी तरह न समाप्त कर डाले जिससे अतिथि के लिए कुछ शेष न रह जाय (अपितु अतिथि के आने की सम्भावना करके ऐसी वस्तुएँ घर में बचाकर रखना चाहिए ॥ ३ ॥

नाऽऽत्मार्थमभिरूपमन्नं पाचयेत् ॥ ४ ॥

आत्मानमुद्दिश्याऽभिरूपमन्नं स्वाद्वपूपादि न पाचयेत् ॥ ४ ॥

अनु०—केवल अपने खाने के लिए स्वादुयुक्त पकवान न बनवाये ॥ ४ ॥

गोमधुपर्कार्हो वेदाध्यायः ॥ ५ ॥

साङ्गस्य वेदस्याऽध्येता वेदाध्यायः। सोऽतिथिर्मधुपर्कमर्हति; गां च दक्षिणाम् ॥ ५ ॥

---

१. कृतवासः दत्तवासः इति क पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—अङ्गों सहित सम्पूर्ण वेद का अध्येता अतिथि गौ की दक्षिणा तथा मधुपर्क प्राप्त करने का अधिकारी होता है ॥५॥

आचार्य ऋत्विक्स्नातको राजा वा धर्मयुक्तः ॥ ६ ॥

अवेदाध्याया अप्याचार्यादयो गोमधुपर्कार्हाः । अत एव ज्ञायते—एकदेशाध्यायिनावप्यृत्विगाचार्यौ भवत इति । धर्मयुक्त इति राज्ञो विशेषणम् । वाशब्दःसमुच्चये ॥ ६ ॥

अनु०—इसी प्रकार आचार्य, ऋत्विक, स्नातक और धर्म का आचरण करने वाला राजा गो की दक्षिणा और मधुपर्क के अधिकारी होते हैं ॥ ६ ॥

आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ॥ ७ ॥

[1]एतत् गृह्ये व्याख्यातम् । गौरत्र दक्षिणाऽधिका विधीयते ॥ ७ ॥

अनु०—आचार्य, ऋत्विज, श्वशुर, राजा के लिए उनके एक वर्ष के अन्तर पर आने पर गौ तथा मधुपर्क अर्पित किया जाता है ॥ ७ ॥

कोऽसौ मधुपर्क इत्यत आह—

दधिमधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् ॥ ८ ॥

[2]गृह्योक्तस्याऽनुवादोऽयमुत्तरविवक्षया ॥ ८ ॥

अनु०—मधुपर्क मधुमिश्रित दधि का हो अथवा मधु से युक्त दूध का हो ॥८॥

अभाव उदकम् ॥ ९ ॥

दधिपयसोरलाभ उदकमपि देयम् । मधुसंसृष्टमित्येके । नेत्यन्ये, पूर्वत्र पुनर्मधुसंसृष्टग्रहणादिति ॥ ९ ॥

अनु०—इन वस्तुओं का अभाव होने पर जल का भी मधुपर्क दिया जा सकता है (कुछ आचार्यों के अनुसार जल भी मधु से युक्त होना चाहिए) ॥ ९ ॥

वेदाध्याय इत्यत्र विवक्षितं वेदमाह—

षडङ्गो वेदः ॥ १० ॥

षड्भिरङ्गैर्युक्तोऽत्र वेदो गृह्यत इति ॥ १० ॥

अनु०—वेद छः अङ्गों से युक्त है ॥ १० ॥

कानि तान्यङ्गानीत्यत आह—

छन्दःकल्पो व्याकरणं ज्योतिषं निरुक्तं शीक्षा च्छन्दोविचितिरिति॥११॥

---

१. आप० गृ० १३. १९

२. 'दधिमध्विति संसृज्य—त्रिवृतमेके घृतं च । पाङ्क्तमेके धानास्सक्तूंश्च" इति गृह्ये उक्तम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दो वेदः। तत्कल्पयति प्रतिशाखं शाखान्तराधीतेन न्यायप्राप्तेन चाऽङ्गकलापेनोपेतस्य कर्मणः प्रयोगकल्पनयोपस्कुरुत इति छन्दः-कल्पः कल्पसूत्राणि। व्याकरण अर्थविशेषमाश्रित्य पदमन्वाचक्षाणं पदपदार्थप्रतिपादनेन वेदस्योपकारकं विद्यास्थानम्। सूर्यादीनि ज्योतींष्यधिकृत्य प्रवृत्तं शास्त्रं ज्योतिषम्। आदिवृद्ध्यभावे यत्नः कार्यः। तदप्यध्ययनोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयदुपकारकम्। निरुक्तमपि व्याकरणस्यैव कात्स्न्यम्। शीक्षा वर्णानां स्थानप्रयत्नादिकमध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्रकारं शिक्षयतीति। पृषोदरादित्वाद्दीर्घः। गायत्र्यादीनि छन्दांसि यया विचीयन्ते विविच्य ज्ञायन्ते, सा छन्दोविचितिः। एतान्यङ्गानि अङ्गसंस्तवादङ्गत्वम्।

'मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे।
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते॥ इति॥

उपकारकत्वाच्च ॥ ११ ॥

अनु०—(वेद के छः अङ्ग हैं): कल्प, व्याकरण, ज्योतिष, निरुक्त शिक्षा, तथा छन्दोविचिति।

टि०—शिक्षा में वर्णों के स्थान, प्रयत्न, उच्चारण काल का विचार किया जाता है। छन्दोविचिति में गायत्री आदि छन्दों का विवेचन किया जाता है ॥११॥

उक्त उपकारः, अत्र चोदयति—

शब्दार्थारम्भणानां तु कर्मणां समाम्नायसमाप्तौ वेदशब्दस्तत्र सङ्ख्या विप्रतिषिद्धा ॥ १२ ॥

शब्दार्थतया यान्यारभ्यन्ते न प्रत्यक्षादिप्रमाणगोचरतया, तानि शब्दार्थारम्भणानि कर्माणि वैदिकान्यग्निहोत्रादीनि। तेषां समाम्नाय उपदेशः। तस्य समाप्तौ स यावता ग्रन्थजातेन समाप्तोऽनुष्ठानपर्यन्तो भवति, तत्र वेदशब्दो वर्तते। वेदयति धर्मं विदन्त्यनेनेति वा धर्ममिति। न च मन्त्रब्राह्मणमात्रेणाऽनुष्ठानपर्यन्त उपदेशो भवति। किं तु कल्पसूत्रैरपि सह। ततश्च तेषामपि वेदस्वरूप एवानुप्रवेशात् पञ्चैवाऽङ्गानि। तत्र षट्संख्या विप्रतिषिद्धेति ॥ १२ ॥

अनु०—यदि प्रत्यक्ष आदि प्रमाणों के द्वारा गोचर न होने वाले शब्द के अर्थ से गृहीत (अग्निहोत्र आदि) कर्मों का उपदेश जहाँ पूरा होता है उतने सम्पूर्ण ग्रन्थ समूह के लिए वेद शब्द का प्रयोग किया जाता है तब इस प्रकार (कल्पसूत्रों के वेद का ही अभिन्न अंश सिद्ध होने पर) वेद के अङ्गों की संख्या विप्रतिषिद्ध हो जायगी अर्थात् छः अङ्गों के स्थान पर केवल पाँच अंग ही होंगे ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिहरति—

अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः ॥ १३ ॥

अङ्गान्येव कल्पसूत्राणि न वेदस्वरूपाणि । पौरुषेयतया स्मरणात् । कतिपयान्येव हि तेषु ब्राह्मणवाक्यानि,भूयिष्ठानि । स्ववाक्यानि अङ्गानां च तेषां प्रधानवाचिभिश्शब्दैः छन्दो वेदो ब्राह्मणमित्यादिभिर्व्यपदेशो न न्याय्य इति न्यायविदां सिद्धान्तः । ताविमौ पूर्वपक्षसिद्धान्तौ [1]कल्पसूत्राधिकरणे स्पष्टं द्रष्टव्यौ । यत्तक्तं न मन्त्रब्राह्मणमात्रेण पूर्ण उपदेश इति । नैष स्थाणोरपराधो यदेनमन्धो न पश्यतीति, पुरुषापराधस्स भवति । इदं तु भवानाचष्टाम्—कल्पसूत्रकाराणामियं प्रयोगकल्पना कुतस्त्येति । न्यायोपबृंहिताभ्यां मन्त्रब्राह्मणाभ्यामिति वक्तव्यम् । नाऽन्या गतिः । एवं सति भवानपि यततां तादृशस्स्यामिति । ततो मन्त्रब्राह्मणाभ्यामेव पूर्णमवभोत्स्यत इति ॥ १३ ॥

अनु०—(इसका उत्तर यह है कि) कल्पसूत्र अङ्ग ही हैं वेदस्वरूप नहीं हैं और उनके लिए प्रमुख (वेद ब्राह्मण आदि) रचनाओं के नाम का व्यवहार नहीं होता, ऐसा मीमांसा के पण्डितों का सर्वसम्मत सिद्धान्त है ॥ १३ ॥

अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य ॥ १४ ॥

अतिथिमागतं केनचित्प्रकारेण निराकृत्य भोजने प्रवृत्तो यत्र गते यदवस्थाप्राप्ते भोजने स्मरेत्—धिङ्मया स निराकृत इति, तत्रैव भोजनाद्विरम्य तस्मिन्नहन्युपोष्य ॥ १४ ॥

अनु०—यदि भोजन करते समय उसे किसी अतिथि को विना सत्कार किये लौटा देने का स्मरण हो तो भोजन करना छोड़कर उपवास करे ॥ १४ ॥

इत्यापस्तम्बधर्मसूत्रे उज्वलोपेते द्वितीयप्रश्नेऽष्टमी कण्डिका ॥ ८ ॥

श्वो भूते यथामानसं तर्पयित्वा संसाधयेत् ॥ १ ॥

अपरेद्युस्तमन्विष्य यथामानसं यथेच्छं तर्पयित्वा संसाधयेत् गच्छन्तमनुव्रजेत् ॥ १ ॥

अनु०—दूसरे दिन उस अतिथि को ढूँढ कर इच्छानुसार उसे भोजन आदि से तृप्त करके उसके प्रस्थान करते समय उसके साथ जावे ॥ १ ॥

आ कुत इत्यत आह—

यानवन्तमा यानात् ॥ २ ॥

---

१. पू० मी० १. ३. ९. कल्पसूत्राणां बौधायनापस्तम्बादिप्रणीतानां यत्र साक्षाद्वेदत्वनिराकरणं क्रियते किन्तु वेदमूलत्वेनैव प्रामाण्यं स्थाप्यते । तत् कल्पसूत्राधिकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स चेदतिथिर्यानवान् भवति, तमा तस्याऽऽरोहणादनुव्रजेत् ॥ २ ॥

अनु०—यदि अतिथि के पास कोई यान हो तो जहाँ वह यान पर चढे उस स्थान तक पहुँचाने जाना चाहिए ॥ २ ॥

यावन्नाऽनुजानीयादितरः ॥ ३ ॥

इतरो यानरहितो यावन्नाऽनुजानीयात् गच्छेति, तं तावदनुव्रजेत् ॥ ३ ॥

अनु०—किसी दूसरे अतिथि के साथ उस समय तक चले जब तक वह अतिथि उसे वापस लौटने के लिए नहीं कहता ॥ ३ ॥

अप्रतीभायां सीम्नो निवर्तेत ॥ ४ ॥

यदि तस्याऽन्यपरतयाऽनुज्ञायां प्रतीभा बुद्धिर्न जायते, ततस्सीम्नि प्राप्तायां ततो निवर्तेत । प्रतेदीर्घश्छान्दस । 'संसाधये' दित्यादि सर्वातिथिसाधारणम् । न निराकृतमात्रविषयम् ॥ ४ ॥

अनु०—यदि अतिथि उसे लौटने के लिए कहने का ध्यान न रखें तो गाँव की सीमा तक पहुँचाकर लौटना चाहिए ॥ ४ ॥

सर्वान्वैश्वदेवे भागिनः कुर्वीता श्वचण्डालेभ्यः ॥ ५ ॥

वैश्वदेवान्ते भोजनार्थमुपस्थितान् सर्वानेव भागिनः कुर्वीताऽऽश्वचण्डालेभ्यः । अभिविधावाकारः । तेभ्योऽपि किञ्चिद्देयम् । तथा च मनुः—

"शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वयसां च क्रिमीणां च शनकैर्निर्वपेद्भुवि ॥ इति ॥ ५ ॥

अनु०—वैश्वदेव कर्म की समाप्ति पर जो भी अन्न की याचना करते हुए आवें उन्हें कुछ अंश प्रदान करे, कुत्तों और चाण्डालों के भी उपस्थित होने पर उन्हें भोजन अंश प्रदान करे ॥ ५ ॥

नाऽनर्हद्भ्यो दद्यादित्येके ॥ ६ ॥

अनर्हद्भ्यश्चण्डालादिभ्यो न दद्यादित्येके मन्यते । तत्र दानेऽभ्युदयः । अदाने न प्रत्यवायः ॥ ६ ॥

अनु०—कुछ आचार्यों का मत है कि (चाण्डाल आदि जैसे) अयोग्य पात्रों को कुछ भी न देवे ॥ ६ ॥

उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ॥ ७ ॥

उपेतः कृतोपनयनोऽसमावृत्तः । स स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् न भुञ्जीत । एवं सति समावृत्तस्योच्छिष्टं भुञ्जानस्य न दोषः स्यात् । एवं तर्हि उपेत आन्तात् कृतदारोऽकृतदाराश्च स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् । इवमप्युपेतस्य

---

१. म० स्मृ० ३. ९२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य कस्यचिदपि यदुच्छिष्टं तद्भोजने न दोषः स्यात्। पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्-(१. ४. ११) इत्येतन्नियमार्थं भविष्यति-पितुरेव भ्रातुरेवेति। यद्येवं सूत्रमेवेदमनर्थकम्। तस्मादेव नियमादन्यत्राऽप्रसङ्गात्। इदं तर्हि प्रयोजनम्-यदा पिताऽनुपेतः पुत्रस्तु प्रायश्चित्तं कृत्वा कृतोपनयनः तदा तं प्रति पितुरनुपेतस्योच्छिष्टं प्रतिषिध्यते। एवं ज्येष्ठेऽपि द्रष्टव्यम्। एतदपि नास्ति प्रयोजनम्। उक्तं हि 'धर्मविप्रतिपत्तावभोज्य (१. ४. १२) मिति। 'तेषामभ्यागमनं भोजनं विवाहमिति च वर्जये' (१. १. ३३) दिति च। तथा स्त्रीणामित्येतत् किमर्थम्? मातुरुच्छिष्टप्रतिषेधार्थम्। कथं प्रसङ्गः? 'मातरि पितर्याचार्यवच्छुश्रूषे' (१. १४. ५.) ति वचनात्, 'यदुच्छिष्टं प्राश्नाति हविरुच्छिष्टमेव त' (१. ४. १, २) दित्याचार्योच्छिष्टस्य हविष्ट्वेन संस्तवाच्च।[1] एवमपि 'पितुर्ज्येष्ठस्ये' त्यत्र पितुर्ग्रहणादेव सिद्धम्। तस्मात् केषु चिज्जनपदेषु भार्यायाऽनुपेतेन च सह भोजनमाचरन्ति। तथा च बौधायनः—[2]'यानि दक्षिणतस्तानि व्याख्यास्यामः। तथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजन'मिति। तस्य दुराचारत्वमनेन प्रतिपाद्यते ॥ ७॥

अनु०—जिस व्यक्ति का उपनयन संस्कार हो चुका हो वह स्त्रियों का तथा अनुपेत (जिसका उपनयन न हुआ हो) व्यक्ति के जूठे भोजन को न खावे ॥ ७ ॥

सर्वाण्युदकपूर्वाणि दानानि ॥ ८ ॥

'सर्वाणी'ति वचनात् भिक्षाप्युदकपूर्वमेव देया ॥ ८ ॥

अनु०—सब प्रकार का दान देने से पहले जल गिराना चाहिए ॥ ८ ॥

यथाश्रुति विहारे ॥ ९ ॥

विहारे यज्ञकर्मणि यानि दानानि दक्षिणादीनि, तानि यथाश्रुत्येव। नोदक पूर्वाणि ॥ ९ ॥

अनु०—किन्तु यज्ञ कर्म के समय की दक्षिणा वेद में विहित नियम के अनुसार देनी चाहिए ॥ ९ ॥

ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः ॥ १० ॥

ये नित्या भाक्तिकाः भक्तार्हाः कर्मकरादयः तेषामुपरोधो यथा न भवति तथा वैश्वदेवान्ते अभ्यागतेभ्यः संविभागः कर्तव्यः ॥ १० ॥

अनु०—भोजन का विभाग इस प्रकार करना चाहिए कि जो (दास आदि) प्रतिदिन भोजन करते हों वे वञ्चित न रह जाँय ॥ १० ॥

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् ॥ ११ ॥

---

१. नैतदपि सारम्। 'पितुर्ज्येष्ठस्य च'इत्यत्रपितुर्ग्रहणादेव तस्या अप्रसक्तेः, इति० च० पु

२. बौ० ध० १. १. १८, १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दासो भूत्वा यः कर्म करोति स दासकर्मकरः तं आत्माद्युपरोधे नापि नोपरुन्ध्यात्। किं पुनरागतार्थं तं नोंपरुन्ध्यादिति[1] ॥ ११ ॥

अनु०—इच्छानुसार स्वयं, पत्नी को या पुत्र के भोजन में उपरोध हो जाने दे, किन्तु सेवा कर्म करने वाले दास के भोजन में विघ्न न होने देना चाहिए ॥ ११ ॥

तथा चऽऽत्मनोऽनुपरोधं कुर्याद्यथा कर्मसु समर्थस्स्यात् ॥ १२ ॥

कर्मसु अग्निहोत्रादिषु आर्जनेषु च यथा स्वयं समर्थो भवति तथाऽऽत्मानं नोपरुन्ध्यात् कुटुम्बी ॥ १२ ॥

अनु०—अपने भोजन में भी इतना उपरोध नहीं करना चाहिए कि धार्मिक कर्म के सम्पादन में भी असमर्थ हो जाय ॥ १२ ॥

अथाऽप्युदाहरन्ति—

[2]'अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशाऽरण्यवासिनः । द्वात्रिंशतं गृहस्थस्याऽपरिमितं ब्रह्मचारिणः ॥ आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नता'मिति ॥

अथैतस्मिन्नात्मानं नोपरुन्ध्यादिति विषये [3]श्लोकावुदाहरन्ति । मुनेः सन्यासिनः । भक्ष्या अष्टौ ग्रासाः आस्याविकारेण । अरण्यवासी वानप्रस्थः । तस्य षोडश । द्वात्रिंशत् ग्रासाः गृहस्थस्य । प्रथमार्थे द्वितीया । ब्रह्मचारिणस्तु विद्यार्थस्य नैष्ठिकस्य च ग्रासनियमो नास्ति । द्वितीयेन श्लोकेनाहिताग्निविषये 'कालयोर्भोजन' (२. १. २.) मित्ययमपि नियमौ नास्तीति[4] प्रतिपाद्यते । अनडुद्ग्रहणं दृष्टान्तार्थम् । ब्रह्मचारिग्रहणं दृढार्थम् । सिध्यन्ति स्वकार्यक्षमा भवन्ति१३

इत्यापस्तम्बधर्मसूत्रे नवमी कण्डिका ॥

अनु०—(इस विषय में ये दो श्लोक भी उद्धृत किये जाते हैं) मुनि आठ ग्रास भोजन करे, वानप्रस्थ सोलह ग्रास भोजन करे, गृहस्थ बत्तीस ग्रास खावे और ब्रह्मचारी इच्छानुसार भोजन करे । अग्निहोत्री, बैल और ब्रह्मचारी ये तीनों ही भोजन करने पर ही अपना कार्य कर पाते हैं, अतएव बिना भोजन किए ये अपना कार्य नहीं कर पाते हैं ॥ १३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां
द्वितीयप्रश्ने चतुर्थः पटलः ॥ ४ ॥

---

१. 'अतस्तं केवलं कर्मकरं नोपरुन्ध्यात् इत्यधिकः पाठः क० पुस्तके ।

२. एतच्छ्लोकद्वयानन्तरं गृहस्थो ब्रह्मचारी वा योऽनश्नन् सुतपश्चरेत् । प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः । इत्यधिकस्सूत्रभागो घ० पुस्तके

३. श्लोकान् इति घ० पु

४. प्रतिपादयितुम् इति पु०क०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ पञ्चमः पटलः

भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षाऽर्हतश्च नियमविलोपः ॥ १ ॥

भिक्षणं याचनम्। तत्राऽऽचार्यादयो निमित्तम्। बुभूर्षा भर्तुमिच्छा। अर्हतो विद्यादिमतोऽग्निहोत्रादिनियमे योग्यस्याऽभावेन लोपः ॥ १ ॥

अनु०—भिक्षा माँगने के विहित निमित्त हैं। आचार्य के लिए दक्षिणा, विवाह, यज्ञ, माता तथा पिता के भरण-पोषण की इच्छा, तथा विद्या आदि से सम्पन्न योग्य व्यक्ति के नियम का अर्थ के अभाव में लोप होने की संभावना ॥ १ ॥

तत्र गुणान् समीक्ष्य यथाशक्ति देयम् ॥ २ ॥

तत्रैवंभूते भिक्षणे याचतः श्रुतवृत्तादिकान् गुणान् समीक्ष्य शक्त्यनुरूपमवश्यं देयम्। अदाने [1]प्रत्यवेयात्। गौतमस्तु निमित्तान्तरमप्याह—[2]'गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनध्वंसयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदि। भिक्षमाणेषु कृतान्नमितरेष्वि'ति। [3]वैश्वजितो विश्वजिद्यागस्य कर्ता सर्वस्वदक्षिणः ॥ २ ॥

अनु०—याचक के गुणों के ऊपर भली प्रकार विचार करके अपनी शक्ति के अनुसार भिक्षा देनी चाहिए ॥ २ ॥

[4]इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम् ॥ ३ ॥

इन्द्रियद्वारा आत्मनः प्रीतिरिन्द्रियप्रीतिः। तामर्थयमानो यो भिक्षते स्रक्चन्दनादि तन्मूल्लं वा। तद्भिक्षणं नियमेन दानस्य निमित्तं न भवति ॥ ३ ॥

अनु०—किन्तु अपनी इन्द्रियों को सुख के लिए भिक्षा माँगना अनुचित है ॥३॥

न तदाद्रियेत ॥ ४ ॥

तस्मात् न तदाद्रियेत्। अदानेऽपि न प्रत्ययवायः। विवाहोऽपि द्वितीयो न

---

१. प्रत्यवायात् इति० क० घ० पु   २. गौ० ५. २१, २२

३. विश्वजिताऽतिरात्रेण सर्वपृष्ठेन सर्वस्वदक्षिणेन यजेत' इत्यनेन विहितेन यागेनेष्ट्वा तत्र दत्तसर्वस्वदक्षिण इत्यर्थः

४. इदमुत्तरं च सूत्रमेकीकृतं च० पु०। इन्द्रियमनिमित्तम् ॥ ४ ॥ तस्मान्न तदाद्रियते ॥ ५ ॥ इति तच्छन्दघटितं भिन्नसूत्रतया च पठितं क० पुस्तके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हाथ जोड़कर दया की भीख मांगते हों अथवा जो युद्धक्षेत्र से डरकर भाग रहे हों, उनके बध का आर्यों ने निषेध किया है ॥ १२ ॥

शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् ॥ १३ ॥

यथाशास्त्रं गर्भाधानादिभिः संस्कारैः संस्कृताः शास्त्रैरधिगताः तेषामिन्द्रियदौर्बल्यात् अजितेन्द्रियतया विप्रतिपन्नानां स्वकर्मतश्च्युतानां निषिद्धेषु च प्रवृत्तानाम् । शास्ता शासिता आचार्यादिः । निर्वेषं प्रायश्चित्तमुपदिशेत् । यथाकर्म कर्मानुरूपम् । यथोक्त धर्मशास्त्रेषु ॥ १३ ॥

अनु०—शास्त्रों के अनुसार संस्कार से किन्तु इन्द्रियों की दुर्बलता के कारण अपने कर्म से भ्रष्ट हो जाने वाले व्यक्तियों के लिए आचार्य आदि उपदेशक उनके कर्म के अनुसार तथा शास्त्र के विधान के आधार पर प्रायश्चित्त का निर्देश करें ॥ १३ ॥

तस्य चेच्छास्त्रमतिप्रवर्तरन् राजानं गमयेत् ॥ १४ ॥

तस्य चेच्छासितुः शास्त्रं शासनं अतिप्रवर्तेरन् न तत्र तिष्ठेयुः राजानं गमयेत्—एवमसौ करोतीति ॥ १४ ॥

अनु०—यदि ये व्यक्ति उपदेश देने वाले आचार्य के वचनों का पालन न करें तो उन्हें राजा के समीप पहुँचावे ॥ १४ ॥

राजा पुरोहितं धर्मार्थकुशलम् ॥ १५ ॥

स राजा धर्मशास्त्रेष्वर्थशास्त्रेषु कुशलं च पुरोहितं गमयेत्-विनीयतामसाविति ॥ १५ ॥

अनु०—राजा उन्हें अपने पुरोहित के समीप भेजे, जो धर्मों का अर्थ समझने में दक्ष हो ॥ १५ ॥

स ब्राह्मणान्नियुञ्ज्यात् ॥ १६ ॥

स पुरोहितः ब्राह्मणाश्चेदतिक्रमणकारिणः प्रापिताः तान्नियुञ्ज्यात् अनुरूपेषु प्रायश्चित्तेषु नियुञ्जीत ॥ १६ ॥

अनु०—यदि नियम का अतिक्रमण करने वाले ब्राह्मण हों, तो पुरोहित उनके लिए प्रायश्चित्त का निर्देश करे ॥ १६ ॥

अथ यदि ते तत्रापि न तिष्ठेयुः, तदा किं कर्तव्यमित्यत आह—

बलविशेषेण[1] वधदास्यवर्जं नियमैरुपशोषयेत् ॥ १७ ॥

१. अत्र विषये मानवौ ८ ३८०, ३८१ श्लोकौ द्रष्टव्यौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तान्नियमैरुपवासादिभिरुपशोषयेत् । बलविशेषेण बलानुरूपम् । वधदास्यवर्जं वधस्ताडनादि, वधं दास्यं च वर्जयित्वा सर्वमन्यत् बन्धनादिकं बलानुरूपं कारयेत् यावत्ते मन्येरन् चरेम प्रायश्चित्तमिति ॥ १७ ॥

अनु०—फिर भी वे धर्म के मार्ग पर न आवें तो उनकी शक्ति के अनुसार उन्हें उपवास आदि नियमों से पीडित करे, किन्तु वध न करे और न दास का कर्म करावे ॥ १७ ॥

इत्यापस्तम्बधर्मसूत्र उज्ज्वलोपेते द्वितीयप्रश्ने दशमी कण्डिका ॥ १० ॥

एवं ब्राह्मणविषये उक्तम् । इतरेषामाह—

इतरेषां वर्णानामा प्राणविप्रयोगात् समवेक्ष्य तेषां कर्माणि राजा दण्डं प्रणयेत् ॥ १ ॥

इतरेषां ब्राह्मणव्यतिरिक्तानां वर्णानां राजा पुरोहितोक्तं दण्डं स्वयमेव प्रणयेत् तेषां कर्माणि समवेक्ष्य तदनुरूपमा प्राणविप्रयोगात् । अभिविधावाकारः ॥

अनु०—यदि अपराधी ब्राह्मण वर्ण के अतिरिक्त अन्य वर्ण का हो, तो राजा कर्म के अनुसार पुरोहित द्वारा बताया गया दण्ड स्वयं ही देवे और मृत्यु का दण्ड भी दे सकता है ॥ १ ॥

न च सन्देहे दण्डं कुर्यात् ॥ २ ॥

अपराधसन्देहे राजा दण्डं न कुर्यात् ॥ २ ॥

अनु०—किन्तु सन्देह होने पर राजा दण्ड न दे ॥ २ ॥

किन्तु—

सुविचितं विचित्या दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्यत ॥ ३ ॥

आ दैवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सुविचितं यथा भवति तथा विचित्य निरूप्य । राजा दण्डाय प्रतिपद्येत उपक्रमेत ॥ ३ ॥

अनु०—किन्तु साक्षियों के आधार पर, प्रश्न करके तथा शपथ दिलाकर राजा अपराध पर विचार कर दण्ड दे ॥ ३ ॥

एवं कुर्वतः फलमाह—

एवंवृत्तो राजोभौ लोकावभिजयति ॥ ४ ॥

एवंभूतं वृत्तं यस्य स एवंवृत्तः । अत्र मनुः—

"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति प्रेत्य[2] स्वर्गाच्च हीयते ॥' इति ॥ ४ ॥

---

१. म० स्मृ० ८. १२८ २. नरकं चैव गच्छति इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हाथ जोड़कर दया की भीख मांगते हों अथवा जो युद्धक्षेत्र से डरकर भाग रहे हों, उनके बध का आर्यों ने निषेध किया है ॥ १२ ॥

शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् ॥ १३ ॥

यथाशास्त्रं गर्भाधानादिभिः संस्कारैः संस्कृताः शास्त्रैरधिगताः तेषामिन्द्रियदौर्बल्यात् अजितेन्द्रियतया विप्रतिपन्नानां स्वकर्मतश्च्युतानां निषिद्धेषु च प्रवृत्तानाम् । शास्ता शासिता आचार्यादिः । निर्वेषं प्रायश्चित्तमुपदिशेत् । यथाकर्म कर्मानुरूपम् । यथोक्त धर्मशास्त्रेषु ॥ १३ ॥

अनु०—शास्त्रों के अनुसार संस्कार से किन्तु इन्द्रियों की दुर्बलता के कारण अपने कर्म से भ्रष्ट हो जाने वाले व्यक्तियों के लिए आचार्य आदि उपदेशक उनके कर्म के अनुसार तथा शास्त्र के विधान के आधार पर प्रायश्चित्त का निर्देश करें ॥ १३ ॥

तस्य चेच्छास्त्रमतिप्रवर्तरन् राजानं गमयेत् ॥ १४ ॥

तस्य चेच्छासितुः शास्त्रं शासनं अतिप्रवर्तेरन् न तत्र तिष्ठेयुः राजानं गमयेत्—एवमसौ करोतीति ॥ १४ ॥

अनु०—यदि ये व्यक्ति उपदेश देने वाले आचार्य के वचनों का पालन न करे तो उन्हें राजा के समीप पहुँचावे ॥ १४ ॥

राजा पुरोहितं धर्मार्थकुशलम् ॥ १५ ॥

स राजा धर्मशास्त्रेष्वर्थशास्त्रेषु कुशलं च पुरोहितं गमयेत्—विनीयतामसाविति ॥ १५ ॥

अनु०—राजा उन्हें अपने पुरोहित के समीप भेजे, जो धर्मों का अर्थ समझने में दक्ष हो ॥ १५ ॥

स ब्राह्मणान्नियुञ्ज्यात् ॥ १६ ॥

स पुरोहितः ब्राह्मणाश्चेदतिक्रमणकारिणः प्रापिताः तान्नियुञ्ज्यात् अनुरूपेषु प्रायश्चित्तेषु नियुञ्जीत ॥ १६ ॥

अनु०—यदि नियम का अतिक्रमण करने वाले ब्राह्मण हों, तो पुरोहित उनके लिए प्रायश्चित्त का निर्देश करे ॥ १६ ॥

अथ यदि ते तत्रापि न तिष्ठेयुः, तदा किं कर्तव्यमित्यत आह—

बलविशेषेण[1] वधदास्यवर्जं नियमैरुपशोषयेत् ॥ १७ ॥

---

१. अत्र विषये मानवौ ८ ३८०, ३८१ श्लोकौ द्रष्टव्यौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततस्तान्नियमैरुपवासादिभिरुपशोषयेत् । बलविशेषेण बलानुरूपम् । वधदास्यवर्जं वधस्ताडनादि, वधं दास्यं च वर्जयित्वा सर्वमन्यत् बन्धनादिकं बलानुरूपं कारयेत् यावत्ते मन्येरन् चरेम प्रायश्चित्तमिति ॥ १७ ॥

अनु०—फिर भी वे धर्म के मार्ग पर न आवें तो उनकी शक्ति के अनुसार उन्हें उपवास आदि नियमों से पीडित करे, किन्तु वध न करे और न दास का कर्म करावे ॥ १७ ॥

इत्यापस्तम्बधर्मसूत्र उज्ज्वलोपेते द्वितीयप्रश्ने दशमी कण्डिका ॥ १० ॥

एवं ब्राह्मणविषये उक्तम् । इतरेषामाह—

इतरेषां वर्णानामा प्राणविप्रयोगात् समवेक्ष्य तेषां कर्माणि राजा दण्डं प्रणयेत् ॥ १ ॥

इतरेषां ब्राह्मणव्यतिरिक्तानां वर्णानां राजा पुरोहितोक्तं दण्डं स्वयमेव प्रणयेत् तेषां कर्माणि समवेक्ष्य तदनुरूपमा प्राणविप्रयोगात् । अभिविधावाकारः ॥

अनु०—यदि अपराधी ब्राह्मण वर्ण के अतिरिक्त अन्य वर्ण का हो, तो राजा कर्म के अनुसार पुरोहित द्वारा बताया गया दण्ड स्वयं ही देवे और मृत्यु का दण्ड भी दे सकता है ॥ १ ॥

न च सन्देहे दण्डं कुर्यात् ॥ २ ॥

अपराधसन्देहे राजा दण्डं न कुर्यात् ॥ २ ॥

अनु०—किन्तु सन्देह होने पर राजा दण्ड न दे ॥ २ ॥

किन्तु—

सुविचितं विचित्या दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्यत ॥ ३ ॥

आ दैवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सुविचितं यथा भवति तथा विचित्य निरूप्य । राजा दण्डाय प्रतिपद्येत उपक्रमेत ॥ ३ ॥

अनु०—किन्तु साक्षियों के आधार पर, प्रश्न करके तथा शपथ दिलाकर राजा अपराध पर विचार कर दण्ड दे ॥ ३ ॥

एवं कुर्वतः फलमाह—

एवंवृत्तो राजोभौ लोकावभिजयति ॥ ४ ॥

एवंभूतं वृत्तं यस्य स एवंवृत्तः । अत्र मनुः—

"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति प्रेत्य[2] स्वर्गाच्च हीयते ॥' इति ॥ ४ ॥

---

१. म० स्मृ० ८. १२८   २. नरकं चैव गच्छति इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०— इस प्रकार कर्तव्य करने वाला राजा दोनों लोकों को प्राप्त करता है ॥४॥

गच्छतां प्रतिगच्छतां च पथि समवाये केन कस्मै पन्था देय इत्यत आह–

राज्ञः पन्था ब्राह्मणेनाऽसमेत्य ॥ ५ ॥

राजा अभिषिक्तः[1]। स यदि ब्राह्मणेन समेतो न भवति, तदा तस्य पन्था दातव्यः। क्षत्रियैरप्यनभिषिक्तैः एतदर्थमेव चेदं वचनम्। अन्यत्र 'वर्णज्यायसां चे' (२.११.८) ति वक्ष्यमाणेनैव सिद्धम् ॥ ५ ॥

अनु०—यदि ब्राह्मण मार्ग पर न आता हो तो वह मार्ग राजा का होता है (अर्थात् राजा केवल ब्राह्मण के लिए मार्ग छोड़ता है, दूसरे सभी राजा के उसी मार्ग पर आने पर उस मार्ग के किनारे हट जाते हैं ॥ ५ ॥

समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ ६ ॥

आपदि शिष्यभूतब्राह्मणविषयमिदम्। शिष्यभूतेनाऽपि ब्राह्मणेन समेत्य तस्यैव राज्ञा पन्था देय इति ॥ ६ ॥

अनु०—किन्तु यदि मार्ग में ब्राह्मण आता हो तो वह मार्ग ब्राह्मण का ही होता है ॥ ६ ॥

[1]यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः[2] ॥ ७ ॥

यानं शकटादि। भाराभिनिहितो भाराक्रान्तः। आतुरो व्याधितः। स्त्रियाः यस्याः कस्याश्चिदपि। एतेभ्यस्सर्वैरेव वर्णैः पन्था दातव्यः। इतिशब्दात् स्थविरबालकृशादिभ्यश्च ॥ ७ ॥

अनु०— बोझवाले यान, रोगी, स्त्री के लिए (तथा वृद्ध, दुर्बल, बाल के लिए) सभी वर्णों के लोग रास्ता छोड दें ॥ ७ ॥

वर्णज्यायसां चेतरैर्वर्णैः ॥८ ॥

वर्णेनोत्कृष्टा वर्णज्यायांसः। तेषां चेतरैरपकृष्टैर्वर्णैर्ब्राह्मणैश्च दातव्यः ॥८॥

अनु०—दूसरे वर्णों के लोग अपने से श्रेष्ठ वर्ण के व्यक्ति के लिए मार्ग छोड़े ॥८॥

अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः ॥ ९ ॥

अशिष्टो मूर्खः। अन्ये प्रसिद्धाः। एतेषां सर्वैरेवंजातीयैरुत्कृष्टैरपकृष्टैर्वर्णैर्ब्राह्मणैश्च। आत्मस्वस्त्ययनार्थेन स्वस्त्ययनमात्मत्राणम्। तेन प्रयोजनेन तदर्थम्,

---

१. रुद्धस्य भारा इति घ० पु०

२. अन्धस्य पन्था बधिरस्य पन्थाः स्त्रियः पन्था भारवहस्य पन्थाः। राज्ञः पन्था ब्राह्मणेनाऽसमेत्य समेत्य तु ब्राह्मणस्यैव पन्थाः॥ इति महाभारते वनपर्वणि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न त्वदृष्टार्थमिति। अत्र कौटिल्येन देयस्य पथः प्रमाणमुक्तम्–''पञ्चारत्नी रथपथश्चत्वारो हस्तिपथो द्वौ क्षुद्रपशुमनुष्याणा'मिति ॥ ९ ॥

अनु०—मूर्ख, पतित, शराबी, पागल के लिए अपने ही कुशल के हित सभी व्यक्ति मार्ग छोड़ दें ॥ ९ ॥

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ ॥ १० ॥

धर्मचर्यया स्वधर्मानुष्ठानेन जघन्यो वर्णः शूद्रादिः पूर्वं पूर्वं वर्णमापद्यते वैश्यादिकं प्राप्नोति। जातिपरिवृत्तौ जन्मनः परिवर्तने। शूद्रो वैश्यो जायते। तत्रापि स्वधर्मनिष्ठः क्षत्रियो जायते। तत्रापि स्वधर्मपरो ब्राह्मण इति। एवं क्षत्रियवैश्ययोरपि द्रष्टव्यम् ॥ १० ॥

अनु०—अपने धर्म का सतत पालन करने पर निम्न वर्ण के व्यक्ति (शूद्र आदि) उत्तरोत्तर अगले जन्मों में अपने वर्ण की अपेक्षा श्रेष्ठ वर्ण में जन्म प्राप्त करते हैं और इस प्रकार उनकी जाति का परिवर्तन होता है ॥१०॥

अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ । ११ ॥

पूर्वेण गम्। महापातकव्यतिरिक्ताधर्मानुष्ठानविषयमेतत्। महापातकेषु 'स्तेनोऽभिशस्त' (२ २.६) इत्यादिना नीचजातिप्राप्तेरुक्तत्वात् ॥ ११ ॥

अनु०—अधर्म का आचरण करने पर श्रेष्ठ वर्ण के व्यक्ति अगले जन्म में उत्तरोत्तर अपने से हीन वर्ण में उत्पन्न होते हैं और इस प्रकार उनकी जाति का परिवर्तन होता है ॥११॥

धर्मप्रजासम्पन्ने दारे नाऽन्यां कुर्वीत ॥ १२ ॥

श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु श्रद्धा शक्तिश्च धर्मसम्पत्तिः। प्रजासम्पत्तिः पुत्रवत्त्वम्। एवंभूते दारे सति नान्याम्। 'दारे' इति प्रकृते अन्यामिति स्त्रीलिङ्गनिर्देशादत्रार्थाद्भार्यामिति गम्यते। नान्यां भार्यां कुर्वीत नोऽद्वहेत् ॥ १२ ॥

अनु०—यदि पत्नी (श्रौत, गृह्य, स्मार्त) धर्मों में श्रद्धा रखने वाली तथा पुत्र उत्पन्न करने में सक्षम हो तो दूसरा विवाह नहीं करना चाहिए ॥ १२ ॥

अन्यतराभावे कार्या प्रागग्न्याधेयात् ॥१३॥

धर्मप्रजयोरन्यतरस्याऽभावे कार्या उद्वाह्या। तत्रापि प्रागग्न्याधेयात् नोर्ध्वमाधानात्। एतदर्थमेवेदं वचनम्। उभयसम्पत्तौ न कार्येत्युक्ते अन्यतराभावे

---

१. कौ० अ० २. ४-२२. 'पञ्चारत्नय' इति अर्थशास्त्रपुस्तकेषु मुद्रितेषु। परन्तु पञ्चारत्निः इत्येवाऽनुवादो ग्रन्थान्तरेष्वपि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्येत्यस्यांशस्य प्राप्तत्वात्। यदा चाऽन्यतराभावे कार्या तदा का शङ्का उभयाभावे कार्येति ॥ १३ ॥

अनु०— यदि पत्नी इन दोनों में किसी एक के सम्पादन में असमर्थ होवे, तो अग्निहोत्र की अग्नि प्रज्वलित करने से पहले ही वह दूसरी पत्नी ग्रहण करे ॥ १३ ॥

प्रागग्न्याधेयादित्यत्र हेतुः—

आधाने हि सती कर्मभिस्संबध्यते येषामेतदङ्गम् ॥ १४ ॥

हि यस्मात् आधाने सती विद्यमाना सहान्विता कर्मभिस्सम्बध्यते अधिक्रियते। कैः? येषामग्निहोत्रादीनामेत[1]दाधानमङ्गमुपकारकम्। तैः। अत्र 'दारे सती'ति वचनात् मृते तस्मिन्प्रागूर्ध्वं वाऽऽधानात् सत्यामपि पुत्रसम्पत्तौ धर्मसम्पत्त्यर्थं दारग्रहणं भवत्येव। तथा च मनुः—

[2]"भार्यायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि।
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥" इति।

याज्ञवल्क्योऽपि—
[3]'आहरेद्विधिवद्दारनग्नींश्चैवाऽविलम्बयन्।' इति।

न हि वाचनिकेऽर्थे युक्तयः क्रमन्ते। तेनैतन्न चोदनीयम्-यजमानः पूर्वमन्वारम्भणीयया संस्कृतो न तस्यायं संस्कारः पुनरापादयितुं शक्यः। या च भार्या आधानात्परमूढा सा च पूर्वमसंस्कृता, न तस्या दर्शपूर्णमासादिष्वधिकारः। स कथं तया तैर्यष्टुमर्हतीति। अन्वारम्भणीयाजन्यश्च संस्कारो यदि संयोगवदुभयनिष्ठः तदा भार्यानाशे नश्यतीति तस्य पुनस्संस्कारोऽपि नाऽनुपपन्नः। यानि च नाऽन्वारम्भणीयामपेक्ष्यन्ते स्मार्तानि गार्ह्याणि च तैरधिकारस्तस्याऽप्यविरुद्धः।

ननु च प्रागग्न्याधानात् कर्मभिस्सम्बध्यते गार्ह्यैस्स्मार्तैश्च, तत्किमुच्यते आधाने हि सती कर्मभिस्सम्बध्यत इति? सत्यम्, अस्मादेव च हेतुनिर्देशादवसीयते-प्रागाधानात् सत्यामपि धर्मसम्पत्तौ प्रजासम्पत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नाऽतीव दोष इति। अथ यस्याहिताग्नेर्भार्या सत्येव कर्मण्यश्र-

---

१. आधानस्याऽनारभ्याधीतत्वात् क्रत्वङ्गत्वाभावत्वस्य पूर्वतन्त्रे तृतीयाध्याये स्थापितत्वात् अत्राङ्गपदमुपकारकपरतया विवृणोति। सम्भवति हि स्वनिष्पाद्याहवनीयाद्यग्निसमर्पणद्वाराऽऽधानमग्निहोत्रादिक्रतूनामुपकारकम् ॥

२. म० स्मृ० ५. १६८

३. या० स्मृ० १. ८९ ( ) एतत्कुण्डलान्तर्गतो भागो नास्ति घ० ङ० पुस्तकयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धाना अशक्ता वा भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम् ? । यद्येषा युक्तिः 'धर्मप्रजासम्पन्न' इति कर्मभिस्सम्बध्यत इति च, तदा कर्तव्यो विवाहः । (न च 'प्रागग्न्याधेया' दित्यस्य विरोधः । अन्यतराभावे कार्येत्यस्यैव स शेषः । न पुनरुभयाभावे कार्येत्यस्य । भारद्वाजसूत्रे तु यद्यप्यविशेषेणाऽहिताग्नेर्दारानुज्ञा प्रतीयते–"अथ यद्याहिताग्निः पुनर्दारक्रियां कुर्वीत यद्यग्नीन्नोत्सृजेत् लौकिकास्सम्पद्येरन् तस्य पुनरग्न्याधेयं कुर्वीतेत्याश्मरथ्यः, पुनराधनमित्यालेखनः, पुनरग्न्याधेयमित्यौडुलोमि,रिति । तथापि तस्याप्ययमेव विषयः) ॥ १४ ॥

अनु०––क्योंकि अग्निहोत्र की अग्नि के आधान के समय जो पत्नी रहती है वह उन धार्मिक कर्मों से संबद्ध हो जाती है जिनका अंग अग्निहोत्र अग्नि का आधान कर्म होता है ॥ १४ ॥

सगोत्राय दुहितरं न प्रयच्छेत् ॥ १५ ॥

कन्यागोत्रमेव गोत्रं यस्य(तस्मै कन्या न देया । यथा–हारीताय हारीतीं, वात्स्याय वात्सीमित्यादि ॥ १५ ॥

अनु०—अपने ही गोत्र वाले पुरुष से अपनी पुत्री का विवाह न करे ॥१५॥

मातुश्च योनिसम्बन्धेभ्यः ॥ १६ ॥

मातुर्योनिसम्बन्धाः कन्या मातुलादयः । चकारात् पितुरप्येवम् । तेभ्यः असगोत्रेभ्योऽपि न देया कन्या । अत्र मनुः—

[1]'असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां [2]दारकर्मण्यमैथुनी ॥

व्यासः—

[3]'स्नात्वा समुद्वहेत्कन्यां सवर्णां लक्षणान्विताम् ।
यवीयसीं भ्रातृमतीमसगोत्रां प्रयत्नतः ॥
मातुस्सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञाने नोद्वहेदविशङ्कितः ॥
मातुस्सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥ इति ।'

---

१. म ३ ५

२. दारकर्मण्यमैथुनी इत्येव मेधातिथ्यादिभिः पाठोऽङ्गीकृतः । कुल्लूकभट्टस्तु 'कर्मणि मैथुने' इति ।

३. एतदङ्काङ्कितानि वचनानि तेषु तेषु मुद्रितपुस्तकेषु नैवोपलभ्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौतमः—

[१]'असमानप्रवरैर्विवाहः। ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च। मातृबन्धुभ्यः पञ्चमात्, इति। कात्यायनः—'प्रवर एषामविवाह इत्येतेषु प्रत्यध्यायमाहत्य वचनं येषामेव प्रवरः तेषामेवाऽविवाह' इति। कारिका च भवति—

रातीयानामविवाह एषामिति येषां सूत्रकृदब्रवीत्।
तेषामेव विवाहः स्यात् नान्येषामिति धारणे'ति ॥

शङ्खः[२]—

'दारानाहरेत्सदृशानसमानार्षेयानसम्बन्धानासप्तमपञ्चमात्पितृमातृबन्धुभ्यः, इति।

वसिष्ठः—

[३]'गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षेयामस्पृष्टमैथुनामवरवयसीं भ्रातृमतीं सदृशीं भार्यां विन्देत। पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः' इति।

हारीतः[४]—

'श्वित्री कुष्ठ्युदरी यक्ष्मामयाव्यल्पायुरनार्षेयम ब्रह्म समानार्षेयमित्येतान्य पतितान्यपि कुलानि वर्जनीयानि भवन्ति। कुलानुरूपाः प्रजा भवन्तीति। आदितष्षडयज्ञियत्वादनार्षेयम्। अवेदत्वादब्रह्म। एककुलत्वात् समानार्षेयमिति। तस्मात् सप्त पितृतः परीक्ष्य पञ्च मातृतोऽनग्निकां श्रेष्ठां भ्रातृमतीं भार्यां विन्देत।'

पैठीनसिः—असमानार्षेयां कन्यां वरयेत्। पञ्चमातृतःपरिहरेत्सप्त पितृतः त्रीन्मातृतः पञ्च पितृतो वा'।

याज्ञवल्क्यः—

[५]'अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्।
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥'

---

१. गौ० घ० ४. २—५. ३. व० घ० ८. १. २
२ ४
५. या० स्मृ० १. ५२,५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णुः—

[1]'असगोत्रामसमानप्रवरां भर्यां विन्देत मातृतः पञ्चमात् पितृतस्सप्तमात्

नारदः—

[2]'आसप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः ।
अविवाह्यास्सगोत्रास्स्युस्समानप्रवरास्तथा ॥'

शातातपः—

[3]'परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्यास्समुत्सर्गमतिकृच्छ्रो विशोधनम् ॥
मातुलस्य सुतामूढवा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजश्चान्द्रायणं चरेत् ॥'

मनुः—

[4]'पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ।
ज्ञातित्वेनाऽनुपेयास्ताः पतति ह्युपयन्नधः ॥'

बौधायनः—

[5]'सगोत्रां चेदमत्योपयच्छेत मातृवदेनां बिभृयात्' । [6]'सगोत्रां गत्वा चान्द्रायणमुपदिशेत् ॥ व्रते परिनिष्ठिते ब्राह्मणीं न त्यजेत् मातृवद्भगिनीवद्गर्भो न दुष्यतीति काश्यप इति विज्ञायते । अथ सान्निपात अविवाहः तदाध्यायं वर्जयेत् । बोधायनस्य तत्प्रमाणं कर्तव्यम् । मानव्यो हि प्रजा 'इति विज्ञायते इति ।

गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥
एक एव ऋषिर्यावत् प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्यद् भृग्वङ्गिरोगणात् ॥' इति ।

---

१. मुद्रितश्लोकात्मकविष्णुस्मृतौ नेदं वचनमुपलभ्यते परन्तु ग्रन्थान्तरेष्वस्या विष्णुस्मृतित्वमुक्तम् । २. नार० स्मृ० व्यवहा० १२. श्लो० ७

३. मुद्रितशातातपस्मृतौ लघुशातातपस्मृतौ वृद्धशातातपस्मृतौ वा नेदं वचनमुपलभ्यते ।

४. म० स्मृ० ११. १७१, १७२ ५. बौ० ध० २. १. ३७

६. महाप्रवरे समाप्तिसूत्रकाण्डे । बौ० सू० (प्रवर) १३. १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुमन्तुः—

[1]'पितृपत्न्यस्सर्वा मातरस्तद्भ्रातरो मातुलाः तत्सुता मातुलसुतास्तस्मात्ता नोपयन्तव्या' इति ॥ १६ ॥

अनु०—अथवा ऐसे पुरुष को भी कन्या न प्रदान करे जो मातृ पक्ष से (छः पीढ़ी के भीतर) संबद्ध हो अथवा पिता के पक्ष से संबद्ध हो ॥ १६ ॥

टि०—हरदत्त ने अपनी व्याख्या में मनु, व्यास, गौतम, शङ्ख, वसिष्ठ, हारीत, पैठीनसि, याज्ञवल्क्य, विष्णु, नारद, शातातप, बौधायन और सुमन्तु के विचारों को उद्धृत किया है ॥१६॥

ब्राह्मे विवाहे बन्धुशीललक्षणसम्पन्नश्रुतारोग्याणि बुध्वा प्रजां सहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणाऽलंकृत्य ॥ १७ ॥

ब्रह्मणा दृष्टो ब्राह्मः । तस्मिन् विवाहे वरस्य बन्ध्यादीन् बुध्वा परीक्ष्य प्रजां दुहितरं सहत्वकर्मभ्यः सहकर्तव्यानि यानि कर्माणि तेभ्यः, तानि कर्तुम्, प्रति पादयेत् दद्यात् । शक्तिविषयेण विभक्तिप्रतिरूपोऽयं निपातो यथाशक्तीत्यस्यार्थे द्रष्टव्यः । यथाशक्त्यलंकृत्य दद्यादित्येष ब्राह्मो विवाहः । प्रजासहत्वकर्मभ्य' इति पाठे प्रजार्थं सहत्वकर्मार्थं चेति ॥ १७ ॥

अनु०—ब्राह्मविवाह में वर के कुल, आचरण, धर्म में आस्था, विद्या, स्वास्थ्य के विषय में जानकारी प्राप्त कर अपनी शक्ति के अनुसार कन्या को आभूषणों से अलकृत कर प्रजा की उत्पत्ति तथा एक साथ धर्म कर्म करने के प्रयोजन से कन्या प्रदान करे ॥ १७ ॥

आर्षे दुहितृमते मिथुनौ गावौ देयौ ॥ १८ ॥

ऋषिभिर्दृष्टे विवाहे मिथुनौ गावौ स्त्रीगवो पुंगवश्च दुहितृमते देयौ । एष आर्षः ॥ १८ ॥

अनु०—आर्षविवाह में वर कन्या के पिता को दो गौ (गाय तथा बैल) प्रदान करे १८॥

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् ॥ १९ ॥

देवैर्दृष्टे विवाहे यज्ञतन्त्रे वितते ऋत्विजे कर्म कुर्वते कन्यां दद्यात् । एष दैवो विवाहः ॥ १९ ॥

अनु०—दैव विवाह में पिता कन्या को किसी ऐसे ऋत्विज् को प्रदान करे जो श्रौतयज्ञ करा रहा हो ॥१९॥

---

१. सु० स्मृ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिथः कामात्सांवर्तेते स गान्धर्वः ॥ २० ॥

यत्र कन्यावरौ रहसि कामात् मिथः परस्परं रागात् सांवर्तेते मिथुनी भवतः स गान्धर्वो विवाहः । समो दीर्घः पूर्ववत् । अत्र संयोगोत्तरकालं विवाह-संस्कारः कर्तव्यः ॥ २० ॥

अनु०—जब कन्या और वर परस्पर प्रेम से संयोग करते हैं तो वह गान्धर्व विवाह होता है ॥२०॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकादशी कण्डिका ॥ ११ ॥

शक्तिविषयेण द्रव्याणि दत्त्वाऽऽवहेरन् स आसुरः ॥ १ ॥

यत्र विवाहे कन्यावते यथाशक्ति द्रव्याणि दत्त्वाऽऽवहेरन् कन्यां स आसुरः । [1]'वित्तेनाऽऽनतिस्त्रीमतामासुर' इति गौतमः । तेन कन्यायै गृहक्षेत्रा-भरणादिदानेन विवाहो नाऽऽसुरः ॥ १ ॥

अनु०—जब वर कन्या के लिए अपनी शक्ति के अनुसार धन प्रदान कर विवाह करे तो वह आसुर विवाह कहलाता है ॥ १ ॥

दुहितृमतः प्रोथयित्वाऽऽवहेरन् स राक्षसः ॥ २ ॥

दुहितृमतः कन्यावतः पित्रादीन् प्रोथयित्वा प्रमथ्य यत्राऽऽवहेरन् स राक्षसो विवाहः ।

[2]'हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत् स राक्षस' इत्याश्वलायनः । अत्रापि विवाहसंस्कारः कर्तव्यः । द्वौ चाऽपरौ विवाहौ शास्त्रान्तरेषूक्तौ । तत्राऽऽश्वलायनः—[3]'सह धर्मं चरतमिति प्राजापत्यः । सुप्तां प्रमत्तां वाऽपहरेत् स पैशाच' इति । ताविह पृथङ्नोक्तौ ब्राह्मराक्षसयोरन्तर्भावादिति ॥ २ ॥

अनु०—कन्या पक्ष वाले को परास्त करके यदि वर कन्या का अपहरण करे तो वह राक्षस विवाह कहलाता है ॥ २ ॥

तेषां त्रय आद्याः प्रशस्ताः पूर्वः पूर्वः श्रेयान् ॥ ३ ॥

तेषां विवाहानां मध्ये आद्यास्त्रयो ब्राह्मार्षदैवा प्रशस्ताः । तत्रापि पूर्वः पूर्वोऽतिशयेन प्रशस्त इति ॥ ३ ॥

अनु०—इनमें से आरम्भ के तीन प्रकार के विवाह (ब्राह्म, आर्ष, दैव) प्रशस्त होते हैं और उनमें भी पूर्ववर्ती अपने बाद वाले से अधिक प्रशस्त होता है । (दैव विवाह से आर्ष और आर्ष से भी ब्राह्म विवाह उत्तम होता है ।) ३ ॥

---

१. गौ ध ४ ११ २ आश्व ग १ ४ ३२ ३. आश्व० गृ० ४. २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथायुक्तो विवाहस्तथा युक्ता प्रजा भवति ॥ ४ ॥

प्रशस्ते विवाहे जाता प्रजाऽपि प्रशस्ता भवति। निन्दिते निन्दिता तत्र मनुः—

[1]ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसम्मताः॥
रूपसत्त्वगुणापेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः॥
उत्तरेषु च शिष्टेषु नृशंसानृतवादिनः।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मसमुज्झिताः॥

प्राजापत्येन सह ब्राह्माद्याश्चत्वारो ब्राह्मणस्य। गान्धर्वराक्षसो क्षत्रियस्य। आसुरं तु वैश्यशूद्रयोः। पैशाचो न कस्यचिदपि ॥ ४ ॥

अनु०—सन्तान के गुण भी विवाह के गुण के अनुसार ही होते हैं ॥ ४ ॥

पाणिसमूढं ब्राह्मणस्य नाऽप्रोक्षितमभितिष्ठेत् ॥ ५ ॥

ब्राह्मणस्य पाणिना समूढमुपलिप्तं सम्मृष्टं वा भूप्रदेशमप्रोक्षितं ऽनाभितिष्ठेत् नाधितिष्ठेत्। प्रोक्ष्यैवाऽधितिष्ठेदिति ॥ ५ ॥

अनु०—ब्राह्मण के द्वारा हाथ से छुए गये स्थान पर जल छिड़के बिना न बैठे ॥ ५ ।

अग्निं ब्राह्मणं चाऽन्तरेण नाऽतिक्रामेत् ॥६॥

अग्नेर्ब्राह्मणस्य च मध्ये न गच्छेत् ॥ ६ ॥

अनु०—अग्नि और ब्राह्मण के बीच न जावे ॥ ६ ॥

ब्राह्मणांश्च ॥ ७ ॥

अन्तरेण नाऽतिक्रामेदित्येव। ब्राह्मणानां च मध्ये न गच्छेत् ॥ ७ ॥

अनु०—ब्राह्मणों के बीच से होकर न जावे ॥ ७ ॥

अनुज्ञाप्य वाऽतिक्रामेत् ॥ ८ ॥

स्पष्टम् ॥ ८ ॥

अनु०—किन्तु उनकी अनुमति प्राप्त करके उनके बीच से होकर जाया जा सकता है ॥ ८ ॥

अग्निमपश्च न युगपद्धारयीत ॥ ९ ॥

अग्निमुदकञ्च न युगपद्धारयेत् ॥ ९ ॥

---

१. म० स्म० ३. ३९-४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—एक ही साथ अग्नि और जल लेकर न चले॥ ९ ॥

नानाग्नीनां च सन्निपातं वर्जयेत् ॥ १० ॥

पृथगवस्थितानामग्नीनामकेत्र समावपनं वर्जयेत् न कुर्यात। अग्नावग्निं न प्रक्षिपेदित्यन्ये[1] ॥ १० ॥

अनु०— भिन्न-भिन्न स्थानों पर जलती हुई अग्नियों को एक स्थान पर इकट्ठा न करे॥ १० ॥

प्रतिमुखमग्निमाह्रियमाणं नाऽप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् ॥ ११॥

यदाऽस्य गच्छतः प्रतिमुखमग्निराह्रियते तदा न तं प्रदक्षिणीकुर्यात् स चेद्भूमौ प्रतिष्ठितो न भवति। प्रतिष्ठिते त्वग्नौ दृष्टे प्रदक्षिणीकुर्यादिति ॥११॥

अनु०—जाते समय यदि आगे से अग्नि लाई जा रही हो, तो जब तक वह अग्नि भूमि पर न रख दी जाय तब तक उसको दाहिने हाथ की ओर करके न चले ॥ ११ ॥

पृष्ठतश्चाऽऽत्मनः पाणी न संश्लेषयेत् ॥ १२ ॥

स्वस्य पृष्ठभागे स्वपाणिद्वयं न संश्लेषयेन्न बध्नीयात् ॥ १२ ॥

अनु०—पीठ की ओर अपने दोनो हाथों को जोड़कर न रखे ॥ १२ ॥

स्वपन्नभिनिम्रुक्तो नाऽश्वान् वाग्यतो रात्रिमासीत श्वोभूत उदकमुपस्पृश्य वाचं विसृजेत् ॥ १५ ॥

[2]'सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च।
अंशुमानभिनिम्रुक्ताभ्युदितौ तौ यथाक्रमम् ॥'

स्वपन्नभिनिम्रुक्तो नाश्वानभुञ्जानस्तूष्णीं भूतो रात्रिं सर्वामासीत न शयीत। अथाऽपरेद्युः उदकमुपस्पृश्य प्रातः स्नात्वा वाचं विसृजेत्। अयमस्य निर्वेषः॥

अनु०—यदि सोते रहने पर सूर्य अस्त हो जाय तो बिना भोजन किए हुए, मौन रहकर बैठे हुए ही रात्रि व्यतीत करे। दूसरे दिन स्नान करे और फिर स्नान कर बोले ॥ १३ ॥

स्वपन्नभ्युदितो नाश्वान्वाग्यतोऽहस्तिष्ठेत् ॥ १४ ।

पूर्वेण गतम्। 'उदकमुपस्पृश्य वाचं विसृजेदिति चात्राऽपेक्ष्यते। तत्राऽस्तमिते स्नानप्रतिषेधात् सायमेव स्नात्वा वाचं विसृज्य सन्ध्यामुपासीत ॥१४॥

---

१. एतदनन्तर-विनावचनम्। आवापवचने सति कुर्यात्। इत्यधिकः पाठः घ० पु०

२. अमरको० ब्र० सुयोदयकाले यः स्वपिति सोऽभ्युदितः। सूर्यास्तकाले यः स्वपिति सोऽभिनिम्रुक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—यदि सोते रहने पर ही सूर्योदय हो जाय तो उस दिन उपवास करते हुए मौन रहकर दिनभर खड़ा रहे ॥ १४ ॥

आतमितोः प्राणमायच्छेदित्येके ॥ १५ ॥

यावदङ्गानां ग्लानिर्भवति तावत्प्राणमायच्छेत् प्राणवायुमाकृष्य धारयेत्। प्राणायामं कुर्यादित्येके मन्यते। शक्त्यपेक्षो विकल्पः।

तत्र मनुः—

'सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह।
त्रिः पठेदायतप्राणः प्राणायामस्स उच्यते ॥' इति।

एवमावर्तयेद्यावद्ग्लानिः ॥ १५ ॥

अनु०—कुछ आचार्यों का मत है कि उस समय तक प्राणायाम करे जब तक थकान न हो जाय ॥ १५ ॥

स्वप्नं वा पापकं दृष्ट्वा ॥ १६ ॥

पापकस्वप्नो दुस्स्वप्नः मर्कटास्कन्दनादिः तं च दृष्ट्वा ॥ १६ ॥

अनु०—बुरा स्वप्न देखने पर भी उस समय तक प्राणायाम करे जब तक अंग थक न जाय ॥ १६ ॥

अर्थं वा [2]सिसाधयिषन् ॥ १७ ॥

अर्थः प्रयोजनम्। तच्च दृष्टमदृष्टं वा साधयितुमिच्छन् ॥ १७ ॥

अनु०—अथवा किसी प्रयोजन को सिद्ध करने की इच्छा हो तब भी उस समय तक प्राणायाम करे जब तक क्लान्त न हो जाय ॥ १७ ॥

नियमातिक्रमे चाऽन्यस्मिन् ॥ १८ ॥

नियमानां 'उदङ्मुखो मूत्रं कुर्यादि' (१. ३१. १) त्येवमादीनामतिक्रमे च आतमितोः प्राणमायच्छेदिति सर्वत्र शेषः ॥ १८ ॥

अनु०—अथवा किसी अन्य नियम का अतिक्रमण करने परभी उस समय तक प्राणायाम करे जब तक वह थक न जाय ॥ १८ ॥

दोषफलसंशये न तत् कर्तव्यम् ॥ १९ ॥

यस्मिन् कर्मणि कृते पक्षे दोषः फलं सम्भाव्यते न तत् कुर्यात्, यथा सभये देशे एकाकिनो गमनमिति ॥ १९ ॥

---

१. सर्वेष्वादर्शपुस्तकेषु मनुवचनत्वेनैवोपन्यस्तमिदम्। न कुत्राऽपि तु मुद्रित मनुस्मृतिपुस्तकेषूपलभ्यते। बौधायनधर्मसूत्रे ४. १. २८ तूपलभ्यते।

२. सिसाधयिषुः, इति० घ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—यदि किसी कर्म के फल दोषपूर्ण होने की आशंका हो तो उस कर्म को नहीं करना चाहिए ॥ १९ ॥

एवमध्यायानध्याये ॥ २० ॥

संशय इत्युपसमस्तमप्यपेक्ष्यते। अध्यायोऽनध्याय इति संशयेऽप्येवं न तत् कर्तव्यमिति। 'सन्धावनुस्तनित' (१.९.२०) इत्युदाहरणम्। पूर्वस्यैवाऽयं प्रपञ्चः ॥ २० ॥

अनु०—यदि अध्ययन करने और न करने के विषय में शङ्का हो तो भी उसे नहीं करना चाहिए ॥ २० ॥

न संशये प्रत्यक्षवद्ब्रूयात् ॥ २१ ॥

संशयितमर्थमात्मनोऽज्ञानपरिहाराय प्रत्यक्षवत् निश्चितवन्न ब्रूयात ॥

अनु०—किसी संशय युक्त विषय को प्रत्यक्ष के समान स्पष्ट नहीं कहना चाहिए ॥ २१ ॥

अभिनिम्रुक्ताभ्युदितकुनखिश्यावदाग्रदिधिषुदिधिषूपतिपर्याहितपरीष्टपरिवित्तपरिविन्नपरिविविदानेषु चोत्तरोत्तरस्मिन्नशुचिकरनिर्वेषो गरीयान् गरीयान् ॥ २२ ॥

आद्यौ द्वौ गतौ। कुनखी कृष्णनखः। श्यावा दन्ता यस्य स श्यावदन् विवर्णदन्तः। "विभाषा श्यावारोकाभ्यामि' ति दत्रादेशः तस्य नलोपश्छान्दसः। ज्येष्ठायामनूढायां पूर्वं कनीयस्या वोढा अग्रदिधिषुः। पश्चादितरस्या वोढा दिधिषूपतिः। ज्येष्ठे अकृताधाने कृताधानः कनिष्ठः पर्याधाता। ज्येष्ठः पर्याहितः। ज्येष्ठे अकृतसोमयागे कृतसोमयागः कनिष्ठः परियिष्टा। ज्येष्ठः परीष्टः। अकृतविवाहे ज्येष्ठे कृतविवाहः कनिष्ठः [2]परिवेत्तेति प्रसिद्धः। ज्येष्ठः [3]परिवित्तः। [4]ज्येष्ठस्य भार्यामुपयच्छमानः परिविन्नः। यस्मिन्नगृहीतभागे वा कनिष्ठो भागं गृह्णाति स ज्येष्ठः परिविन्नः। कनिष्ठः परिविविदानः। चकारः पर्याधातृप्रभृतीनां समुच्चयार्थः। एतेष्वभिनिम्रुक्तादिषु यो य उत्तरस्तस्मिंस्तस्मिन्द्वादशमासादिरशुचिकरनिर्वेषो यः पूर्वमुक्तः तत्र तत्र गरीयान्

१. पा० सू० ५. ४. ११४

२. सरिवित्त इति प्रसिद्धः इति० ख० ङ० च० पुस्तकेष्वपपाठः।

३. परिवित्तिः इति ख० च० पुस्तकयोः पाठः। अत्र बोधायनधर्मसूत्रव्याख्या २. १. ३. द्रष्टव्या।

४. ज्येष्ठे चागृहीतभागे कनिष्ठो भागं गृह्णाति स परिविविदानः। परिविन्न इतरा। इत्येव पाठो घ० पुस्तके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवति। पूर्वत्र पूर्वत्र लघीयान्। अभिनिम्रुक्ताभ्युदितयोरनन्तरोक्तं प्रायश्चित्त-द्वयमपि विकल्पेन भवति ॥ २२ ॥

अनु०—सूर्यास्त के समय सोने वाले, सूर्योदय के समय सोने वाले, काले नाखूनों वाले, काले दाँतों वाले, बड़ी बहन के अविवाहिता रहते छोटी बहन से विवाह करने वाले, किसी ऐसी स्त्री से जिसकी छोटी बहन पहले विवाहित हो, विवाह करने वाले, बड़े भाई के गृह्य अग्नि प्रज्वलित करने से पहले ही गृह्य अग्नि का आधान करने वाले छोटे भाई, ऐसे व्यक्ति का जिसके छोटे भ्राता ने पहले ही पवित्र गृह्य अग्नि का आधान किया हो, बड़े भाई के सोमयज्ञ करने से पहले ही सोमयज्ञ करने वाले, जिस व्यक्ति का छोटा भ्राता उससे पहले सोमयज्ञ कर चुका हो, जिस बड़े भाई को अपनी पैतृक सम्पत्ति का अंश अपने छोटे भाई के बाद मिला हो या जिसने छोटे भाई का विवाह हो जाने के बाद विवाह किया हो, जिस छोटे भाई ने अपने बड़े भाई के विवाह से पहले ही विवाह किया हो या बड़े भाई को पैतृक सम्पत्ति का अंश मिलने से पहले ही अपना अंश प्राप्त किया हो—इन सभी व्यक्तियों के लिए वे ही प्रायश्चित्त हों जो अपवित्रता के लिए किए जाते हैं और क्रमशः दोषों के लिए उत्तरोत्तर कठिन प्रायश्चित्त करना चाहिए ॥ २२ ॥

तच्च लिङ्गं चरित्वोद्धार्यमित्येके ॥ २३ ॥

यस्मिन् कौनख्यादिके लिङ्गे यत् प्रायश्चित्तमुक्तं तच्चरित्वा तत् कौनख्यादिकं लिङ्गमुद्धरेदित्येके मन्यन्ते। अन्यत्राऽहिताग्निभ्य इति स्मृत्यन्तरम् ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने द्वादशी कण्डिका ॥ १२ ॥

अनु०—कुछ लोगों का मत है कि प्रायश्चित्त कर लेने के बाद प्रायश्चित्त के कारण को दूर कर देना चाहिए ॥ २३ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां
द्वितीयप्रश्ने पञ्चमः पटलः ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ षष्ठ पटलः

सवर्णापूर्वशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिस्सम्बन्धः ॥ १ ॥

सवर्णा चाऽसावपूर्वा च शास्त्रविहिता चेति कर्मधारयः। सवर्णा सजातीया, ब्राह्मणस्य ब्राह्मणीत्यादि। अपूर्वा। अनन्यपूर्वा अन्यस्मा अदत्ता, न विद्यते पूर्वः पतिरस्या इति। शास्त्रविहिता शास्त्रोक्तेन विवाहसंस्कारेण संस्कृता 'सगोत्राय दुहितरं न प्रयच्छे (२. ११. १५) दित्यादिशास्त्रानुगुणा वा। एवम्भूतायां भार्यायां यथर्तु गृह्योक्तेन ऋतुगमनकल्पेन गच्छतो ये पुत्रा जायन्ते तेषां 'स्वकर्म ब्राह्मणस्ये' (२.१०.४) त्यादिना पूर्वमुक्तैः कर्मभिस्सम्बन्धो भवति। (गच्छथ इति थकारोऽपपाठः) ॥ १ ॥

अनु०—समान वर्ण वाली जो स्त्री पहले किसी अन्य पुरुष के अधीन उसकी पत्नी के रूप में न रही हो तथा शास्त्रोक्त विधि से जिसका विवाह किया गया हो (अथवा जिसमें शास्त्रोक्त सभी गुण विद्यमान हों) उसका ऋतुकाल के नियम के अनुसार अभिगमन करने वाले पुरुष के पुत्रों को ही (अपने वर्ण के लिए विहित) कर्म करने का अधिकार है ॥ १ ॥

दायेन चाऽव्यतिक्रमश्चोभयोः ॥ २ ॥

उभयोर्मातापित्रोर्दायेन च तेषां सम्बन्धो भवति अव्यतिक्रमश्च। च इति चेदर्थे। अव्यतिक्रमश्चेत्, यदि ते मातरं पितरं च न व्यतिक्रमेयुः। व्यतिक्रमे तु दायहानिरिति।

अपर आह—'उभयोरपि दायेन तेषां व्यतिक्रमो न कर्तव्यः। अवश्यं देयो दायस्तेभ्य इति ॥ २ ॥

अनु०—तथा ऐसे ही पुत्र माता और पिता के दाय का अंशग्राही हो सकते हैं।

टि०—अन्य व्याख्याकार के अनुसार माता पिता ऐसे पुत्रों को दाय विभाग के समय उपेक्षित न करें, अवश्य अंश प्रदान करें ॥ २ ॥

पूर्ववत्यामसंस्कृतायां वर्णान्तरे च मैथुने दोषः ॥ ३ ॥

अन्येन पाणिग्रहणेन तद्वती पूर्ववती। असंस्कृता विवाहसंस्काररहिता। वर्णान्तरं ब्राह्मणादेः क्षत्रियादिः। तेषु पूर्ववत्यादिषु मैथुने सति दोषो भवति। कस्य ? तयोरेव मिथुनीभवतोः ॥ ३ ॥

अनु०–दूसरे व्यक्ति से विवाहिता, विवाह संस्काररहिता, भिन्न वर्ण वाली स्त्रियों से मैथुन करने पर दोनों को ही दोष होता है ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्राऽपि दोषवान् पुत्र एव ॥ ४ ॥

तत्रेति सप्तम्यास्त्रल्[१] 'इतराभ्योऽपि दृश्यन्त' इति। ताभ्यामुभाभ्यामपि पुत्र एवाऽतिशयेन दोषवान्। तत्र पूर्ववत्यामुत्पन्नौ कुण्डगोलकौ

[२]"पत्यौ जीवति कुण्डस्स्यान्मृते भर्तरि गोलक' इति।

असंस्कृतायामुत्पन्नस्य नामान्तरं नास्ति। किं तु दुष्टत्वमेव। वर्णान्तरे तु जात्यन्तरम्। तत्र गौतमः—

[३]'अनुलोमाः पुनरनन्तरैकान्तरद्व्यन्तरासु जातास्सवर्णाम्बष्ठोग्र निषाददौष्यन्तपारशवाः। प्रतिलोमास्तु सूतमागधायोगवक्षत्तृवैदेहकचण्डाला' इति। एवकारो दुहितृनिवृत्त्यर्थः। तथा च वसिष्ठः—

[४]'पतितेनोत्पादितः पतितो भवत्यन्यत्र स्त्रियास्सा हि परगामिनी तामरिक्थामुपेयादिति। [५]'स्त्रीरत्नं दुष्कुलादपी'ति मनुः ॥ ४ ॥

अनु०—उन दोनों के संयोग से उत्पन्न पुत्र दोषयुक्त होता ही है ॥ ४ ॥

पुत्रेभ्यो दायभागं वक्ष्यन् अन्यस्य भार्यायामन्येनोत्पादितः किमुत्पादयितुः? अहोस्वित् क्षेत्रिण इति विचारे निर्णयमाह—

उत्पादयितुः पुत्र इति हि ब्राह्मणम् ॥ ५ ॥

अनु०—एक ब्राह्मण ग्रन्थ में कहा गया है कि पुत्र उत्पन्न करने वाले पुरुष का होता है ॥ ५ ॥

न केवलं ब्राह्मणमेव। वैदिकगाथा अप्यत्रोदाहरन्तीत्याह—

अथाप्युदाहरन्ति—

इदानीमेवाहं [६]जनकः स्त्रीणामीर्ष्यामि नो पुरा।
यदा यमस्य सादने जनयितुः पुत्रमब्रुवन्।
रेतोधाः पुत्रं नयति परेत्य यमसादने।
तस्माद्भार्यां रक्षन्ति बिभ्यन्तः पररेतसः।
अप्रमत्ता रक्षथ तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुः।
जनयितुः पुत्रो भवति साम्पराये मोघं वेत्ता कुरुते तन्तुमेतमिति ॥६॥

( ) कुण्डलान्तर्गतो भागो नास्ति घ० ङ० पुस्तकयोः।

१. पा० सू० ५. ३. १४ २. म० स्मृ० ३. १७४

३. गौ० ध० ४. १६–१७, ४. व० ध० १३. ६. मुद्रितव० ध० कोशेषु पाठभेदो दृश्यते। ५. म० स्मृ० २. २३८

६. 'जनक' इति सम्बुध्यन्ततया पठितं बौ० ध० २. २. ३४–३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जनयितुः पुत्रः क्षेत्रिणो वेति विवादे पराजितस्य क्षेत्रिणो वचनम् एतावन्तं कालमहं जनको मन्यमानः इदानीमेव स्त्रीणामीर्ष्यामपि परपुरुषसंसर्गं न सहे। कदा इदानीम् ? यदा यमस्य सादने पितृलोके जनयितुः पुत्रो भवति पुत्रकृत्यं परलोकगतस्य जनयितुरेव न क्षेत्रिण इत्यब्रुवन् धर्मज्ञाः। उक्त एवार्थः किञ्चिद्विशेषेणोच्यते–रेतोधाः बीजप्रदः पुत्रं नयति पुत्रदत्तं पिण्डादिकमात्मानं नयति प्रापयति। परेत्य मृत्वा। यमसादने यमलोके। तस्मात्कारणात् भार्या रक्षन्ति पररेतसो बिभ्यन्तः। बिम्यतः छान्दसो नुम्। अतो यूयमप्यप्रमत्ता अवहिता भूत्वा एतं तन्तुं प्रजासन्तानं रक्षथ। लोडर्थे लट्। रक्षतेरर्थः। किमर्थम् ? वः युष्माकम् क्षेत्रे परबीजानि पररेतांसि मा वाप्सुः। व्यत्ययेनाऽयं कर्मणि कर्तृप्रत्ययः। मा वाप्सत उप्तानि मा भूवन्। मोप्येरन्। कथमिति ? (अपर आह–परशब्दाज्जसो लुक्। परे पुरुषाः वः क्षेत्रे बीजानि मा वाप्सुरिति।) यस्मात् साम्पराये परलोके जनयितुरेव पुत्रफलं भवति वेत्ता [1]परिणेता क्षेत्री तु एतं तन्तुं मोघं निष्प्रयोजनं कुरुते आत्मसात्करोति। इतिशब्दो गाथासमाप्तौ। एतच्च क्षेत्रिणोऽनुज्ञामन्तरेण पुत्रोत्पादनविषयम्। यदा तु क्षेत्री वन्ध्यो रुग्णो वा प्रार्थयते मम क्षेत्रे पुत्रमुत्पादयेति, यदा वा सन्तानक्षये विधवां नियुञ्जते यथा विचित्रवीर्यस्य क्षेत्रे सत्यवतीं व्यासेन। तदुत्पन्नः पुत्र उभयोरपि पुत्रो भवति–बीजिनः क्षेत्रिणश्च। व्यामुष्यायणश्च स भवति। तथाचाचार्य एवाह–

[2]'यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षये'दिति। याज्ञवल्क्योऽप्याह–

> [3]'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
> उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥' इति।

नारदोऽपि–

> [4]'व्यामुष्यायणको दद्याद्द्वाभ्यां पिण्डोदके पृथक्।
> रिक्थादर्धं समादद्याद्बीजक्षेत्रवतोस्तथा॥' इति॥ ६॥

अनु०—इस विषय में निम्नलिखित गाथा भी उद्धृत की जाती है: अपने को पहले पिता समझकर मैं अपनी पत्नियों के साथ दूसरे पुरुष के संसर्ग को सहन नहीं करता हूँ, क्योंकि पितृलोक में जाने पर पुत्र उत्पन्न करने वाले का ही होता है ऐसा कहा गया है मृत्यु के बाद वीर्य देने वाला पिता पुत्र को लेकर यम के घर जाता है, इसलिए लोग दूसरे व्यक्तियों के वीर्य पड़ने की आशंका से पत्नियों की सावधानी से निगरानी करते हैं।

( ) एतत्कुण्डान्तर्गतो भागः ख० च० पुस्तकयोरेवास्ति। तत्र 'कथमिति' इति नास्ति।
१. 'भार्याया लब्धा' इति ख० च० पु०   २. आप० श्रौ० १. ९. ७.
३. या० स्मृ० २. १३०.   ४. नार० स्मृ० १३. ४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सावधान होकर पुत्रों की उत्पत्ति की रक्षा करो। तुम्हारे खेत में कोई दूसरा बीज न बोए। पर लोक में पुत्र उत्पन्न करने वाले का ही होता है, और पति अपनी पुत्रवृद्धि को निष्फल बना देता है॥ ६॥

यदि पूर्ववत्यादिषु मैथुने दोषः कथं तर्हि [1]उचथ्यभारद्वाजौ व्यत्यस्य भार्ये जग्मतुः [2]वसिष्ठश्चण्डालीमक्षमालाम्। [3]प्रजापतिश्च स्वां दुहितरम्। तत्राऽऽह–

दृष्टो धर्मव्यतिक्रमस्साहसं च पूर्वेषाम्॥ ७॥

सत्यं दृष्टोऽयमाचारः पूर्वेषाम्। स तु धर्मव्यतिक्रमः, न धर्मः; गृह्यमाणकारणत्वात्। न चैतावदेव, साहसं च पूर्वेषां दृष्टम्। यथा [4]जामदग्न्येन रामेण पितृवचनादविचारेण मातुश्शिरश्छिन्नम्॥ ७॥

अनु०—पूर्वजों (ऋषियों) के आचरण में भी धर्म के उल्लङ्घन का तथा साहस कर्म का उदाहरण देखने में आता है॥ ७॥

किमिदानीं तेषामपि दोषः? नेत्याह—

[5]तेषां तेजोविशेषेण प्रत्यवायो न विद्यते॥ ८॥

तादृशं हि तेषां तेजः यदेवंविधैरपि पाप्मभिर्न प्रत्यवयन्ति। [6]'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हाऽस्य पाप्मानः प्रदूयन्ते इति [7]श्रुतेः॥ ८॥

अनु०—किन्तु उनमें अधिक तेज होने के कारण उनका कर्म पापकर्म नहीं होता॥ ८॥

न चैतावताऽर्वाचीनानामपि तथा प्रसङ्ग इत्याह—

तदन्वीक्ष्य प्रयुञ्जानस्सीदत्यवरः॥ ९॥

तदिति [8]'नपुंसकमनपुंसकेने' त्येकशेष एकवद्भावश्च। तं व्यतिक्रमं तच्च साहसमन्वीक्ष्य दृष्ट्वा स्वयमपि तथा प्रयुञ्जानोऽवर इदानीन्तनः सीदति प्रत्यवैति। न ह्यग्निः सर्वं दहतीत्यस्माकमपि तथा शक्तिरिति॥ ९॥

अनु०—इस समय के जो व्यक्ति उन पूर्वजों के उदाहरण का अनुगमन करके उन कर्मों को करते हैं वे पापी होते हैं॥ ९॥

पुत्रप्रसङ्गेनाऽऽह—

दानं क्रयधर्मश्चाऽपत्यस्य न विद्यते॥ १०॥

---

१. महाभारते द्रष्टव्यम्। २. म० स्मृ० ९. २३. महाभा० व० १३२ च० द्रष्टव्यम्। अरुन्धत्या एवाक्षमालेति नामान्तरम्।

३. ता. ब्रा० ८. २. १०. द्रष्टव्यम्। ४. कथेयं महाभा. वन ११६. अ. द्रष्टव्या। ५. इदमग्रिमं सूत्रं पद्यात्मना निबद्धं तन्त्रवार्तिके। ६. छान्दो० ५. २४.

७. 'छान्दोग्ये श्रूयते' इत्यधिकं ख० च० पु० ८. पा० सू० १. २. ६९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानग्रहणेन विक्रयोऽपि गृह्यते, त्यागसामान्यात्। क्रयधर्म इति च प्रतिग्रहस्याऽपि ग्रहणम्। धर्मग्रहणात् स्वीकारसामान्याच्च। अपत्यस्य दानप्रतिग्रहक्रयविक्रया न कर्तव्याः। द्वादशविधेषु पुत्रेषु दत्तक्रीतयोरपि पुत्रयोर्मन्वादिभिः पठितत्वान्नाऽयं सामान्येन प्रतिषेधः। किं तर्हि? ज्येष्ठपुत्रविषयः, एकपुत्रविषयः स्त्रीविषयो वा। तथा च वसिष्ठः–

[1]'न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा। न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषाम्। न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्राऽनुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राज्ञे निवेद्य निवेशनस्य मध्ये अग्निमुपसमाधाय सम्परिस्तीर्य व्याहृतीभिर्हुत्वाऽदूरबान्धवं सन्निकृष्टमेव प्रतिगृह्णीया' दिति। विश्वजिति च सर्वस्वदाने गवादिवदपत्यं न देयमिति। विक्रयस्तु सर्वत्र निषिद्धः। तत्र उपपातकेषु याज्ञवल्क्य आह–

[2]'नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः।' इति।

बह्वृचब्राह्मणेऽपि शुनश्शेपाख्याने दृश्यते–[3]'स ज्येष्ठं पुत्रं निगृह्णान उवाचे' त्यादि। पुत्रप्रकरणे अपत्यशब्दोपादानमपि ज्येष्ठपुत्रविषयत्वस्य लिङ्गम्। न पतन्त्यनेनेत्यपत्यमिति।

ऋणमस्मिन् सन्नयत्यमृतत्वं च गच्छति।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्॥' इति॥ १०॥

अनु० – पुत्र को दान देने या दान लेने का अथवा उसे बेचने और खरीदने का नियम विहित नहीं है॥ १०॥

विवाहे दुहितृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद्दुहितृमतेऽतिरथं शतं देयं तन्मिथुयाकुर्यादिति तस्यां क्रयशब्दस्संस्तुतिमात्रं धर्माद्धि सम्बन्धः॥ ११॥

आर्षे विवाहे दुहितृमते दानं कचिद्वेदे श्रूयते। तस्माद्दुहितृमते रथेनाधिकं गवां शतं देयम्। तच्च दुहितृमान् मिथुया कुर्यात्। मिथ्या कुर्यात्।[4]"मादेवानां मिथुयाऽकर्भागधेय" मिति दृश्यते। मिथुया कुर्यादिति कोऽर्थः वरायैव पुनर्दद्यादिति। तद्दानं काम्यं कामनिमित्तम्। 'यथा युक्तो विवाहस्तथायुक्ता प्रजा भवतीति(२. १०. ४)ऋषितुल्याः पुत्रा यथा स्युरिति ततश्च धर्मार्थं न प्रजार्थम् विक्रयार्थम्। यस्तु तस्यां विवाहक्रियायां क्रयशब्दः क्वचित् स्मृतौ दृश्यते स संस्तुतिमात्रम्: द्रव्यप्रसादसाम्यात्। न मुख्यक्रयत्वप्रतिपादनार्थम्। कुतः? हि

१. व० ध० १५. ३–६ २ या० स्मृ० प्रा० २३६ ३. ऐ० ब्रा० ७. ३. १५
४. ऐ० ब्रा० पं० ७. ५. तै० सं० १. ३. ९.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मात् धर्मादेव हेतोः सम्बन्धो दम्पत्योरिति । आर्षे दुहितृमते मिथुनौ गावौ देयावित्यत्राप्येष एव न्यायः ।

अत्र मनुः—

[1]'यासां नाऽऽददत्ते शुल्कं ज्ञातयो न स विक्रयः ।
अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् ॥' इति ।

एतच्च सर्वं 'दानं क्रयधर्मश्चाऽपत्यस्य न विद्यत' इत्यस्य व्यभिचारनिवृत्त्यर्थं कर्तव्यमित्युक्तम् ॥ ११ ॥

अनु०—विवाह के समय कन्या के पिता को अपनी इच्छा की पूर्ति के लिए तथा धर्म के पालन के लिए कोई दान देने का नियम सुना जाता है, इसलिए कन्या के पिता को सौ गाएँ तथा एक रथ प्रदान करे और कन्या का पिता पुनः उस दान को वर को ही वापस कर दे। ऐसे विवाहों में 'क्रय' शब्द का केवल लाक्षणिक अर्थ लिया जाता है (क्रय विक्रय नहीं होता), क्योंकि धर्म के पालन के लिए ही (पति-पत्नी का) सम्बन्ध होता है ॥ ११ ॥

अथ दायविभागः—

एकधनेन ज्येष्ठं तोषयित्वा ॥ १२ ॥

अनु०—अपने ज्येष्ठ पुत्र को कोई एक विशेषधन से सन्तुष्ट करके ॥ १२ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने त्रयोदशी कण्डिका ॥ १३ ॥

अथ दायविभागः—

जीवन् पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्त पतितं च परिहाप्य ॥ १ ॥

एकेन प्रधानेन केनचिद्धनेन गवादिना ज्येष्ठं पुत्रं तोषयित्वा तृप्तं कृत्वा जीवनन्नेव पुत्रेभ्यो दायं विभजेत् । सममात्मना परस्परं च तेषाम् । सामान्याभिधानात् क्रमागतं स्वयमार्जितं च क्लीबादीन् वर्जयित्वा । क्लीबादिग्रहणं जात्यन्धादीनामप्युपलक्षणम् । यथाह मनुः—

[2]'अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा ।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥' इति ।

अन्धादीनां पुत्रसद्भावे तेऽप्यंशहराः । एवमुन्मत्तपतितौ[3] निवृत्ते निमित्ते

---

१. म० स्मृ० ३. ५४ २. 'अनर्हौ' इति ड० पु० म० स्मृ० ९. २०१

३. वृत्यनिमित्ते क्लीबादयस्तु न भर्तव्याः, इति ड० पु० उन्मत्तपतितौ निवृत्तनिमित्तौ० इति च० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्लीबादयस्तु न भर्तव्याः। अत्र विभागकालः स्मृत्यन्तरवशाद्ग्राह्यः। तत्र नारदः—

[1]''मातुर्निवृत्ते रजसी प्रत्तासु भगिनीषु च।
निवृत्ते चापि मरणात्पितर्युपरतस्पृहे ॥' इति।

यदा पुत्राणां पृथक्पृथक् धर्मानुष्ठाने शक्तिश्रद्धे भवतः सोऽपि कालः। 'तस्माद्धर्म्या पृथक्क्रिये'ति[2] दर्शनादिति। 'जीवन्नि'तिवचनं जीवन्नेवाऽवश्यं पुत्रान् विभजेत् एष धर्म इति प्रतिपादनाय। अन्यथा तदनर्थकम्। अजीवतोऽप्रसङ्गात्। स्मृत्यन्तरेषु स्वयमार्जिते पितुरिच्छया विषमविभागो दर्शितः। न स धर्म्य इत्याचार्यस्य पक्षः। भार्याया अप्यंशो न दर्शितः। आत्मनः एवांशस्तस्या अपीति मन्यते। वक्ष्यति च 'जायापत्योर्न विभागो विद्यते' (२. १४. १६) इति।

केचित्तु पितुर्द्वावंशावित्याहुः। 'द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिते'ति दर्शनात्। अयमप्याचार्यस्य पक्षो न भवति। यथा पुत्राणामेकैक एवांशस्सभार्याणां तथा पितुरपीति। यद्वा पुत्राणामेवांशसाम्यं आत्मनस्त्वाधिक्येऽपि न दोषः।

तत्र हारीतः—

'पिता ह्याग्रयणः पुत्रा इतरे ग्रहाः यद्याग्रयणः स्कन्देदुपदस्येद्वा इतरेभ्यो गृह्णीयादि'ति

विभागादूर्ध्वं पित्रोर्जीवनाभावे पुत्रभागेभ्यो ग्राह्यमित्युक्तं भवति। इति जीवद्विभागः ॥ १ ॥

अनु०—अपने जीवनकाल में ही पुत्रों में दाय का समान विभाजन करे किन्तु नपुंसक, पागल और पातकी पुत्रों को दाय का अंश न देवे ॥ १ ॥

अथ मृते कुटुम्बिनि तद्धनस्य गतिमाह—

पुत्राभावे यः प्रत्यासन्नः सपिण्डः ॥ २ ॥

'पुत्राभावे' इति वचनात् सत्सु पुत्रेषु त एव गृह्णीयुरविशेषात्समम्। तत्र नारदीये विशेषः—

[3]'यच्छिष्टं प्रीतिदायेभ्यो दत्वार्णं पैतृकं च यत्।
भ्रातृभिस्तद्विभक्तव्यमृणी स्यादन्यथा पिता ॥' इति ॥

कात्यायनस्तु—

[4]''भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम्।
विभागकाले देयं तद्रिक्थिभिस्सर्वमेव तु ॥ इति ॥

१. नार० स्मृ० १३. ३ २. म० स्मृ० ९. १११ वचनात् इति. क०घ० पुस्तकयोः
३. ना० स्मृ० १३. ३२ ४. कात्यायनीयस्मृतौ नास्ति.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र याज्ञवल्क्यः--

[1]"पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरे' दिति ।

तदत्र नोक्तं पुत्रैरेव सह वृत्तिरस्या इति ।

तथा च मनुः—

[2]"पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ।।' इति ।

एवं मातुरप्यभावे तद्धनं भर्तृकुललब्धं स्वयमार्जितं च तत्पुत्रा अप्रत्ताश्च दुहितरस्समं गृह्णीयुः ।

[3]स्त्रीधनं तदपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते मानमात्रकम् ।। इति बृहस्पतिः । पितृकुललब्धं चाऽप्रत्ता एव दुहितरः ।

[4]"मातुस्तु यौतकं यत्स्यात् कुमारीभाग एव सः ।' इति मनुः ।
अथाऽप्रत्ता दुहितरः पुत्राश्च जननी तदा ।
[6]जनन्या संस्थितायां तु समं सर्वे सहोदराः ।।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः । इति मानवमेव ।

अत्र व्यासः—

[7]*'असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि ।।' इति ।

अत्र क्रमविवाहे बृहस्पतिः—

*'ब्रह्मक्षत्रियविट्छूद्रा विप्रोत्पन्नास्त्वनुक्रमात् ।
चतुस्त्रिद्व्येकभागेन भजेयुस्ते यथाक्रमम् ।।
क्षत्रजास्त्रिद्व्येकभागा विड्जौ तु द्व्येकभागिनौ ।' इति ।

मानवे च स्पष्टमुक्तम्—

[8]"सर्वं वा रिक्थजातं तद्दशधा प्रविभज्य तु ।
धर्म्यं विभागं कुर्वीत विधिनाऽनेन धर्मवित् ।।
चतुरोंऽशान् हरेद्विप्रः त्रीनंशान् क्षत्रियासुतः ।
वैश्यापुत्रो हरेद्व्यंशमंशं शूद्रासुतो हरेत् ।। इति ।

---

१. या० स्मृ० २. १२३ २. म० स्मृ० ९. ३. बौ० ध० २. २. ४६

३. मुद्रितबृहस्पतिस्मृतौ नेदं वचनमुपलभ्यते । परन्तु 'जनन्यां संस्थितायां' (९. १९२.) इतिश्लोकव्याख्यावसरे कुल्लूकभट्टेनेदं वचनं बृहस्पतिवचनत्वेनैवोदाहृतम् ।

४. सा न मातृकम्, इति ङ०पु०पु० ५. म०स्मृ०६. १३१.८ ६. म०स्मृ० ९. १९२

७. * एतच्चिह्नाङ्कितानि वचनानि मुद्रिततत्तद्ग्रन्थेषु नोपलभ्यन्ते ।

८. म० स्मृ० ७. १५२. १५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य तु ब्राह्मणी वन्ध्या मृता वा तत्र क्षत्रियादिसुतास्त्रिद्व्येकभागाः। यस्य त्वेकस्यामेव पुत्रस्सा सर्वं हरेत् शूद्रापुत्रवर्जम्।

यथाह देवलः—

*आनुलोम्येकपुत्रस्तु पितुस्सर्वस्वभाग्भवेत्।
निषाद एकपुत्रस्तु विप्रस्वस्य तृतीयभाक्॥
द्वौ सपिण्डस्सकुल्यो वा स्वधादाता तु तं हरेत्' इति।

निषादः पारशवः। क्षेत्रविषये बृहस्पतिः—

*न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै।
यद्यप्यस्य पिता दद्यान्मृते विप्रासुतो हरेत्॥
शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हति।
सजतावाप्नुयात्सर्वमिति धर्मो व्यवस्थितः॥' इति॥

याज्ञवल्क्यः—[1]

'जातो हि दास्यां शूद्रेण कामतोंऽशहरो भवेत्।
मृते पितरि कुर्युस्तं भ्रातरस्त्वर्धभागिनम्॥' इति।

भार्याविषये विष्णुः—

*मातरः पुत्रभागानुसारतो भागहारिण्य' इति। अत्र,
औरसः पुत्रिकाबीजक्षेत्रजौ पुत्रिकासुतः।
पुनर्भवश्च कानीनस्सहोढो गूढसम्भवः।
दत्तः क्रीतस्स्वयंदत्तः कृत्रिमश्चाऽपविद्धकः।
यत्र क्वचोत्पादितश्च पुत्राख्या दश पञ्च च।
अनेनैव क्रमेणैषां पूर्वाभावे परः परः।
पिण्डदोंऽशहरश्चेति प्रायेण स्मृतिषु स्थिताः।

औरसो धर्मपत्नीजः। 'सवर्णापूर्वशास्त्रविहिताया' मिति पूर्वमुक्तः। गौतमः [2]—'पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वास्मदर्थमपत्यमिति संवाद्ये' ति।

बृहस्पतिः—

'एक एवौरसः पित्र्ये धने स्वामी प्रकीर्तितः।
तत्तुल्या पुत्रिका प्रोक्ता भर्तव्यास्त्वपरे स्मृताः॥' इति।

मनुः—[3]

पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते।
समस्तत्र विभागः स्यात् ज्येष्ठाता नास्ति हि स्त्रियाः॥ इति।

---

१. या० स्मृ १-१३३ २ गौ० ध० २८. १८ ३. म० स्मृ० ९. १३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याज्ञवल्क्यः—

[1]'अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥ इति।

अयमेक एवोत्पादयितुर्बीजजः, क्षेत्रजस्तु क्षेत्रिणः।

बृहस्पतिः—

'पुत्रोऽथ पुत्रिकापुत्रस्स्वर्गप्राप्तिकरावुभौ।
रिक्थे पिण्डाम्बदाने च समौ सम्परिकीर्तितौ॥' इति।

काश्यपः—

'सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥
उदकं स्पर्शिता या च या च पाणिगृहीतिका।
अग्नि परिगता या च पुनर्भूप्रसवा च या'॥

कात्यायनः—

क्लीबं विहाय पतितं या पुनर्लभते पतिम्।
तस्यां पौनर्भवो जातः व्यक्तमुत्पादकस्य सः॥ इति।

मनुः—

[2]'पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवः॥' इति।

नारदः—

[3]'कानीनश्च सहोढश्च गूढायां यश्च जायते।
तेषां वोढा पिता ज्ञेयस्ते च भागहराः पितुः।' इति॥

वसिष्ठः—

[4]'अप्रत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः।
पौत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्॥' इति।

अनूढायामेव मृतायां मातरि मातामहस्य पुत्रः। अन्यथा वोढुः।

मनुः—

[5]'या गर्भिणी संस्क्रियते ज्ञाताऽज्ञातापि वा सती।
वोढुस्स गर्भो भवति सहोढ इति चोच्यते।
[6]उत्पद्यते गृहे यस्य न च ज्ञायेत कस्यचित्।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः॥

दत्तः पूर्वमेवोक्तः। पैठीनसिः—'अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परपरिग्रहेण व्यार्षेयेण जाताः ते असंगतकुलीनाद्यामुष्यायणा भवन्तीति।

१. या० स्मृ० २. १२७ २. म० स्मृ० ९. १७२. ३. ना० स्मृ० १३. ४
४. व० स्मृ० १७. २५ ५. म० स्मृ० ९. १७३ ६. क० स्मृ० ९. १७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुः—

[1]भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥
[2]क्रीणीयाद्यस्त्वपत्यार्थे मातापित्रोर्यमन्तिकात् ।
स क्रीतकस्सुतस्तस्य सदृशोऽसदृशोऽपि वा ।
[3]मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्य स्वयं दत्तस्तु स स्मृतः ॥ इति ।
[4]सदृशं तु प्रकुर्यातां गुणदोषविवर्जितम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥
[5]मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं प्रतिगृह्णीयादपविद्धः स उच्यते ॥ इति ।

सर्व एते समानजातीयाः,

[6]सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः ॥

इति याज्ञवल्क्यवचनात् ।

विष्णुः—'यत्र क्वचनोत्पादितस्तु द्वादशः, इति ।

याज्ञवल्क्यः—

[7]'पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः ।' इति

मनुः—

[8]'श्रेयसः श्रेयसोऽभावे पापीयान् रिक्थमर्हति ।' इति ।
'क्रमादेते प्रवर्तन्ते मृते पितरि तद्धने ।

नारदः—

[9]'ज्यायसो ज्यायसोऽभावे जघन्यस्तदवाप्नुयात् ॥' इति ।

देवलः—

'सर्वे ह्यनौरसस्यैते पुत्रा दायहराः स्मृताः ।
औरसे पुनरुत्पन्ने तेषु ज्यैष्ठ्यं न तिष्ठति ।
तेषां सवर्णा ये पुत्रास्ते तृतीयांशभागिनः ।
शेषास्तमुपजीवेयुर्ग्रासाच्छादनसम्भृताः ॥' इति ।

---

१. म० स्मृ० ९. १८२ २. म० स्मृ० ९. १७४ ३. म० स्मृ० ९. १७७,
४. म० म० स्मृ० ९. १६९ ५. म० स्मृ० ९. १७१ ६. या० स्मृ० २. १३३
७. या० स्मृ० २. १३२ ८. म० स्मृ० ९. १८४ ९. ना० स्मृ० १३. ४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनुः—

[1]'षष्ठं तु क्षेत्रजस्यांशं प्रदद्यात्पैतृकाद्धनात् ।
औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ॥' इति ।

बृहस्पतिः—

'क्षेत्रजाद्यास्सुतास्त्वन्ये पञ्चषट्सप्तभागिन;' इति ।

हारीतः—

'विभजिष्यमाण एकविंशं कानीनाय दद्याद्विंशं पौनर्भवायैकोनविंशं द्व्यामुष्यायणायाऽष्टादशं क्षेत्रजाय सप्तदशं पुत्रिकापुत्रायेतरानौरसाये'ति ।

वसिष्ठः—

[2]"पुत्रं प्रतिग्रहीष्य'न्निति प्रक्रम्य 'तस्मिंश्चेत्प्रतिगृहीते औरस उत्पद्यते चतुर्थभागभागि'ति ।

एवमेतेषु शास्त्रेषु विद्यमानेषु यदाचार्येण पूर्वमुक्तं 'तेषां कर्मभिस्सम्बन्धो दायेनाऽव्यतिक्रमश्चोभयो'रिति तद्धर्मपत्नीजे पुत्रे सति क्षेत्रजादीनां समांशहरत्वप्रतिषेधपरं वेदितव्यम् ।

अथाऽविभाज्यम् ।

अत्र मनुः—

[3]'अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् ।
स्वयमर्हति लब्धं तन्नाऽकामो दातुमर्हती' ति ।

कात्यायनः—

'नाऽविद्यानां तु वैद्येन देयं विद्याधनात् क्वचित् ।
समं विद्याधनानां तु देयं वैद्येन तद्धनम् ॥
परभक्तप्रदानेन प्राप्तविद्यो यदाऽन्यतः ।
तया प्राप्तं तु विधिना विद्याप्राप्तं तदुच्यते ॥' इति ।

व्यासः—

'पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।
तस्य तन्नाऽपहर्तव्यं [4]शौर्यहार्यं तथैव च ॥' इति ।

याज्ञवल्क्यः—

[5]"क्रमादभ्यागतं द्रव्यं हृतमप्युद्धरेत यः ।
दायादेभ्यो न तद्दद्याद्विद्यया लब्धमेव च ॥
पत्यौ जीवति यस्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमानाः पतन्ति ते ॥'

---

१. म० स्मृ० ९. १३४ २. व० ध० १५. ६. ९ ३. म० म० ९. २०८
४. शौर्यं विद्याधनं तथा इति. ग० पु० शौर्यं भार्याधनं तथा इति ङ० पु०
५. या० स्मृ० २-११९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यास—:

'साधारणं समाश्रित्य यत्किञ्चिद्वाहनायुधम् ।
शौर्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ॥
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥'

इति पुत्रदायविभागः । तदभावे तु मृतस्य यः प्रत्यासन्नः सपिण्डः, स किम् ? 'दायं हरेते'ति (१४. ५.) वक्ष्यमाणेन सम्बन्धः ।

[1]'लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
सप्तमः पिण्डदातैषां सापिण्ड्यं साप्तपूरुषम् ॥'

इति सपिण्डलक्षणम् । तेषु यो यः प्रत्यासन्नस्स स गृह्णीयादिति । भार्यां तु रिक्थग्राहिणस्सपिण्डाद्या रक्षेयुः, न तु दायग्रहणमित्याचार्यस्य पक्षः । श्रूयते हि–[2]'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति ।

मनुरपि –

[3]'अनिन्द्रिया अदायादाः स्त्रियो नित्यमिति श्रुति'रिति

अत्र सपिण्डाद्यभावे बृहस्पतिः–

'अन्यत्र ब्राह्मणात्किं तु राजा धर्मपरायणः ।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिस्मृतः ॥
अन्नार्थं तण्डुलप्रस्थमपराह्णे तु सेन्धनम् ।
वसनं त्रिपणक्रीतं देयमेकं त्रिमासतः ॥
एतावदेव साध्वीनां चोदितं विधवाधनम् ।
वसनस्याऽशनस्यैव तथैव रजकस्य च ॥
धनं व्यपोह्य तच्छिष्टं दायादानां प्रकल्पयेत् ।
[4]धूमावसानिकं ग्राह्यं सभायां स्नानतः पुरा ।
वसनाशनवासांसि विगणय्य धवे मृते ॥' इति ।

व्यासः–

'द्विषाहस्रः परो दायः स्त्रियै देयो धनस्य तु ।
यच्च भर्त्रा धनं दत्तं सा यथाकाममाप्नुयात् ॥' इति ।

पणानां द्वे सहस्रे परिमाणमस्य द्विषाहस्रः । एष परो दायः स्त्रिया नाधिक इति । एतत् प्रभूते धने, ज्ञातयश्च न रक्षेयुरिति शङ्कायाम् । एवं [5]'पत्नी दुही-

---

१. मत्स्यपु० अ० १८ श्लो० २९ २. तै० सं० ६. ५. ८

३. म० स्मृ० ९. ९८ निरिन्द्रिया ह्यमन्त्राश्च स्त्रियोऽनृतमिति श्रुतिः, इति मुद्रित-पुस्तकपाठः । बोधायनसूत्रे तु प्रायस्संवदति (३. २. ४७) पाठः ।

४. धूमावसानिकं श्राव्यं सन्धायां स्नानतत्परा । इति ङ भूमावसानिकं इति. घ० पु.

५. या स्मृ० २. १३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तरश्चे' त्यादीनि यानि पत्न्या दायप्राप्तिपराणि तान्येवमेव द्रष्टव्यानि। गौतमस्तु पुत्राभावे पत्न्यास्सपिण्डादिभिस्समांशमाह–[1] पिण्डगोत्रर्षिसम्बन्धा रिक्थं भजेरन्। स्त्री चाऽनपत्यस्ये' ति। अस्यार्थः–अनपत्यस्य रिक्थं पिण्डसम्बन्धात्सपिण्डाः प्रत्यासत्तिक्रमेण भजेरन्। तदभावे गोत्रसम्बन्धास्सगोत्राः। तदभावे ऋषिसम्बन्धास्समानप्रवराः स्त्री च पत्नी च। (अत्र स्त्रियाः पृथङ्निर्देशात् च शब्दाच्च यदा सपिण्डा भजेरन् तदा स्त्री सह तैरेकमंशं गृह्णीयात्। ततश्च 'पितुरूर्ध्वं विभजतां माताप्यंशं समं हरे'दिति सपिण्डादिभिस्सहग्रहणमुक्तमिति। वयमप्येतमेव पक्षं रोचयामहे)। अत्र पितरि भ्रातरि सोदर्ये च जीवति सोदर्यो भ्राता गृह्णीयादित्येके मन्यन्ते।

तथा च शङ्ख—

अपुत्रस्य स्वर्यातस्य द्रव्यं भ्रातृगामि, तदभावे मातापितरौ लभेयातां, पत्नी वा ज्येष्ठे'ति।

देवलः—

'ततो दायमपुत्रस्य विभजेरन् सहोदराः।
कुल्या दुहितरो वापि ध्रियमाणः पिताऽपि च॥
सवर्णा भ्रातरो माता भार्या चेति यथाक्रमम्॥' इति।

याज्ञवल्क्यः–

[2]'संसृष्टिनस्तु संसृष्टी सोदर्यस्य तु सोदरः।
दद्याच्चाऽपहरेच्चांशं जातस्य च मृतस्य च॥
अन्योदर्यस्तु संसृष्टी नाऽन्योदर्यधनं हरेत्।
असंसृष्टयपि चाऽऽदद्यात्सोदर्यो नान्यमातृजः॥' इति।

अत्र सोदर्य इति विशेषवचनात् 'पत्नी दुहितरश्चे'त्यत्र भ्रातृग्रहणं भिन्नोदरविषयमिति। प्रत्यासत्त्यतिशयात्[3]पितैवेत्याचार्यस्य पक्षः। तदभावे सोदर्यः, तदभावे तत्पुत्रः, तदभावे भिन्नोदराः, तदभावे पितृव्य इत्यादि द्रष्टव्यम्। मात्रादयोऽपि स्त्रियो जीवनमात्रं लभेरन्निति॥ २॥

अनु०–पुत्र के न होने पर निकटतम सपिण्ड संबन्धी दायका अधिकारी होता है।

टि०—हरदत्त ने अपनी व्याख्या में दूसरे सूत्रकारों तथा स्मृतिकारों के मतों का उद्धरण दिया है। आपस्तम्ब के इस सूत्र से स्पष्ट है कि पुत्रहीन व्यक्ति की मृत्यु पर उसकी विधवा पत्नी दाय की अधिकारिणी नहीं होती थी। बौधायन का भी मत ऐसा ही है।

---

१. गौ० ध० २८. २१. २२

( ) कुण्डलान्तर्गतो भागः च पुस्तकेऽधिकपाठतया परिगणितः।

२. या०स्मृ०२. १३८. १३९ ३. पितैवेति वयम् इति च०पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदभाव आचार्य आचार्याभावेऽन्तेवासी हृत्वा तदर्थेषु धर्मकृत्येषु वोपयोजयेत् ॥ ३ ॥

सपिण्डाभावे आचार्यो दायं हरेत्। तस्याऽप्यभावे अन्तेवासी हरेत्। हृत्वा तदर्थेषु धर्मकृत्येषु तडागखननादिषूपयोजयेत्। वाशब्दात् स्वयं वा उपयुञ्जीत ॥ ३ ॥

अनु० सपिण्ड का अभाव होने पर दाय का अधिकारी आचार्य होता है, आचार्य के भी न होने पर उसका शिष्य उस दाय को ग्रहण कर मृतव्यक्ति के नाम से धार्मिककर्मों में उस धन को लगावे अथवा स्वयं ही उस धन का उपयोग करे ॥ ३ ॥

दुहिता वा ॥ ४ ॥

दुहिता वा दायं हरेत्। पुत्राभाव इत्येके। अनन्तरोक्ते विषय इत्यन्ये ॥ ४ ॥

अनु०—अथवा (पुत्र न होने पर) पुत्री दाय को ग्रहण करे ॥ ४ ॥

सर्वाभावे राजा दायं हरेत् ॥ ५ ॥

सर्वग्रहणात् बन्धूनां सगोत्राणां चाऽप्यभावे ॥ ५ ॥

अनु०—सभी बन्धु-बान्धवों के न होने पर राजा दाय ग्रहण करे ॥ ५ ॥

ज्येष्ठो दायाद इत्येके ॥ ६ ॥

एके मन्यन्ते ज्येष्ठ एव पुत्रो दायहरः। इतरे तु तमुपजीवेयुः। सोऽपि तान् पितेव परिपालयेदिति। तथा च गौतमः[1]"सर्वं वा पूर्वजस्येतान् विभृयात्पितृव"दिति ॥ ६ ॥

अनु०—कुछ आचार्यों का मत है कि ज्येष्ठ पुत्र ही दाय का अधिकारी होता है (दूसरे पुत्र उसके अधीन रहकर जीवन-निर्वाह करते हैं) ॥ ६ ॥

देशविशेषे सुवर्णं कृष्णा गावः कृष्णं भौमं ज्येष्ठस्य ॥ ७ ॥

क्वचिद्देशे सुवर्णादि ज्येष्ठस्य भाग इत्याहुः। भूमौ जातं भौमं धान्यं कृष्णं माषादि कृष्णायसमित्यन्ये ॥ ७ ॥

अनु०—कुछ देशों में स्वर्ण, काले रंग के गाय-बैल तथा पृथ्वी से उत्पन्न काले रंग के अनाज ज्येष्ठ पुत्र को प्राप्त होते हैं ॥ ७ ॥

रथः पितुः परिभाण्डं च गृहे ॥ ८ ॥

रथः पितुरंशः[2]गृहे च यत् परिभाण्डमुपकरणं पीठादि तदपि ॥ ८ ॥

अनु०—रथ और घर में जो भी काठ के उपकरण होते हैं वे सभी पिता के अंश हैं। ॥ ८ ॥

---

१. गौ०ध०२८. ३ २. एतदनन्तरं, उपलक्षणमेतत् वाहनस्य' इत्यधिकं घ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलङ्कारो भार्याया: ज्ञातिधनं चेत्येके ॥ ९ ॥

भार्यायास्तु धृतोऽलङ्कारोंऽशः, ज्ञातिभ्यः पित्रादिभ्यश्च यल्लब्धं धनं तच्चेत्येवमेके मन्यते ॥ ९ ॥ *

अनु०--कुछ धर्मज्ञों के अनुसार आभूषण तथा अपने बन्धु-बान्धवों से प्राप्त धन पत्नी का अपना अंश होता है ॥ ९ ॥

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ १० ॥

ज्येष्ठो दायद इति यदुक्तं तच्छास्त्रैर्विरुद्धम् ॥ १० ॥

अनु०—(ज्येष्ठ पुत्र ही दाय का अधिकारी हो) यह शास्त्र के द्वारा प्रतिषिद्ध किया गया है ॥ १० ॥

येन विरुद्धं तद्दर्शयति—

[१]"मनुः पुत्रेभ्यो दायं व्यभज" दित्यविशेषेण श्रूयते ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभावे तैलं शाकमिति ॥ १५ ॥

सर्पिषोऽभावे तैलं मांसस्याऽभावे शाकम् । इतिशब्दाद्यच्चान्यदेव युक्तम् ॥ १५ ॥

अनु०—इन वस्तुओं का अभाव होने पर तैल और शाक से युक्त भोजन दे ॥ १५ ॥

मघासु चाधिकं श्राद्धकल्पेन सर्पिर्ब्राह्मणान् भोजयेत् ॥ १६ ॥

मघासु पूर्वपक्षेऽपि श्राद्धविधानेन सर्पिर्मिश्रमन्नं ब्राह्मणान् भोजयेत्॥१६॥

अनु०—मघा नक्षत्र में अधिक ब्राह्मणों को श्राद्ध के नियम के अनुसार घृत मिश्रित अन्न का भोजन करावे ॥ १६ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकोनविंशी कण्डिका ॥ १९ ॥

मासि श्राद्धे तिलानां द्रोणंद्रोणं येनोपायेन शक्नुयात् तेनोपयोजयेत् ॥ १ ॥

येनोपायेनोपयोजयितुं शक्नुयात् अभ्यङ्गे, उद्वर्तने, भक्ष्ये, भोज्ये चेति तेनोपायेन मासिश्राद्धे तिलानां द्रोणं द्रोणमुपयोजयेत् । तत्रैकैकस्य ब्राह्मणस्य तिलानां द्रोणं द्रोणमुपयोजयितुमशक्यत्वात् समुदितानुपयोजयेत् । द्रोणंद्रोणमिति वीप्सावचनं तु प्रतिमासिश्राद्धमुपयोजनार्थमिति केचित् । अन्ये तु एवंभूताः प्रबलाः प्रयत्नेनाऽन्विष्य भोजयितव्या इति ॥ १ ॥

अनु०—प्रत्येक मासिक श्राद्ध पर एक द्रोण तिल जिस उपाय से संभव हो सके उस उपाय से खर्च करे ॥ १ ॥

समुदेतांश्च भोजयेन्न चाऽतद्गुणायोच्छिष्टं दद्युः ॥ २ ॥

व्याख्यातमिदम् । दद्युरिति बहुवचनं तथाविधकर्तृबहुत्वापेक्षम् । वचनव्यत्ययो वा ॥ २ ॥

अनु०—सभी उत्तम गुणों से युक्त ब्राह्मणों को भोजन करावे और उस अन्न के अवशिष्ट अंश को ऐसे ब्राह्मणों को न देवे जो गुण में उन ब्राह्मणों से हीन होवें ॥ २ ॥

अथ पुष्टिकामस्यैवाऽपरः प्रयोग आ पटलसमाप्तेः—

उदगयन आपूर्यमाणपक्षस्यैकरात्रमवरार्ध्यमुपोष्य तिष्येण पुष्टिकामः स्थालीपाकं श्रपयित्वा महाराजमिष्ट्वा तेन सर्पिष्मता ब्राह्मणं भोजयित्वा पुष्ट्यर्थेन सिद्धिं वाचयीत ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्टिकामः पुरुष एकरात्रावरमुपवास कृत्वा उदगयन आपूर्यमाणपक्षस्य पूर्वपक्षस्य सम्बन्धिना तिष्येण तस्मिन्नक्षत्रे स्थालीपाकं श्रपयित्वा 'महाराजं वैश्रवणं यजेत। आज्यभागान्ते महाराजाय स्वाहेति प्रधानहोमः। स्विष्टकृदादिजयादयः। परिषेचनान्ते तेन सर्पिष्मता स्थालीपाकेन ब्राह्मणं भोजयेत्। उत्तरविवक्षयेदं वचनम्। भोजयित्वा सिद्धिं वाचयीत पुष्टिरस्त्विति ॥ ३ ॥

अनु०— समृद्धि चाहने वाला श्राद्धकर्ता उत्तरायण में तिष्य नक्षत्र होने पर, मास के प्रथम पक्ष में कम से कम एक दिन और एक रात्रि उपवास करके स्थालीपाक पकवावे और महाराज कुवेर के लिए अर्पित करे, घृत मिलाकर उस अन्न से एक ब्राह्मण को भोजन करावे और पुष्टि अर्थ वाले मन्त्र का पाठ कराकर समृद्धि की शुभाशंसा करावे ॥ ३ ॥

एवमहरहरापरस्मात्तिष्यात् ॥ ४ ॥

एवमिदं स्थालीपाकश्रपणादिसिद्धिवाचनान्तमहरहः कर्तव्यमापरस्मात्तिष्यात् यावदपरस्तिष्य आगच्छति ॥ ४ ॥

अनु०—अगले तिष्य नक्षत्र के आने तक इस कर्म को प्रतिदिन करे ॥ ४ ॥

द्वौ द्वितीये ॥ ५ ॥

द्वितीये तिष्ये प्राप्ते द्वौ भोजयेत्। अन्यत्समानम्। एवमातृतीयात् ॥ ५ ॥

अनु०—दूसरे तिष्य दिन को दूसरे मास में दो ब्राह्मणों को भोजन करावे ॥ ५ ॥

त्रींस्तृतीये ॥ ६ ॥

तृतीये तिष्ये त्रीन् भोजयेदाचतुर्थात् ॥ ६ ॥

अनु०—तीसरे तिष्य दिन को तीसरे मास में तीन ब्राह्मणों को भोजन करावे ॥६॥

एवं संवत्सरमभ्युच्चयेन ॥ ७ ॥

एवमेतत्कर्म यावत्संवत्सरः पूर्यते तावत् कर्तव्यम्। ब्राह्मणभोजनं चाऽभ्युच्चयेन भवति। चतुर्थीप्रभृति चत्वारः, पञ्चमप्रभृति पञ्चेत्यादि ॥ ७ ॥

अनु०—इस प्रकार एक वर्ष तक यह कर्म किया जाता है और प्रत्येक मास में एक-एक ब्राह्मण की संख्या बढ़ाई जाती है ॥ ७ ॥

एवं कृते फलमाह—

महान्तं पोषं पुष्यति ॥ ८ ॥

महत्या पुष्ट्या युक्तो भवति ॥ ८ ॥

---

१. कुवेराय वैश्रवाणाय। महाराजाय नमः (तै. आर. १. ३१.) इति मन्त्र वैश्रवणस्य महाराजपदेन सामानाधिकरण्यात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—इस प्रकार अत्यन्त समृद्धि की प्राप्ति होती है ॥ ८ ॥

आदित एवोपवासः ॥ ९ ॥

उपवासस्त्वादित एव पुष्ये भवति । न प्रतिपुष्यम् ॥ ९ ॥

अनु०—किन्तु उपवास केवल प्रथम दिन को किया जाता है ॥ ९ ॥

आत्ततेजसां भोजनं वर्जयेत् ॥ १० ॥

आत्ततेजांसि तक्रवाजिनादीनि । तानि नोपभुञ्जीत ॥ १० ॥

अनु०—उन वस्तुओं के भोजन का परहेज करे जिनमें तेज होता है (जैसे तक्र, दधि आदि) ॥ १० ॥

भस्मतुषाधिष्ठानम् ॥ ११ ॥

वर्जयेदित्येव । भस्मतुषांश्च नाऽधितिष्ठेत् नाऽऽक्रामेत् ॥ ११ ॥

अनु०—भस्म के ऊपर या भूसे के ऊपर न चले ॥ ११॥

पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेत् ॥ १२ ॥

एकेन पादेन पादान्तरस्य प्रक्षालनं अधिष्ठानं च वर्जयेत् न कुर्यात् ॥१२॥

अनु०—एक पैर से दूसरे पैर को न धोवे और एक पैर के ऊपर दूसरा पैर न रखे १२ ॥

प्रेङ्खोलनं च पादयोः ॥ १३ ॥

प्रेङ्खोलनं दोलनमितस्ततश्चालनम् ॥ १३ ॥

अनु०—दोनो पैरों को न हिलावे ॥ १३ ॥

जानुनि चाऽत्याधानं जङ्घायाः ॥ १४ ॥

एकस्मिन् जानुनि इतरस्या जङ्घायाः अत्याधानमवस्थापनं च वर्जयेत् ॥१४॥

अनु०—एक घुटने के ऊपर दूसरी जंघा को न स्थापित करे ॥ १४ ॥

नखैश्च नखवादनः ॥ १५ ॥

स्पष्टम् ॥ १५ ॥

अनु०—नखों से नखों को न रगड़े ॥ १५ ॥

स्फोटनानि चाऽकारणात् ॥ १६ ॥

पर्वसन्धीनां स्फोटनानि वर्जयेत् अकारणात् , कारणं श्रमवातादि । वादनस्फोटनानीति समासपाठेऽप्येष एवार्थः ॥ १६ ॥

अनु०—बिना कारण के अंगुलियों से आवाज न करे ॥ १६ ॥

यच्चान्यत्परिचक्षते ॥ १७ ॥

यच्चान्यदेवं उक्तव्यतिरिक्तं तृणच्छेदनादि शिष्टाः परिचक्षते गर्हन्ते तदपि वर्जयेत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—अन्य कर्मों को भी न करे जिनका निषेध किया गया है ॥ १७ ॥

योक्ता च धर्मयुक्तेषु द्रव्यपरिग्रहेषु च ॥ १८ ॥

एकश्चशब्दोऽनर्थकः। केचिन्नैव पठन्ति। धर्माविरुद्धा ये द्रव्यपरिग्रहास्तेषु च योक्ता उत्पादयिता स्यान्निरीहस्स्यात् ॥ १८ ॥

अनु०—धर्म के अनुसार द्रव्य का उपार्जन करने में संलग्न होवे ॥ १८ ॥

प्रतिपादयिता च तीर्थे ॥ १९ ॥

तीर्थं गुणवत् पात्रं, यज्ञो वा। तत्र द्रव्यस्याऽर्जितस्य प्रतिपादयिता स्यात् ॥१९

अनु०—योग्य व्यक्तियों या वस्तुओं के ऊपर धन व्यय करे ॥ १९ ॥

यन्ता चाऽतीर्थे यतो न भयं स्यात् ॥ २० ॥

यन्ता नियन्ता अप्रदाता अतीर्थे अप्रदाता च स्यात्। यतः पुरुषादप्रदानेऽपि न भयं स्यात्। भयसम्भवे तु पिशुनादिभ्यो देयम् ॥ २० ॥

अनु०—किसी अयोग्य व्यक्ति को कोई वस्तु न दे, जिससे उसे भय न हो ॥२०॥

संग्रहीता च मनुष्यान् ॥ २१ ॥

अर्थप्रदानप्रियवचनानुसरणादिभिर्मनुष्याणां सङ्ग्रहणशीलस्स्यात् ॥२१॥

अनु०—अर्थ देकर तथा प्रिय वचन से मनुष्यों से मित्रता रखे ॥ २१ ॥

भोक्ता च धर्माविप्रतिषिद्धान् भोगान् ॥ २२ ॥

धर्माविरुद्धा ये भोगाः स्रक्चन्दनस्वभार्यासेवनादयः, तेषां च भोगशीलस्स्यात् ॥ २२ ॥

अनु०—उन सुखों का भोग करे जो धर्म के द्वारा निषिद्ध नहीं हैं ॥ २२ ॥

एवमुभौ लोकावभिजयति ॥ २३ ॥

एवं महत्या पुष्ट्या युक्त उक्तप्रकारमनुतिष्ठन्नुभौ लोकावभिजयति भोगेनेमं लोकं, तीर्थे प्रतिपादनेन चाऽमुं लोकमिति ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने विंशी कण्डिका ॥ २० ॥

अनु०—इस प्रकार वह दोनों लोकों को प्राप्त करता है ॥ २३ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्नेऽष्टमः पटलः ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ नवमः पटलः

'सर्वाश्रमाणां समयपदानो' त्युक्तं पुरस्तात्। के पुनस्ते आश्रमाः ? इत्यत आह–

चत्वार आश्रमा गार्हस्थ्यम्, आचार्यकुलं, मौनं, वानप्रस्थ्यमिति ॥ १ ॥

आश्राम्यन्त्येषु श्रेयोऽर्थिनः पुरुषा इत्याश्रमाः। एषा सामान्यसंज्ञा। गृहे तिष्ठति कुटुम्बरक्षणपर इति गृहस्थः। तस्य भावो गार्हस्थ्यम्। स एक आश्रमः। आचार्यकुलं तत्र वासो लक्षणया सोऽप्येकः। 'मनु अवबोधन' मनुत इति मुनिर्ज्ञानपरः। तस्य भावो मौनम्। सोऽपरः। वनं प्रतिष्ठत इति वनप्रस्थः। स एव वानप्रस्थः। प्रज्ञादित्वादण्। तस्य भावो वानप्रस्थ्यम्। इतिशब्दः परिसमाप्त्यर्थः एतावन्त एवाऽऽश्रमा इति। चतुर्णामेवोपदेशेऽपि चत्वार इति वचनं "[1]ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्ये"ति स्मृत्यन्तरोक्तं मा ग्राहीदिति ॥ १ ॥

अनु०—आश्रम चार हैं, गार्हस्थ्य, आचार्यकुल (अर्थात् आचार्य कुल में निवास, ब्रह्मचर्याश्रम), मौन (अर्थात् संन्यास) तथा वानप्रस्थ ॥ १ ॥

तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति ॥ २ ॥

तेष्वाश्रमेषु चतुर्ष्वपि यथाशास्त्रमव्यग्रस्ससमाहितमना भूत्वा यो वर्तते, स क्षेममभयं पदं गच्छति। अनेनाऽऽश्रमविकल्प उक्तो वेदितव्यः निश्रेयसार्थिनाऽन्यतमस्मिन्नाश्रमे यथाशास्त्रमवहितेन वर्तितव्यमिति। तथा च गौतमः–[2]'तस्याऽऽश्रमविकल्पमेके ब्रुवत' इति ॥ २ ॥

अनु०—इन सभी आश्रमों में शास्त्र के नियम के अनुसार, विघ्नों से विचलित न होते हुए निवास करने वाले व्यक्ति का क्षेम होता है ॥ २ ॥

सर्वेषामुपनयनप्रभृति समान आचार्यकुले वासः ॥ ३ ॥

उपनयनप्रभृति य आचार्यकुले वासोऽष्टाचत्वारिंशद्वर्षादीनामन्यतमस्स सर्वेषामाश्रमाणां समानः॥ ३ ॥

अनु०—उपनयन के समय से गुरुकुल में निवास का कर्तव्य सभी के लिए समान रूप से होता है ॥ ३ ॥

सर्वेषामनूत्सर्गो विद्यायाः ॥ ४ ॥

---

१. गौ. ध. ३. ३६.   २. गौ. ध. ३. १.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनूत्सर्गः छान्दसो दीर्घः। विद्याया अनूत्सर्गोऽपि सर्वेषामाश्रमाणां। समानः तस्मादाचार्यकुले वासस्समान इति॥ ४॥

अनु०—विद्या को परित्याग न करना भी सभी का कर्तव्य होता है॥ ४॥

बुध्वा कर्माणि यत्कामयते तदारभेत॥ ५॥

प्रत्याश्रमं यानि कर्माणि विहितानि तानि बुध्वा गृहस्थस्यैतानि कर्तव्यानि। एषामननुष्ठाने प्रत्यवायः। फलं चेदमेषाम्, एतानि शक्यान्यनुष्ठातुं, नैतानीत्याचार्यादुपश्रुत्य यत्कर्म फलं वा कामयेत तदारभेत तमाश्रमं प्रतिपद्येतेति॥ ५॥

अनु०—प्रत्येक आश्रम में किए जाने वाले कर्मों को जानकर जैसा करना चाहे वैसा करे। (जिस कर्मफल की इच्छा हो वैसा कर्म करे)॥ २॥

तत्र गार्हस्थ्यस्य पूर्वमेव प्रपञ्चितत्वादध्ययनानन्तरं प्रतिपित्सितस्याऽऽचार्यकुलस्य स्वरूपमाह—

यथा विद्यार्थस्य नियम एतेनैवान्तमनूपसीदत आचार्यकुले शरीरन्यासो ब्रह्मचारिणः॥ ६॥

यथा विद्यार्थस्य उपकुर्वाणस्य ब्रह्मचारिणः 'अथ ब्रह्मचर्यविधि'रित्यारभ्याऽग्नीन्धनादिनियम उक्तः, अतस्तेनैव नियमेनाऽऽन्तमाशरीरपातादनपसीदतः उपसदनमेवानूपसदनं तत्कुर्वतः आचार्यकुले शरीरन्यासः परित्यागो भवति ब्रह्मचारिणो नैष्ठिकस्य। तत्रैवाऽऽमरणात्तिष्ठेत्, नाऽऽश्रमान्तरं गच्छेत्। यदि तमेवाश्रममात्मनः क्षेमं मन्येतेति। मनुः—

[1]'आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत्॥
एषु त्वविद्यमानेषु स्थानासनविहारवान्।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः॥
एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः।
स गच्छत्युत्तमं स्थानं न चेहाऽऽजायते पुनः॥' इति॥ ६॥

अनु०—जो विद्यार्थी के नियम बताये गये हैं उन्हीं नियमों का अन्त तक पालन करते हुए तथा पूजन विधि का पालन करते हुए नैष्ठिक ब्रह्मचारी आचार्य के कुल में शरीर छोड़े॥ ६॥

अथ परिव्राजः॥ ७॥

---

१. म० स्मृ० २४७—२४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाऽनन्तरं परिव्राजो धर्म उच्यते। दृष्टादृष्टार्थान् सर्वानेवाऽऽरम्भान् परित्यज्याऽऽत्मलाभाय संन्यासाश्रमं परिव्रजतोति परिव्राट् संन्यासो ॥७॥

अनु०—अब संन्यासी के नियमों का उल्लेख किया जाता है ॥ ७ ॥

अत एव ब्रह्मचर्यवान् प्रव्रजति ॥ ८ ॥

अत एव ब्रह्मचर्याश्रमादेव ब्रह्मचर्यवानविप्लुतब्रह्मचर्यः प्रव्रजति परिव्रज्यां कुर्याद्यदि तथैव पक्वकषायो भवति। श्रूयते च[1] 'ब्रह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वे'ति, 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'ति च। अत्र केचिदाहुः—'अत एवे'ति वचनात् गृहाश्रमं प्रविष्टस्य तत्परित्यागेनाश्रमान्तरप्राप्तिराचार्यस्याऽनभिमतैवेति लक्ष्यते। तत्रायमभिप्रायः—दारपरिग्रहे सति 'यावज्जीवमग्निहोत्रं जुहुयादि'ति श्रुत्या विरुध्यते। स कथं प्रव्रजेदिति। तस्मात्सत्यपि वैराग्ये काम्यस्य कर्मणः परित्यागेन नित्यानि नैमित्तिकानि च कर्माणि कुर्वन् प्रतिषिद्धानि वर्जयन् गृहस्थ एव मुच्यत इति। तथाऽऽह याज्ञवल्क्यः—

[2]'न्यायार्जितधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।
श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते ॥' इति।

अथ योऽनाहिताग्निस्तस्य विरक्तस्य मुन्याश्रमप्रवेशे को विरोधः? ऋणश्रुतिविरोधः—'[3] जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य' इति। मनुरपि—

[4]'ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥' इति।

मोक्षो मोक्षाश्रमः। नन्वेवं ब्रह्मचर्यादपि प्रव्रज्या नोपपद्यते। अथ तत्र[5] 'यदहरेव विरजेदि'ति श्रुत्या युक्तं प्रव्रजितुं तदा विरक्तस्य, [6]गार्हस्थ्यादपि भविष्यति। स्मर्यते च—

[7]'प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणाम्।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहादि'ति ॥

तथा यो गृहस्थो वृद्धो मृतभार्यः पुनर्दारक्रियायामसमर्थः, तस्यापि युज्यते प्रव्रज्या। तस्मा'द्यदहरेव विरजे'दि'त्येष एव कालः प्रव्रज्यायाः, सर्वमन्यदविरक्तस्येति युक्तम्। एवकारस्तु सूत्रे श्रुत्यनुसारेण प्रयुक्तः। यथा 'गृहाद्वा वनाद्वे'ति ब्रुवाणैव श्रुतिर्ब्रह्मचर्यादेव प्रव्रजेदित्याह, तथेति ॥ ८ ॥

---

१. जाबालो० ४ २, या० स्मृ० ३. २०२ ३. तै० सं० ६. ३. १०
४. म० स्मृ० ६. ३५ ५. जाबालो. ४ ६. गृहस्थस्यापि इति च० पु०
७. म० स्मृ० ६. ३८ ८. 'एक एवांश' इति ङ. पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—ब्रह्मचर्याश्रम के नियमों का पालन करने वाला व्यक्ति ही संन्यास ग्रहण करे ॥ ८ ॥

तस्योपदिशन्ति ॥ ९ ॥

तस्य परिव्राजः कर्तव्यमुपदिशन्ति धर्मज्ञाः ॥ ९ ॥

अनु०—धर्मज्ञों ने संन्यासी के लिए निम्नलिखित नियमों का विधान किया ॥ ९ ॥

अनग्निरनिकेतस्स्यादशर्माऽशरणो मुनिः स्वाध्याय एवोत्सृजमानो वाचं ग्रामे प्राणवृत्तिं प्रतिलभ्याऽनिहोऽनमुत्रश्चरेत् ॥ १० ॥

ब्रह्मचारिणस्समिदाधानाद्यग्निकार्यं गृहस्थस्यौपासनाद्यग्निहोत्रादि वानप्रस्थस्य[1] 'श्रामणकेनाग्निमाधाये'ति विहितेऽग्नौ होमादि । तस्य तु नैवंविधं किञ्चिदग्निकार्यमस्तीत्यनग्निः । निकेतो निवासस्थानं स्वभूतं तदभावादनिकेतः । शर्म सुखं वैषयिकं तदस्य नास्तीत्यशर्मा । किञ्चिदपि शरणं न प्रतिपन्नः न वा कस्यचिच्छरणभूत इत्यशरणः । स्वाध्यायः प्रणवादिपवित्राणां जपः । अत्र बौधायनः—

'वृक्षमूलिको वेद सन्न्यासी वेदो वृक्षस्तस्य मूलं प्रणवः प्रणवात्मको वेदः प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्रजापति'रिति । तत्रैव वाचं विसृजेत । अन्यत्र मौनव्रतः स्यात् । यावता प्राणा ध्रियन्ते सा प्राणवृत्तिः । तावतीं भिक्षां ग्रामे प्रतिलभ्य । एतावानस्य ग्रामे प्रवेशः । अन्यदा बहिर्वासः । इहार्थाः कृष्यादयः परलोकार्थाश्च जपहोमादयो यस्य न सन्ति सोऽनिहोऽनमुत्र इत्युक्तः । एवंभूतश्चरेत् । नैकस्मिन् ग्रामे द्व्यहमपि वसेत् । अत्र गौतमः—[2] 'न द्वितीयामपर्तु रात्रिं ग्रामे वसेदि'ति [3] वर्षासु ध्रुवशील' इति च ॥ १० ॥

अनु०—विना अग्नि के रहे, घर का, सुखों का तथा शरण का परित्याग करे, मौन रहे, केवल दैनिक अध्ययवसाय के समय बोले, ग्राम में केवल इतने ही अन्न की भिक्षा मांगे जितने से उसकी जीविका चल सके। इस संसार की अथवा परलोक की चिन्ता किये विना चारो ओर घूमता रहे ॥ १० ॥

तस्य मुक्तमाच्छादनं विहितम् ॥ ११ ॥

यत् परैर्मुक्तं परित्यक्तमयोग्यतया, तत् तस्य विहितमाच्छादनं, तद्वास आच्छादयेत्। निर्णिज्येति गौतमः ॥ ११ ॥

अनु०—दूसरों द्वारा फेंके गये वस्त्रों के पहनने का ही विधान संन्यासी के लिए किया गया है ॥ ११ ॥

---

१. गौ० ध० ३. १७ २. गौ० ध० ३. २१ ३. गौ० ३. १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वतः परिमोक्षमेके ॥ १२ ॥

सर्वैरेव वासोभिः परिमोक्षमेक उपादिशन्ति। न किञ्चिदपि वासो बिभृयात्। नग्न एव चरेदिति। अपर आह—

सर्वतो विधितो निषेधतश्चाऽस्य परिमोक्षमेके ब्रुवते। न किञ्चिदस्य कृत्यं न किञ्चिदस्य वर्ज्यमिति ॥ १२॥

अनु०—कुछ धर्मज्ञों का कहना है कि सभी वस्त्रों का परित्याग कर नग्न हो कर घूमे ॥ १२ ॥

एतदेवोदाहरणैः प्रपञ्चयति—

सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्याऽऽत्मानमन्विच्छेत् ॥ १३ ॥

सत्यं वक्तव्यमिति योऽयं नियमस्तं परित्यज्य तथा तत्र वक्तव्यमनृतं[1] "तद्धि सत्याद्विशिष्यत" इत्यादिके विषये अनृतं वक्तव्यमिति योऽयं नियमस्तं च परित्यज्य। सुखं मृष्टभोजनादिजन्यम्। दुःखं शीतवातादिजन्यम्। वेदान् स्वाध्यायाध्ययनम्। इमं लोकं ऐहलौकिकं काम्यं कर्म। अमुं च लोकं पारलौकिकं काम्यं कर्म। सर्वमेतत् परित्यज्य आत्मानमध्यात्मपटलो (१-२२, २३)क्तमन्विच्छेत् उपासीतेति। तदेवं ज्ञानबलावलम्बनेन हतविधिनिषेधा ये स्वैरं प्रवर्तन्ते सिद्धाः तेषां मतमुपन्यस्तम् ॥ १३ ॥

अनु०—सत्य और असत्य का, सुख और दुःख का, वेदों का तथा इस लोक और परलोक का परित्याग करके वह परमात्मा का ही चिन्तन करे ॥ १३ ॥

अथैतेषामेव स्वैरचारिणां[2] किं तत्र प्रमाणम्? तत्राह—

बुद्धे क्षेमप्रापणम् ॥ १४

आत्मनि बुद्धेऽवगते सति तदेव ज्ञानं सर्वमशुभं प्रक्षाल्य क्षेमं प्रापयति। श्रूयते हि—

[3]'न कर्मणा वर्धते नो कनीयान्। तस्यैवात्मा पदवित्तं विदित्वा। न कर्मणा लिप्यते पापकेने'ति[3] 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति च ॥ स्मर्यते च—

[5]'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
ज्ञानाग्निस्सर्वकर्माणि भस्मसात्कुरुते तथा ॥ इति ॥ १४ ॥

---

१. म० स्मृ० ८. १०४
२. किंत्राणम् इति च० मु०
३. बृ० उ० ७. ४. २३. तै० ब्रा ३. १२. १४
४. छान्दो० ५. २४. ३
५. श्रीमद्भ. ग. ४. ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—आत्मा का ज्ञान प्राप्त करने पर वह मोक्ष (परम कल्याण) प्राप्त करता है ॥ १४ ॥

तदिदं निराकरोति—

तच्छास्त्रैर्विप्रतिषिद्धम् ॥ १५ ॥

यानि यतेरेव कर्तव्यप्रतिपादनपराणि शास्त्राणि, तैरेव तद्विप्रतिषिद्धम्। तत्र मनुः—

[1] क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत्।
सप्तद्वारावकीर्णां च न वाचमनृतां वदेत् ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥ इति

अतो यतिमेव प्रकृत्य यानि विहितानि कर्माणि तानि कर्तव्यानि। यानि च निषिद्धानि तानि च वर्जनीयानि ॥ १५ ॥

अनु०—किन्तु यह नियम शास्त्रों के विपरीत है ॥ १५ ॥

'बुद्धे क्षेमप्रापण' मित्येतत् प्रत्यक्षविरुद्धमित्याह—

बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत ॥ १६ ॥

आत्मबोधमात्रेण चेत् क्षेमं प्राप्यते, तदा इहैव शरीरे दुःखं नोपलभेत ज्ञानी। न चैतदस्ति। न हि ज्ञानिनां मूर्धाभिषिक्तंमन्योऽपि क्षुधादुःखःमेव तावत् क्षणमात्रमपि सोढुं प्रभवति ॥ १६ ॥

अनु०—यदि केवल आत्म के ज्ञान से मोक्ष की प्राप्ति होती हो तो आत्मज्ञ को इस लोक में भी किसी दुःख का अनुभव नहीं होना चाहिए ॥ १६ ॥

एतेन परं व्याख्यातम् ॥ १७ ॥

परलोके भवमपि दुःखमेतेन व्याख्यातं–न स्वैरचारिणां निवर्तत इति। तस्मात् कर्मभिः परिपक्वकषाय एव श्रवणमनननिदिध्यासनैः साक्षात्कृतात्मस्वरूपः प्रतिषिद्धेषु कटाक्षमप्यनिक्षिपन्नष्टाङ्गयोगनिरतो मुच्यत इति*। अत्र बोधायनः[2]—'एकदण्डी त्रिदण्डी वे'ति। गौतमः[3]—'मुण्डश्शिखी वे'ति ॥

अनु०—इसलिए आगे आने वाले आश्रम का विधान किया गया है ॥ १७ ॥

---

* एतच्चिह्नानन्तरं अत्र यदुदाहृतं 'ज्ञानेन सर्वं दह्यत' इति तत्र ज्ञानदशायाः प्रागार्जितानि कर्माणि प्रायश्चितेन ज्ञानेन वा दह्यन्त इत्युच्यते, न पुनर्ज्ञानदशायां स्वैरचारोऽनुज्ञायते। यस्य हि स्वशरीरेऽपि बीभत्सा स कथं पश्वादिभिरविशेषस्त्रीसङ्गमादौ प्रवर्तत''इति भागः क. पुस्तक एवास्ति अधिकपाठतया परिगणितः च.पुस्तके टिप्पण्याम्

१. म० स्मृ० ६. ४८, ५०   २. बौ० ध० २. २. १०. ४०   ३. गौ० ध० ३. २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ वानप्रस्थः ॥ १८ ॥

अनन्तरं वानप्रस्थाश्रम उच्यते ॥ १८ ॥

अनु०--अब वानप्रस्थ के नियमों की व्याख्या की जाती है ॥ १८ ॥

अत एव ब्रह्मचर्यवान् प्रव्रजति ॥ १९ ॥

प्रव्रजति प्रकर्षेण व्रजति अपुनःप्रवेशाय वनं प्रतिष्ठित इति । तथा च गौतमः [1]—'ग्रामं च न प्रविशेदि'ति । गतमन्यत्, उत्तरं च ॥ १९ ॥

अनु०—ब्रह्मचर्य के नियमों का पालन करने वाला व्यक्ति ही वन में प्रवेश करता है । ॥ १९ ॥

तस्योपदिशन्त्येकाग्निरनिकेतस्स्यादशर्माऽशरणो मुनिःस्वाध्याय एवोत्सृजमानो वाचम् ॥ २० ॥

कः पुनरेकोऽग्निः ? न तावदौपासनः, ब्रह्मचारित्वात् । तस्माल्लौकिकेऽग्नौ यथापूर्वं सायंप्रातस्समिध आदध्यादित्यर्थो विवक्षितः ।

अपरं आह—'श्रामणकेनाग्निमाधाये' ति गौतमः । अस्यार्थः—श्रामणकं नाम वैखानससूत्रम् । तदुक्तेन प्रकारेण एकोऽग्निराधेयः । तस्मिन् सायंप्रातरग्निकार्यमिति । [2]तथा च बौधायनः—'वानप्रस्थो वैखानसशास्त्रसमुदाचारो, वैखानसो वने मूलफलाशी तपश्शीलस्सवनेषूदकमुपस्पृशन् श्रामणकेनाऽग्निमुपसमाधाये' त्यादि । अन्यद्गतम् ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकविंशी कण्डिका ॥ २१ ॥

अनु०—वानप्रस्थ के लिए इन नियमों का विधान किया गया है । केवल एक अग्नि प्रज्वलित करे, घर में न रहे, किसी सुख का भोग न करे, किसी शरण में न रहे, मौन रहे' केवल दैनिक अध्यवसाय के समय बोले । २० ॥

तस्याऽऽरण्यमाच्छादनं विहितम् ॥ १ ॥

अरण्ये भवमारण्यमजिनवल्कलादि ॥ १ ॥

अनु०--उसके लिए वन में प्राप्य (मृगचर्म या वल्कल) वस्त्र ही विहित है ॥१॥

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेत् ॥ २ ॥

ततो मूलादिभिर्वर्तयन् वृत्तिः प्राणयात्रा तां कुर्वंश्चरेच्चरणशीलः स्यात् ॥२॥

अनु०—तब मूलों, फलों, पत्तों और तिनकों आदि से जीविका निर्वाह करते हुए भ्रमण करे ।

---

१. गौ० ध०३. ३३

२. तथा च बौधायनः इत्यादिग्रन्थो नास्ति ङ च० पुस्तकयोः । बौ.ध०२.६.१६१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्ततः प्रवृत्तानि ॥ ३ ॥

मूलादिभिः स्वयंगृहीतैः कञ्चित्कालं वर्तयित्वा अन्ततः अन्ते प्रवृत्तानि स्वयमेव पतितानि अभिनिश्रयेदिति वक्ष्यमाणेन सम्बन्धः। तान्यभिनिश्रित्य तैर्वर्तयेदिति ॥ ३ ॥

अनु०—और अन्त में स्वयं गिरे हुए फलों, पत्तों आदि का ही भक्षण करके रहे ॥ ३ ॥

ततोऽपो वायुमाकाशमित्यभिनिश्रयेत् ॥ ४ ॥

ततः कियन्तञ्चित्कालमब्भक्षः ततो वायुभक्षः तत आकाशमभिनिश्रयेत् न किञ्चित् भक्षयेदिति । अभिनिश्रयणं सेवनम् ॥ ४ ॥

अनु०—तब कुछ दिन तक केवल जल पीकर जीवन धारण करे, फिर कुछ समय तक केवल वायु का सेवन करके रहे और फिर केवल आकाश का ही सेवन करे ॥ ४ ॥

तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः ॥ ५ ॥

संयुज्यते संश्रयत इति संयोगः । तेषां मूलादीनां मध्ये उत्तरमुत्तरं समाश्रयणं फलतो विशिष्टमिति द्रष्टव्यम् ॥ ५ ॥

अनु०—इनमें से प्रत्येक उत्तरवर्ती पदार्थ का सेवन करके जीविका निर्वाह करने का अधिकाधिक पुण्यफल होता है ॥ ५ ॥

अथ वानप्रस्थस्यैवाऽऽनुपूर्व्यमेक उपदिशन्ति ॥ ६ ॥

अथेति पक्षान्तरोपन्यासे । पूर्वं ब्रह्मचर्यादेव वनप्रवेश उक्तः । एके त्वाचार्यास्तस्यैव वानप्रस्थस्याऽऽनुपूर्व्यं कर्मोपदिशन्ति ॥ ६ ॥

अनु०—कुछ आचार्यों का मत है कि केवल वानप्रस्थ के लिए अन्य आश्रमों के कर्मों को क्रमानुसार करना चाहिए ॥ ६ ॥

टि०—पहले यह विचार व्यक्त किया जा चुका है कि वानप्रस्थ ब्रह्मचर्याश्रम के बाद ही ग्रहण किया जा सकता है, किन्तु यह सूत्र एक नया मत प्रस्तुत करता है जिसके अनुसार वानप्रस्थ के लिए आश्रमों की अनुपूर्वता का उपदेश किया गया है ॥ ६ ॥

कथम् ?—

विद्यां समाप्य दारं कृत्वाऽग्नीनाधाय कर्माण्यरभते सोमावराध्यानि ते यानि श्रूयन्ते ॥ ७ ॥

ब्रह्मचर्ये स्थितो विद्यां समाप्य गृहस्थश्च भूत्वाऽग्नीनाधाय कर्माणि कुर्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कानि ? सोमावराध्यानि अवरार्धं पश्चार्धं तत्र भवोऽवरार्ध्यः सोमः अवरार्ध्यो येषां तानि सोमावराध्यानि सोमान्तानि हविर्यज्ञाख्यानि चातुर्मास्यादीन् हविर्यज्ञान् सोमं चेत्यर्थः। यानि श्रूयन्ते श्रुतौ विहितानि ॥ ७ ॥

अनु०—वेद का अध्ययन समाप्त करके, विवाहोपरान्त गृहस्थ होकर तथा अग्नि का आधान कर सोमयज्ञ तक के वे सभी कर्म करे जो श्रुति में उपदिष्ट हैं ॥७॥

गृहान् कृत्वा सदारस्सप्रजस्सहाग्निभिर्बहिर्ग्रामाद्वसेत् ॥ ८ ॥

अथ ग्रामाद्बहिररण्ये गृहान् कृत्वा सकुटुम्बस्सहैव चाग्निभिर्ग्रामाद्बहिर्वसेत्। अस्मिन्पक्षे प्रागुक्तमेकाग्निरित्येतन्नाऽस्ति ॥ ८ ॥

अनु०—ग्राम से बाहर वन में एक घर बनाकर वहाँ पत्नी, पुत्र-पुत्रियों तथा अग्नि के साथ निवास करे ॥ ८ ॥

एको वा ॥ ९ ॥

अथवा पुत्रेषु भार्यां निक्षिप्य स्वयमेक एव वसेत्। अस्मिन् पक्षे 'प्राजापत्यां निरुप्येष्टि'मिति परिव्राज उक्तेन न्यायेन श्रौतानग्नीनात्मनि समारोप्य श्रामणकेनाऽग्निमाधाय एकाग्निर्भवेत् ॥ ९ ॥

अनु०—अथवा अकेले ही रहे ॥ ९ ॥

सिलोञ्छेन वर्तयेत् ॥ १० ॥

व्याख्यातः सिलोञ्छः। तेन वर्तयेत् प्राणयात्रां कुर्यात्। इदं सकुटुम्बस्य एकाकिनश्च साधारणम्। एकाकिन एवेत्यन्ये ॥ १० ॥

अनु०—खेतों में गिरे हुए अन्न बीनकर अपने जीवन का पोषण करे ॥ १० ॥

न चाऽत ऊर्ध्वं प्रतिगृह्णीयात् ॥ ११ ॥

यदा सिलोञ्छेन वृत्तिर्जाता अत ऊर्ध्वं न कुतश्चिदपि प्रतिगृह्णीयात् ॥११॥

अनु०—उस समय से किसी प्रकार का दान न ग्रहण करे ॥ ११ ॥

अभिषिक्तश्च जुहुयात् ॥ १२ ॥

यदा जुहुयात्तदा अभिषिक्तः स्नातः। अनुवादोऽयं स्नाने विशेषं विधातुम् ॥ १२ ॥

अनु०—स्नान करने के बाद हवन करे ॥ १२ ॥

शनैरपोऽभ्युपेयादभिघ्नन्नभिमुख आदित्यमुदकमुपस्पृशेत् ॥ १३ ॥

शनैरवेगेन जलाशयं प्रविशेत्। प्रविश्य चाऽभिघ्नन् हस्तेनोदकं ताडयन् उदकमुपस्पृशेत् स्नायात् आदित्याभिमुखः ॥ १३ ॥

अनु० बिना वेग के शनैः जल में प्रवेश करे और जल को हाथ से पीटे बिना सूर्य की ओर मुख करके स्नान करे ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'इति सर्वत्रोदकोपस्पर्शनविधिः ॥ १४ ॥

सर्ववर्णाश्रमसाधारणमेतत् । तथाचोत्तरत्र तस्य ग्रहणम् ॥ १४ ॥

अनु०– स्नान करने की यह विधि सभी वर्णों और आश्रमों के लिए सामान्य समझनी चाहिए ॥ १४ ॥

तस्य द्वन्दद्रव्याणामेक उपदिशन्ति पाकार्थं भोजनार्थं वासिपरशुदात्रकाजानाम् ॥ १५ ॥

यानि पाकार्थानि ताम्रभाण्डादीनि । यानि च भोजनार्थानि कांस्यादीनि । वासिर्दर्व्यादि । तेषां सर्वेषां वास्यादीनां चतुर्णा[2]मेकैकस्य द्वे द्वे द्रव्ये उत्पाद्ये इत्येक उपदिशन्ति । काजमपि वास्यादिवदुपकरणविशेषो दारुमयः ॥ १५ ॥

अनु०—कुछ आचार्यों का मत है कि भोजन पकाने तथा खाने के पात्रों के तथा काटने के औजार, फरसा, हँसिया तथा काज नाम के हथियारों में प्रत्येक के जोड़े बनवाये ॥ १५ ॥

द्वन्दानामेकैकमादायेतराणि दत्वाऽरण्यमवतिष्ठेत ॥ १६ ॥

तेषां पाकादिसाधनानां द्रव्याणामेकैकं द्रव्यं स्वयमादायेतराणि भार्यायै दत्वा अरण्यमवतिष्ठेत उपतिष्ठेत् आश्रयेदिति ॥ १६ ॥

अनु०—(इन पात्रों और औजारों के) जोड़ों में से एक को लेकर दूसरे को अपनी पत्नी को देकर वन को प्रस्थान करे ॥ १६ ॥

तस्याऽऽरण्येनैवाऽत ऊर्ध्वं होमो वृत्तिः प्रतीक्षाच्छादनं च ॥ १७ ॥

तस्या वानप्रस्थस्याऽतोऽरण्यप्रवेशादूर्ध्वं आरण्येनैव नीवारादिना होमः वृत्तिः प्राणयात्रा प्रतीक्षा अतिथिपूजा च आच्छादनं वल्कलादिना ॥ १७ ॥

अनु०—उसके बाद वन की वस्तुओं से ही होम कर्म करे, अपना जीवननिर्वाह करे, अतिथियों का सत्कार करे तथा शरीर का आच्छादन करे ॥ १७ ॥

येषु कर्मसु पुरोडाशाश्चरवस्तेषु कार्याः ॥ १८ ॥

येषु दर्शपूर्णमासादिषु पुरोडाशा विहिताः गृहस्थस्य, तेष्वस्य तत्स्थाने[3] चरवः कार्याः ॥ १८ ॥

अनु०--(गृहस्थाश्रम के) जिन कर्मों के लिए (मांसमिश्रित) पुरोडाश का विधान किया गया है उन कर्मों में पुरोडाश के स्थान पर (चावल से सिद्ध) चरु का प्रयोग करे ॥ १८ ॥

---

१. 'इति विधिः' इत्येव सूत्रम् च्छ० पु. २. एकैकस्यां विधायां इति च० पु०

३. अनवस्रावितान्तरूष्मपक्वतण्डुलप्रकृतिकश्चरुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वं चोपांशु सह स्वाध्यायेन ॥ १९ ॥

सर्वं च कर्मकाण्डं साङ्गं प्रधानमुपांशु भवति पारायणब्रह्मयज्ञाध्ययनेन सह । तदप्युपांशु कर्तव्यमिति ॥ १९ ॥

अनु०—सभी मन्त्रों का तथा दैनिक स्वाध्याय का पाठ इस प्रकार करे कि वह दूसरों को न सुनाई पड़े ॥ १९ ॥

नाऽऽरण्यमभ्याश्रावयेत् ॥ २० ॥

उपांशुवचनादेव सिद्धवचनमाभिमुख्यप्रतिषेधार्थम् । तेनाऽरण्यस्था यथा नाऽऽभिमुख्येन शृणुयुः तावदुपांशिवति ॥ २० ॥

अनु०—वन के निवासियों को अपने मन्त्रों का पाठ न सुनावे ॥ २० ॥

अग्न्यर्थं शरणम् ॥ २१ ॥

शरणं गृहं तदग्न्यर्थमेव ॥ २१ ॥

अनु०—केवल अग्नि की रक्षा के लिए ही एक गृह बनावे ॥ २१ ॥

आकाशे स्वयम् ॥ २२ ॥

स्वयं चाऽऽकाश एव वसेत् ॥ २२ ॥

अनु०—स्वयं खुले हुए स्थान में ही रहे ॥ २२ ॥

अनुपस्तीर्णे शय्यासने ॥ २३ ॥

शयनं चाऽऽसनं चाऽनुपस्तीर्णे देशे कुर्यात् न तु किञ्चिदुपस्तीर्य ॥ २३ ॥

अनु०—उसकी शय्या और आसन पर किसी प्रकार का आच्छादन न होवे ॥ २३ ॥

नवे सस्ये प्राप्ते पुराणमनुजानीयात् ॥ २४ ॥

नवे धान्ये श्यामाकनीवारादौ प्राप्ते जाते पुराणं पूर्वसञ्चितं सस्यमनुजानियात् परित्यजेत् । तत्र मनुः—

"त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसञ्चितम् ।
जीर्णानि चैव वासांसि पुष्पमूलफलानि च ॥" इति ॥ २४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने द्वाविंशी कण्डिका ॥ २२ ॥

अनु०—नया अन्न प्राप्त करने पर पुराने संचित अन्न का परित्याग करे ॥२४॥

———

१. म० स्मृ० ६. २५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूयांसं वा नियममिच्छन्नन्वहमेव पात्रेण सायंप्रातरर्थमाहरेत् ।

इदमेकाकिनो वानप्रस्थस्य । भूयांसं नियममिच्छन्न सस्यं सञ्चिनुयात् । किं तर्हि ? अन्वहमे'व पात्रेण येनकेनचित् सायंप्रातश्चाऽर्थमशनीयमात्रमाहरेत् वानप्रस्थेभ्य एव ॥ १ ॥

अनु०—यदि वानप्रस्थ और अधिक कठोर नियम का पालन करना चाहे तो (अन्न का संचय न करे) प्रतिदिन सायं तथा प्रातःकाल केवल अपने भिक्षापात्र में खाने भर का भोजन एकत्र करे ॥ १ ॥

एवं कियन्तचित्कालं वर्तयित्वा—

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेदन्ततः प्रवृत्तानि ततोऽपो वायुमाकाशमित्यभिनिश्रयेत् । तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः ॥ २ ॥

सर्वं गतम् ॥ २ ॥

अनु०—उसके बाद अपने जीवन का पोषण एकत्र किए गए मूलों से, फलों से, पत्तों और तिनकों से करता हुआ भ्रमण करे । अन्त में स्वयं प्राप्त हुए मूलों, फलों, और तृणों से जीवन धारण करे, तत्र क्रमशः जल, वायु तथा आकाश का सेवन करे । इनमें क्रमशः बाद वाले पदार्थ का सेवन कर जीवननिर्वाह करने से उत्तरोत्तर अधिक पुण्यफल की सिद्धि होती है ॥ २ ॥

निरूपिता आश्रमाः । अथेदानीं पक्षप्रतिपक्षरूपेण तेषामेव प्राधान्यमप्राधान्यं च निरूप्यते—

अथ पुराणे श्लोकावुदाहरन्ति—

अष्टाशीतिसहस्राणि ये प्रजामीषिर ऋषयः । दक्षिणेनाऽर्यम्णः पन्थानं ते श्मशानानि भेजिरे ॥ ३ ॥

अष्टाशीतिसहस्राणि ये गृहस्था ऋषयः प्रजामीषिरे प्रजातिमभ्यनन्दन् ते अर्यम्णो यो दक्षिणेन पन्थाः दक्षिणायनमार्गः तं प्राप्य छान्दोग्योक्तेन [1]धूमादिमार्गेण गत्वा पुनरपि सम्भूय श्मशानानि भेजिरे मरणं प्रतिपेदिरे । जायस्व म्रियस्वेत्याजीवं जीवभावमापेदिर इति गृहस्थानां निन्दा ॥ ३ ॥

अनु०—इस सन्दर्भ में पुराण से भी दो श्लोक उद्धृत किये जाते हैं । वे अस्सी हजार ऋषि, जो सन्तान चाहते थे, सूर्य के दक्षिण के मार्ग से गये और श्मशान में पहुँचे ॥ ३ ॥

---

१. छा० उ० ५. १०. ३–६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषयः । उत्तरेणाऽर्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते ॥ ४ ॥

ये [1]तु प्रजातिं नाभ्यनन्दन् ते उत्तरायणमार्गेण [2]अर्चिरादिमार्गेण गत्वा अमृतत्वं विभक्तिव्यत्ययः, अमृतत्वाय कल्पते वचनव्यत्ययः कल्पन्ते समर्था-स्सम्पद्यन्ते ॥ ४ ॥

अनु०—अस्सी हजार ऋषि जो सन्तान के इच्छुक नहीं थे, सूर्य के उत्तर के मार्ग से गये और उन्होंने अमरत्व प्राप्त किया ॥ ४ ॥

इत्यूर्ध्वरेतसां प्रशंसा ॥ ५ ॥

गृहस्थादन्ये त्रयोऽपि ऊर्ध्वरेतसः तेषामेषा प्रशंसेति ॥ ५ ॥

अनु०—इस प्रकार ऊर्ध्वरेता ब्रह्मचर्यपालन करने वालों की प्रशंसा की गयी है ॥ ५ ॥

पुनरपि तेषामेव प्रकारान्तरेण प्रशंसा—

अथाऽपि सङ्कल्पसिद्धयो भवन्ति ॥ ६ ॥

अथाऽपि अपि च सङ्कल्पादेव सिद्धयो भवन्ति तेषामूर्ध्वरेतसाम् ॥ ६ ॥

अनु०—ऊर्ध्वरेता तपस्वियों की इच्छाएँ उनके संकल्प से ही सिद्ध हो जाती हैं ॥ ६ ॥

तत्रोदाहरणम्—

यथा वर्षं प्रजा दानं दूरेदर्शनं मनोजवता यच्चाऽन्यदेवंयुक्तम् ॥७॥

यदि महत्यामनावृष्टौ [3]सत्यां 'वर्षतु देव' इति ते कामयेरन् तदा कामवर्षी पर्जन्यो भवति। यदि वा कञ्चिदपुत्रमनुगृह्णीयुः—पुत्रोऽस्य जायतामिति स पुत्रवानेव भवति। यदि वा [4]चोलेष्ववस्थितास्तदैव हिमवन्तं दिदृक्षेरन् तथैव तद्भवति। मनस इव जवो येषां ते मनोजवाः तेषां भावो मनोजवता। यदि कामयेरन् अमुं देशमियत्यामेव कालकलायां प्राप्नुयामेति, ततो यावता कालेन मनस्तं देशं प्राप्नुयुरिति। यच्चान्यदेवंयुक्तम् रोगिणामारोग्यादि तदपि सङ्कल्पा-देव तथा भवति ॥ ७ ॥

अनु०—जैसे वर्षा कराने, पुत्रोत्पत्ति का अमोघ आशीर्वाद, किसी भी प्रकार की वस्तु का दान, दूर तक देखने की दृष्टि, मन के समान वेग से विचरण करने की शक्ति, तथा इसी प्रकार की दूसरी इच्छाओं की सिद्धि संकल्प से ही हो जाती है ॥७॥

---

१. प्रजां० इति० च० पु०   २. छा० उ० ५. १०. १,२

३. सत्यां इति नास्ति च० पु०   ४. 'दूरेषु' इति० छ० पु०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मादेवम्—

तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानाश्रमानेतानेके ब्रुवते ।

तस्माच्छ्रुतितः 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'त्यादिश्रुत्यनुगतत्वादुक्तेन-प्रकारेण प्रत्यक्षफलत्वाच्च एतानूर्ध्वरेतसामाश्रमान् विशिष्टान् गार्हस्थ्यादुत्कृष्टा-नेके ब्रुवत इति ॥ ८ ॥

अनु०—इस कारण श्रुति के वचन के अनुसार तथा प्रत्यक्ष फल उत्पन्न होने से कुछ धर्मज्ञ लोग ऊर्ध्वरेता तपस्वियों के आश्रमों को सबसे उत्कृष्ट बताते हैं ॥८॥

तदिदं गार्हस्थ्योत्कर्षप्रतिपादनेन निराकरोति—

त्रैवृद्यविद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसम्बन्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यन्ते ॥ ९ ॥

त्र्यवयवा विद्या त्रिविद्या त्रयो वेदाः । तां ये पाठतश्चाऽर्थतश्च विदन्ति ते त्रैविद्याः । तेषु पक्वज्ञानास्त्रैविद्यवृद्धाः । तेषां[1] वेदशास्त्रविदां वेदा एव प्रमाणम् अतीन्द्रियेऽर्थ इति, निष्ठा निर्णयः । यथाह भगवान् जैमिनिः—[2]'चोदनालक्षणोऽर्थो धर्मः, इति[3] प्रत्यक्षमनिमित्तमि'ति च । ततश्च तत्र वेदे यानि कर्माणि श्रूयन्ते, किंलक्षणानि ? व्रीहियवादिभिस्सम्बद्धानि "उच्चैः ऋचा क्रियते, उपांशु यजुषे"त्येवंप्रकाराणि तैर्विरुद्ध आचारः प्रमाणं न भवतीति मन्यन्ते । एतदुक्तं भवति—सर्वेषु वेदेषु सर्वासु च शाखासु अग्नि-होत्रादीनि[4] विश्वसृजामयनपर्यन्तानि कर्माण्येव तात्पर्यतया विधीयन्ते । अतो गार्हस्थ्यमेव श्रेष्ठम् । ऊर्ध्वरेतसां त्वाश्रमास्तद्विरुद्धा नैवाऽऽश्रयणीयाः यदि वेदाः प्रमाणमिति । तथा च गौतमः—'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षवि-धानात् गार्हस्थ्यस्ये'ति । एवं गार्हस्थ्यं प्रशस्यते ॥ ९ ॥

अनु०—तीन प्रकार की विद्याओं के ज्ञाता विद्वानों का मत है कि वेद ही परम प्रमाण हैं, इस कारण वेदों में व्रीहि, यव, यज्ञ पशु, आज्य, दुग्ध, खप्पर से तथा पत्नी के साथ उच्च या मन्द स्वर से मन्त्रों के पाठ करते हुए जिन कर्मों के करने का विधान है उन्हें ही करना चाहिए और इस कारण उनके विपरीत आचरण का निर्देश करने वाले नियम को वे लोग प्रमाण नहीं मानते हैं ॥ ९ ॥

---

१. वेदशास्त्रार्थविदां इति छ० पु० २. जै० सू १. १. २ ३. जै सू० १. १. ४
४. सहस्रवत्सरसाध्यं सत्रं विश्वसृजामयनम् । अत्र संवत्सरशब्दो दिनपर इति मीमांसकाः । पू० मी० ६. ७. १३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्मशानानि भेजिर इति निन्दां परिहरति—

यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते ॥१०॥

यत्तु गृहस्थानां श्मशानं श्रूयते स एष नानाकर्मणामग्निहोत्रादीनामन्ते पितृमेधाख्यः पुरुषसंस्कारो विधीयते। न तु पिशाचा भूत्वा श्मशानमेव सेवन्त इति ॥ १० ॥

अनु०—ऊपर जो श्मशान शब्द का प्रयोग किया गया है उसका अभिप्राय यह है कि अनेक प्रकार के अग्निहोत्रादि कर्म करने वालों के लिए पितृमेध नाम का अन्तिम संस्कार किया जाता है (यह अर्थ नहीं है कि वे लोग पिशाच बनकर श्मशान में ही चक्कर काटते रह जाते हैं) ॥ १० ॥

कुत इत्याह—

ततः परमनन्त्यं फलं स्वर्ग्यशब्दं श्रूयते ॥ ११ ॥

ततः परं श्मशानकर्मणोऽनन्तरम्, अनन्त्यमपरिमितं स्वर्गशब्दवाच्यं फलं श्रूयते—'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकमेती'ति। अनन्त्यं स्वर्ग्यमिति [1]यकारश्छान्दसः उपजनः अपपाठो वा ॥ ११ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने त्रयोविंशी कण्डिका ॥ १३ ॥

अनु०—श्रुति में कहा गया है कि उस श्मशान कर्म के बाद अनन्त स्वर्ग का फल प्राप्त होता है ॥ ११ ॥

———

पुनरपि गार्हस्थ्यमेव प्रकारान्तरेण स्तौति—

अथाप्यस्य प्रजातिममृतमाम्नाय आह—प्रजामनु प्रजायसे तदु ते मर्त्याऽमृतमिति ॥ १ ॥

अथाऽपि अपि च अस्य गृहस्थस्य प्रजापतिं प्रजासन्तानम् अमृतम् अमरणम् आम्नायो वेद आह हे मर्त्य मरणधर्मन्! प्रजां जायमानामनु त्वं प्रजायसे त्वमेव प्रजारूपेण जायसे। तदेव ते मरणधर्मिणः अमृतममरणमिति। न त्वं म्रियसे, यतस्त्वं प्रजारूपेण तिष्ठसीति ॥ १ ॥

अनु०—इसके अतिरिक्त गृहस्थ की सन्तान को अमृत बताकर वेद ने कहा है: हे मरणधर्मा मनुष्यों, तुम अपनी सन्तान में पुनः उत्पन्न होते हो, अतः सन्तान ही तुम्हारे लिए अमरत्व है ॥ १ ॥

उपपन्नं चैतदित्याह—

अथाऽपि स एवाऽयं विरूढः पृथक्प्रत्यक्षेणोपलभ्यते दृश्यते चाऽपि

१. यकारोपजनश्छान्दसः इति भवितुं युक्तम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सारूप्यं देहत्वमेवाऽन्यत् ॥ २ ॥

अपि च स एवाऽयं पृथग्विरूढः प्रत्यक्षेणोपलभ्यते। स एव द्विधाभूत इव लक्ष्यते। दृश्यते हि सारूप्यं द्वयोः। देहमात्रं तु भिन्नम्। देहत्वमिति स्वार्थिकस्त्वः ॥ २ ॥

अनु०--अपरंच, यह प्रत्यक्ष देखा जा सकता है कि पिता ही दूसरा रूप धारण कर पुत्र के रूप में उत्पन्न दिखाई पड़ता है। उन दोनों में सारूप्य होता है, केवल शरीर ही भिन्न होता है ॥ २ ॥

यदि पुत्ररूपेणाऽवस्थानं, किमेतावतेत्याह--

ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां साम्परायेण कीर्तिं स्वर्गं च वर्धयन्ति ॥ ३ ॥

ते पुत्राश्शिष्टेषु चोदितेषु कर्मसु वर्तमाना अवस्थिताः पूर्वेषां पितृपितामहादीनां साम्परायेण परलोकेन सम्बद्धानां कीर्तिं स्वर्गं च वर्धयन्ति--अस्याऽयं पुत्र एवं कर्मा, अस्याऽयं पौत्र इति। स्वर्गं च वर्धयन्ति। कीर्तिमतां हि स्वर्गवासश्श्रूयते ॥ ३ ॥

अनु०--जो पुत्र वेदोक्त शिष्ट कर्मों का सम्पादन करते हुए जीवन व्यतीत करते हैं वे अपने दिवंगत पूर्वजों के यश तथा स्वर्गीय सुख की अभिवृद्धि करते हैं ॥ ३ ॥

एवमवरोऽवरः परेषाम् । ४ ॥

एवमनेन प्रकारेण अवरोऽवरः परेषां कीर्तिं स्वर्गं च वर्धयति ॥ ४ ॥

अनु०--इस प्रकार प्रत्येक अगली पीढी अपनी पूर्ववर्ती पीढी के पुरुषों के सुख और यश को बढ़ाती है ॥ ४ ॥

आभूतसम्प्लवात्ते स्वर्गजितः ॥ ५ ॥

भूतसम्प्लवो महाप्रलयः। आ तस्मात्ते पुत्रिणस्स्वर्गजितो भवन्ति ते च ॥५॥

अनु०—इस प्रकार वे पुत्रवाले दिवंगत पुरुष महाप्रलय तक स्वर्ग में निवास करते हैं और स्वर्ग के जेता होते हैं ।। ५ ॥

पुनस्सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ॥६।

प्रलयानन्तरं सर्गः, तत्र संसारस्य बीजार्थाः प्रजार्थाः प्रजापतयो भवन्तीति भविष्यत्पुराणे श्रूयते ॥ ६ ॥

अनु०—प्रलय के बाद वे ही पुनः संसार की उत्पत्ति के बीज (प्रजापति) होते हैं ऐसा भविष्यपुराण में कहा गया है ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाऽपि प्रजापतेर्वचनम् ॥ ७ ॥

अपि च प्रजापतेरपि वाक्यमस्मिन्नर्थे भवति । गार्हस्थ्यमेव वरिष्ठमिति ॥ ७ ॥

अनु०—इस सन्दर्भ में प्रजापति का यह वचन भी उल्लेखनीय है ॥ ७ ॥

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन्निति ।

त्रयीं विद्यां त्रयाणां वेदानामध्ययनम् । ब्रह्मचर्यमष्टाचत्वारिंशदादिकम् । प्रजातिं प्रजोत्पादनम् । श्रद्धामास्तिक्यम् । तप उपवासादि । यज्ञमग्निहोत्रादिकं सोमयागान्तम् । अनुप्रदानं अन्तर्वेदि बहिर्वेदि च दानम् । य एतानि कर्माणि कुर्वते, तैरित् तैरेव सह वयं स्मः त एवाऽस्माकं सहायाः । अन्यत्तु ऊर्ध्वरेतसामाश्रमादिकं प्रशंसन् पुरुषो रजः पांसुर्भूत्वा ध्वंसते नश्यति । इतिशब्दो वचनसमाप्त्यर्थः । यथैवं तर्हि शिष्टेषु वर्तमानाः पुत्राः पूर्वेषां कीर्तिं स्वर्गं च वर्धयन्ति, तथा प्रतिषिद्धेषु वर्तमाना अकीर्तिं नरकं च वर्धयेयुः ॥ ८ ॥

अनु०—जो निम्नलिखित कर्मों का सम्पादन करते हैं वे हमारे साथ निवास करते हैं, तीनों वेदों का अध्ययन, ब्रह्मचर्य, सन्तानोत्पत्ति, श्रद्धा, तप, यज्ञ, तथा दान । जो इन कर्मों से भिन्न कर्म करते हैं वे धूल में मिलकर नष्ट हो जाते हैं ॥ ८ ॥

तत्राऽऽह—

तत्र ये पापकृतस्त एव ध्वंसन्ति यथा पर्णं वनस्पतेर्न परान् हिंसन्ति ॥ ९ ॥

तत्र प्रजासन्ताने ये पापस्य कर्तारः, त एव ध्वंसन्ते न परान् पित्रादीन् हिंसन्ति । यथा यदेव पर्णं वनस्पतेः कीटादिभिर्दूषितं तदेव पतति, न वनस्पतिं शाखान्तरं वा पातयति तद्वत् ॥ ९ ॥

अनु०—जो पुत्र पापकर्म करते हैं केवल वे ही नष्ट होते हैं, उनके पिता आदि दूसरे व्यक्ति नष्ट नहीं होते, जिस प्रकार वृक्ष के पत्तों को ही कीड़े आदि नष्ट करते हैं, वृक्ष या शाखा आदि को नष्ट नहीं करते ॥ ९ ॥

एतदेवोपपादयति—

नाऽस्याऽस्मिल्लोके कर्मभिस्सम्बन्धो विद्यते तथा परस्मिन् कर्मफलैः ॥ १० ॥

अस्येति सामान्यापेक्षमेकवचनम् । अस्य पित्रादेः पूर्वपुरुषस्य अस्मिन् लोके पुत्रकृतैः कर्मभिः सम्बन्धो न विद्यते । दृष्टान्तोऽयम् । यथा पुत्रकृतेषु कर्मसु पित्रादेः कर्तृत्वं नाऽस्ति, तथा परस्मिन्नपि लोके कर्मफलैरपि सम्बन्धो नाऽस्तीत्यर्थः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—इस लोक में पूर्वज का अपने वंश में उत्पन्न पुत्रादि द्वारा किये गये कर्मों से कोई सम्बन्ध नहीं होता और न परलोक में उनके कर्मों के फल से ही कोई सम्बन्ध होता है ॥ १० ॥

तदेतेन वेदितव्यम् ॥ ११ ॥

यदुक्तं ये पापकृतस्त एव ध्वंसन्ति न परान् हिंसन्तीति तदर्थरूपमेतेन वक्ष्यमाणेन हेतुना वेदितव्यम् ॥ ११ ॥

अनु०—इसे निम्नलिखित कारण से जाना जा सकता है ॥ ११ ॥

प्रजापतेर्ऋषीणामिति सर्गोऽयम् ॥ १२ ॥

प्रजापतेर्हिरण्यगर्भस्य ऋषीणां च मरीच्यादीनामयं सर्गो देवादिस्तिर्यगन्तः । ते चाऽध्वस्ता एव स्वे स्वे पदे वर्तन्ते । यदि च पुत्राः पापकृतः स्वयं ध्वंसमानाः परानपि ध्वंसयेयुः, तदैतन्नोपपद्यते—पुण्यकृतः सुखेनाऽद्यापि वर्तन्ते इति ॥ १२ ॥

अनु०—यह सृष्टि प्रजापति तथा ऋषियों की है ॥ १२ ॥

अत्रोदाहरणमाह—

तत्र ये पुण्यकृतस्तेषां प्रकृतयः परा ज्वलन्त्य उपलभ्यन्ते ॥ १३ ॥

तत्र स्वर्गे ये पुण्यकृतो वसिष्ठादयस्तेषां प्रकृतयश्शरीराणि परा उत्कृष्टाः ज्वलन्त्यः दीप्यमाना उपलभ्यन्ते, दिवि यथा सप्तर्षिमण्डलम् । श्रूयते च[1] 'सुकृतां वा एतानि ज्योतींषि, यन्नक्षत्राणी'ति । इदमपि प्रमाणं न पुत्राणां ध्वंसे पूर्वेषां प्रध्वंस इति ॥ १३ ॥

अनु०—जो ऋषि अपने पुण्यकर्मों के कारण स्वर्ग में निवास करते हैं उनके शरीर आकाश में अत्यधिक प्रकाशपूर्ण दिखाई पड़ते हैं (जैसे सप्तर्षिमण्डल) ॥ १३ ॥

स्यात्तु कर्मावयवेन तपसा वा कश्चित्सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसिद्धिश्च स्यान्न तु तज्ज्यैष्ठ्यमाश्रमाणाम् ॥ १४ ॥

कर्मावयवेन पूर्वार्जितानां कर्मणामेकदेशेन भुक्तशेषेण तपसा वा तीव्रेण कश्चिदूर्ध्वरेतास्सहशरीरेणाऽन्तवन्तं लोकं जयतीति यत्तत् स्यात् सम्भवेदपि । यच्च सङ्कल्पादेव सिद्धिस्स्यादिति, तदपि स्यात् न तु तदाश्रमाणां ज्यैष्ठ्यकारणमिति । तदेव 'मैकाश्रम्यं त्वाचार्या' इत्ययमेव पक्षः स्थापितः । अन्ये मन्यन्ते—

१. तै० सं० ५. ५. १

आ० ध० २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वे आश्रमा दूषिता भूषिताश्च । ततस्तेषु सर्वेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीत्येतदेव स्थितमिति ॥ १४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने चतुर्विंशी कण्डिका ॥ १७ ॥

अनु०—किन्तु यद्यपि कोई व्यक्ति पूर्वजन्मों से उत्पन्न पुण्यफलों के कारण अथवा अपनी तपस्याओं के कारण शरीर धारण करते हुए भी स्वर्ग प्राप्त कर सकता है, संकल्प से सभी इच्छाओं को सिद्ध कर सकता है, फिर भी ये फल एक आश्रम का दूसरे आश्रमों से श्रेष्ठ मानने के कारण नहीं माने जा सकते ॥ १४ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायां
उज्ज्वलायां द्वितीयप्रश्ने नवमः पटलः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ दशमः पटलः

व्याख्यातास्सर्ववर्णानां साधारणवैशेषिका धर्मा राज्ञस्तु विशेषाद्वक्ष्यामः ॥ १ ॥

उक्तवक्ष्यमाणसङ्कीर्तनं श्रोतृबुद्धिसमाधानार्थम्। अहिंसासत्यास्तेयादयः सर्ववर्णानां साधारणधर्माः। अध्ययनादयस्त्रयाणाम्। अध्यापनादयो ब्राह्मणस्य। युद्धादयः क्षत्रियस्य। कृष्यादयो वैश्यस्य। शुश्रूषा शूद्रस्य। राजाऽत्राभिषिक्तो विविक्षितः। तस्यैव हि वक्ष्यमाणं धर्मजातं सम्भवति। तस्य विशेषाद्विशेषतो यद्वक्तव्यं तद्वक्ष्यामः। विशेषानिति द्वितीयान्तपाठस्तु युक्तः ॥ १ ॥

अनु०—सभी वर्णों के साधारण तथा विशेष कर्मों की व्याख्या कर दी गयी। अब हम राजा के कर्तव्यों का विशेष रूप से विवेचन करेंगे।। १ ॥

दक्षिणाद्वारं वेश्म तुरं च मापयेत् ॥ २ ॥

वेश्म गृहं पुरं नगरं तदुभयमपि दक्षिणाद्वारं मापयेत् कारयेत् स्थपत्यादिभिः। दक्षिणपार्श्वे द्वारं यस्य तत्तथोक्तम् ॥ २ ॥

अनु०—राजा इस प्रकार का नगर तथा प्रासाद बनवाये जिसके द्वारा उत्तर दिशा की ओर हों ॥ २ ॥

अन्तरस्यां पुरि वेश्म ॥ ३ ॥

सर्वेषामेव प्रकाराणां मध्ये या पूस्तस्यामन्तरस्यां पुरि वेश्म मापयेदात्मनः ॥ ३ ॥

अनु०—प्रासाद नगर के बीच में होना चाहिए ॥ ३ ॥

तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ॥ ४ ॥

तस्य वेश्मनः पुरस्तादवसथः कारयितव्यः। एत्य वसन्त्यस्मिन्नित्यावसथः आस्थानमण्डपः। तस्यामन्त्रणमिति संज्ञा[1] ॥ ४ ॥

अनु०—उस प्रासाद को आगे एक आवसथ भवन हो और उसे आमन्त्रण नाम दिया जाय ॥ ४ ॥

दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं सन्दृश्येत बहिरन्तरं चेति ॥ ५ ॥

दक्षिणेनेत्येनबन्तम्। पुरमिति[2] 'एनपा द्वितीये'ति द्वितीयान्तम्। पुरस्य दक्षिणतः अदूरे सभा कारयितव्या। दक्षिणोदग्द्वारा दक्षिणस्यामुत्तरस्यां च

१. तत्र ह्यतिथय आमन्त्र्यन्ते इत्यधिकः पाठः च. पु. २. पा. सू. १. ३. ३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिशि द्वारं यस्यास्सा तथोक्ता। किमर्थमुभयत्र द्वारमिति चेत्। यद्बहिर्वृत्तं यच्चाऽभ्यन्तरं तदुभयमपि यथा सन्दृश्येतेत्येवमर्थमिति। सैषा द्यूतसभा। तस्यां द्यूतार्थिनः प्रविशन्तीति तदायस्थानं राज्ञः॥ ५॥

अनु०—नगर से कुछ दूर दक्षिण की ओर सभाभवन बनवाये जिसके द्वार दक्षिण तथा उत्तर की ओर हों। तथा उसके भीतर और बाहर देखा जा सकता हो॥ ५॥

सर्वेष्वेवाऽजस्रा अग्नयस्स्युः॥ ६॥

वेश्मन्यावसथे सभायामित्येतेषु सर्वेष्वेव स्थानेषु लौकिका अग्नयोऽजस्राः स्युः। अविच्छेदेन धार्याः॥ ६॥

अनु०—इन तीनों स्थानों पर अग्नि निरन्तर प्रज्वलित रहे॥ ६॥

अग्निपूजा च नित्या यथा गृहमेधे॥ ७॥

तेषु चाग्निषु नित्यमग्निपूजा कार्या। यथा गृहमेधे औपासने सायंप्रातर्होम इत्यर्थः। मन्त्रावपि तावेव, द्रव्यमपि तदेव॥ ७॥

अनु०—इन अग्नियों ने नित्य हवन किया जाना चाहिए जैसे गृहस्थ नित्य होम कर्म करता है॥ ७॥

आवसथे श्रोत्रियावराध्यानतिथीन् वासयेत्॥ ८॥

आवसथाख्ये स्थाने अतिथीन् वासयेत्। ते विशेष्यन्ते श्रोत्रियावराध्या-निति। अवरपर्यायोऽवराध्यशब्दः। यदि सर्वान्वासयितुं न शक्नोति श्रोत्रियानपि तावद्वासयेदिति॥ ८॥

अनु०—आवसथ में अतिथियों को टिकाये और वे अतिथि कम से कम वेदों के विद्वान् अवश्य हों॥ ८॥

तेषां यथागुणमावसथाः शय्याऽन्नपानं च विदेयम्॥ ९॥

तेषामतिथीनां यथागुणं विद्यावृत्तानुगुणमावसथादि विदेयं विशेषेण देयम्। आवसथा अपवरकादयः। शय्या खट्वादयः। अन्नमोदनादि। पानं[1] तक्रादि॥ ९॥

अनु०—उन अतिथियों के गुणों के अनुसार उन्हें निवासस्थान, आसन, शय्या अन्न तथा पेय पदार्थ देना चाहिए॥ ९॥

गुरूनमात्यांश्च नातिजीवेत्॥ १०॥

गुरवः पित्रादयः। अमात्या मन्त्रिणः। तान्नाऽतिजीवेत् भक्ष्यभोज्याच्छादनादिषु तान्नाऽतिशयीत॥ १०॥

---

१. तक्रसूपादि इति च. पु. तक्रादिसूपादि इति क. पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—अपने गुरुओं तथा मन्त्रियों की अपेक्षा अधिक आराम का (भोजन, वस्त्र आदि की दृष्टि से उत्तम) जीवन न व्यतीत करे ॥ १० ॥

न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वाऽवसीदेदभावाद्बुद्धिपूर्वं वा कश्चित् ॥ ११ ॥

अस्य राज्ञो विषये राष्ट्रे क्षुधा आहाराभावेन बुभुक्षया रोगेण व्याधिना हिनेन नीहारेण वर्षादीनामप्युपलक्षणमेतत् । आतपः आदित्यरश्मितापः । एतैः प्रकारैरभावात् बुद्धिपूर्वं वा न कश्चिद्ब्राह्मणोऽप्यवसीदेत् अवसन्नो न स्यात् । राज्ञो ह्ययमपराधो यदाहाराद्यभावेन कश्चिदवसन्नः स्यात् । बुद्धिपूर्वं वेत्यत्रोदाहरणम्—यदा कश्चित् करमृणं वा दाप्यो भवति, तदा नाऽसौ हिमातपयोरुपनिवेशयितव्यः भोजनाद्वा निरोद्धव्यः । तथा कर्वाणं राजा दण्डयेदिति ।११।

अनु०—उसके राज्य में अभाव के कारण अथवा जानबूझकर किसी को भूख, रोग, शीत, ताप, आदि से कष्ट नहीं पहुँचना चाहिए ॥ ११ ॥

सभाया मध्येऽधिदेवनमुद्धत्याऽवोक्ष्याऽक्षान्निवपेद्युग्मान् वैभीतकान् यथार्थान् ॥ १२ ॥

पूर्वोक्तायाः सभाया मध्ये अधिदेवनं यस्योपरि कितवा अक्षैर्दीव्यन्ति तत्स्थानमधिदेवनम् । तत् पूर्वं काष्ठादिना उद्धन्ति उद्धत्याऽवोक्षति । अवोक्ष्य तत्राऽक्षान् युग्मसङ्ख्याकान्वैभीतकान् विभीतकवृक्षस्य विकारभूतान् यथार्थान् यावद्भिर्द्यूतं निर्वर्तते, तावतो निवपति । कः ? यस्तत्र राज्ञा नियुक्तः सभिको नाम ।१२।

अनु०—सभाभवन के मध्य में सभाध्यक्ष एक ऊँचा स्थान बनवावे, अपने हाथ को नीचे किये हुए उस पर जल छिड़के, उसपर युग्म संख्या में बिभीतक (काष्ठ) के बने हुए अक्ष (गोटियाँ) जितनी आवश्यक हों उतनी मात्रा में रखे ॥ १२ ॥

आर्याः शुचयस्सत्यशीला दीवितारस्स्युः ॥ १३ ॥

आर्याः द्विजातयः । [1]शुचयोऽर्थशुद्धाः । सत्यशीलास्सत्यवादिनः । एवंभूता एव पुरुषास्तत्र दीवितारः स्युः । त एव तत्र दीव्येयुरित्यर्थः । तेच तत्र देवित्वा यथाभाषितं पणं सभिकाय दत्वा गच्छेयुः । स च राज्ञे तमायमहरहः प्रतिमासं प्रतिसंवत्सरं वा दद्यात् । स एव च स्थानान्तरे दीव्यतो दण्डयेत्, सभास्थाने च कलहकारान् । तत्र याज्ञवल्क्यः—

[2]"ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्धूर्तकितवादितराद्दशकं शतम् ॥

---

१ शुचयो धर्मशुद्धाः इति च. पु. । २. या. स्मृ. २. १९९; २००

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्ग्राहयेज्जैत्रं दद्यात्सत्यं वचः क्षमी ॥' इति ॥ १३ ॥

अनु०—द्यूत खेलने वाले आर्य अर्थात् प्रथम तीन वर्णों के होंवे पवित्र आचरण वाले तथा सत्यवादीं होवें ॥ १३ ॥

आयुधग्रहणे नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र न विद्येरन् ॥ १४ ॥

आयुधग्रहणादीनी राजाधीनेभ्यो राजाश्रया ये पुरुषास्तेभ्योऽन्यत्र न विद्येरन् न भवेयुः । उत्सवादिष्वन्यत्रापि भवतीत्याचारः ॥ १४ ॥

अनु०—अस्त्रों का अभ्यास, नृत्य, गीत वाद्यवादन आदि केवल राजा के अधीनस्थ सेवकों के निवास स्थानों पर ही होंवे अन्यत्र नहीं ॥ १४ ॥

क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते ॥ १५ ॥

यस्य राज्ञो विषये ग्रामेऽरण्ये च चोरभयं नास्ति स एव राजा क्षेमकृत् क्षेमङ्करः । न त्वन्यः शतं तुभ्यं शतं तुभ्यमिति ददानोऽपि ॥ १५ ॥

अनु०— जिस राजा के राज्य में ग्राम में अथवा वन में चोरों का भय नहीं होता वही कल्याणकारी राजा होता है ॥ १५ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीय प्रश्ने पञ्चविंशी कण्डिका ॥ २५ ॥

भृत्यानामनुपरोधेन क्षेत्रं वित्तं च ददद्ब्राह्मणेभ्यो यथार्हमनन्ताँल्लोकानभिजयति ॥ १ ॥

भृत्यानामनुपरोधेन भृत्यवर्गस्य यथोपरोधो न भवति तथा ब्राह्मणेभ्यो यथार्हं विद्यावृत्तानुरूपं क्षेत्रं वित्तं च दद्यात् । एवं दददनन्ताँल्लोकनभिजयति॥१॥

अनु०—जो राजा अपने सेवकों को किसी प्रकार की हानि पहुँचाये विना ब्राह्मणों को उनकी विद्या तथा उनके चरित्र आदि के अनुसार धन देता है, वह अनन्त लोकों को प्राप्त करता है ॥ १ ॥

ब्राह्मणस्वान्यपजिषगीमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति ॥ २ ॥

ब्राह्मणस्वानि चोरादिभिरपहृतानि अपजिगीषमाणः ब्राह्मणेभ्यो दानायापजित्य ग्रहीतुमिच्छन् यो राजा युद्धे चोरैर्हन्यते तमात्मयूपोऽनन्तदक्षिणो यज्ञ इत्याहुर्धर्मज्ञाः । सङ्ग्रामो यज्ञः । तस्य आत्मा यूपस्थानीयः । आत्मेति शरीरमाह । अन्तरात्मा तु पशुस्थानीयः । प्रत्यानिनीषितं तु द्रव्यं दक्षिणो । सूत्रे तु 'तं यज्ञ इत्याहु' रिति गौणो वादः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०--कहा जाता है कि जो राजा किसी ब्राह्मण की चोर आदि द्वारा अपहृत सम्पत्ति को छीनकर ब्राह्मण को वापस दिलाने के प्रयत्न में मृत्यु प्राप्त करता है, वह इस प्रकार का यज्ञ करता है। जिसमें उसका शरीर ही यज्ञ का यूप होता है। तथा असीमित दक्षिणा दी जाती है ॥ २॥

एतेनाऽन्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ॥ ३ ॥

प्रयोजनं चोरादिभिरपहृतानां ब्राह्मणस्वानां पत्यानयनादि, तदर्थं युध्यमाना ये शूरास्तनुत्यजो भवन्ति तेऽप्येतेन राज्ञा व्याख्याता आत्मयूपा यज्ञा अनन्तदक्षिणा इति ॥ ३ ॥

अनु०—आगे के सूत्र में उन वीरों के पुण्यफलों का निर्देश किया गया है जो किसी श्रेष्ठ प्रयोजन से युद्ध करते हुए शरीर त्याग करते हैं ॥ ३ ॥

ग्रामेषु नगरेषु चाऽऽर्याञ्छुचीन् सत्यशीलान् प्रजागुप्तये निदध्यात्॥४॥

आर्याञ्छुचीन् सत्यशीलानिति व्याख्यातम्। एवं भूतान् पुरुषान् ग्रामेषु नगरेषु च प्रजानां रक्षणार्थं निदध्यात् नियुञ्जीत ॥ ४ ॥

अनु०--ग्रामों तथा नगरों में प्रजा की रक्षा के लिए तीन उच्च वर्णों के, पवित्र आचरण वाले तथा सत्यवादी पुरुषों को नियुक्त करें ॥ ४ ॥

तेषां पुरुषास्तथागुणा एव स्युः ॥ ५ ॥

तेषां नियुक्तानां ये पुरुषा नियोज्याः तेऽपि तथागुणा आर्यादिगुणा एव स्युः ॥ ५ ॥

अनु०—उनके सेवकों में भी उसी प्रकार के गुण होने चाहिए ॥ ५ ॥

सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ॥ ६ ।

सर्वतः सर्वासु दिक्षु योजनमात्रं नगरं तस्करेभ्यो रक्षणीयम्। रक्ष्यन्नित्यपपाठः ॥ ६ ॥

अनु०—वे नगर की प्रत्येक दिशा में एक योजन तक नगर की चोरों आदि से रक्षा करें ॥ ६ ॥

क्रोशो ग्रामेभ्यः ॥ ७ ॥

ग्रामेभ्यस्तु सर्वासु दिक्षु क्रोशो रक्ष्यः। ग्रामेभ्यः इति[1] 'यतश्चाऽध्वकाल परिमाणं तत्र पञ्चमी वक्तव्ये'ति पञ्चमी ॥ ७ ॥

अनु०--प्रत्येक ग्राम के चारों ओर एक क्रोश तक रक्षा करें ॥ ७ ॥

तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम् ॥ ८ ॥

---

१. पा. सू. (वा) १. ४. ३१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र योजनमात्रे क्रोशमात्रे वा यन्मुष्यते चोर्यते ते नियुक्ताः स्वामिभ्यस्त-त्प्रतिदद्यू राज्ञा तैस्तत् प्रतिदाप्यम् राजा तैः प्रतिदापयेदिति प्रायेण दन्त्योष्ठ्यं वकारं पठन्ति ॥ ८ ॥

अनु०—इन सीमाओं क भीतर जो भी सम्पत्ति चोरी हो उसे इन्हीं रक्षापुरुषों से चुकता करवाया जाय ॥ ८ ॥

धार्म्यं शुल्कमवहारयेत् ॥ ९ ॥

तत्र गौतमः—

[1]'विंशतिभागश्शुल्कः पण्ये' इति । यद्वणिग्भिर्विक्रीयते हिङ्ग्वादि, तस्य विंशतितमं भागं राजा गृह्णीयात् । तस्य शुल्क इति संज्ञा । एष धार्म्यः धर्म्य-श्शुल्कः । तमधिकृतैरेवाऽवहारयेत् ग्राहयेदिति । मूलादिषु विशेषस्तैनेवोक्तः—

[2]'मूलफलपुष्पौषधिमधुमांसतृणेन्धनानां षाष्टिक्य'मिति ॥ ९ ॥

अनु०—राजा उनसे न्यायोचित कर भी एकत्र करवाये ॥ ९ ॥

अकरः श्रोत्रियः ॥ १० ॥

श्रोत्रियः करं न दाप्यः । अन्ये दाप्याः ॥ १० ॥

अनु०—विद्वान् श्रोत्रिय ब्राह्मण कर से मुक्त होता है ॥ १० ॥

सर्ववर्णानां च स्त्रियः ॥ ११ ॥

अकराः । वर्णग्रहणात् प्रतिलोमादिस्त्रियो दाप्याः ॥ ११ ॥

अनु०—सभी वर्णों की स्त्रियाँ भी कर से मुक्त होती हैं ॥ ११ ॥

कुमाराश्च प्राक् व्यञ्जनेभ्यः ॥ १२ ॥

व्यञ्जनानि श्मश्र्वादीनि । यावत्तानि नोत्पद्यन्ते तावदकराः ॥ १२ ॥

अनु०—बालक उस समय तक कर से मुक्त होते हैं जब तक उनमें युवावस्था के चिह्न (दाढ़ी-मूँछ) प्रकट नहीं हो जाते ॥ १२ ॥

ये च विद्यार्था वसन्ति ॥ १३ ॥

विद्यामुद्दिश्य ये गुरुषु वसन्ति ते जातव्यञ्जना अप्यसमाप्तवेदा अकराः ।

अनु०—जो लोग अध्ययनार्थ गुरुकुल में निवास करते हैं वे कर से मुक्त होते हैं ॥ १३ ॥

तपस्विनश्च ये धर्मपराः ॥ १४ ॥

तपस्विनः कृच्छ्रचान्द्रायणादिप्रवृत्ताः । धर्मपराः, अफलाकाङ्क्षिणः नित्यने-

---

१. गौ. ध. १०. २६. २. गौ. ध. १०. २७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मित्तिकधर्मनिरताः। धर्मपरा इति किम्? ये अभिचारकामा मन्त्रसिद्धये तपस्तप्यन्ते ते अकरा मा भूवन्निति ॥ १४ ॥

अनु०—धर्म के आचरण में संलग्न तपस्वी भी कर से मुक्त होते हैं ॥ १४ ॥

शूद्रश्च पादावनेक्ता ॥ १५ ॥

यस्त्रैवर्णिकानां पादावनेक्ता स शूद्रोऽप्यकरः ॥ १५ ॥

अनु०—चरणों को धोकर जीविका निर्वाह करने वाला शूद्र भी अकर होता है ॥ १५ ॥

अन्धमूकबधिररोगाविष्टाश्च ॥ १६ ॥

एतेऽप्यकराः यावदान्ध्यादि ॥ १६ ॥

अन्धे, गूंगे, बहरे तथा रोगी कर से मुक्त होते हैं ॥ १६ ॥

ये व्यर्था द्रव्यपरिग्रहैः ॥ १७ ॥

ये च परिव्राजकादयः द्रव्यपरिग्रहैर्व्यर्था निष्प्रयोजनाः शास्त्रतो येषां द्रव्यपरिग्रहः प्रतिषिद्धः तेऽप्यकराः।

तथा च वसिष्ठः—

"[1]"अकरः श्रोत्रियो राजा पुमाननाथः प्रव्रजितो बालवृद्धतरुणप्रशान्ता" इति ॥ १७ ॥

अनु०—जिन लोगों के लिए धन ग्रहण करना शास्त्र से निषिद्ध हैं वे संन्यासी-आदि) कर से मुक्त होते हैं ॥ १७ ॥

- अबुद्धिपूर्वमलङ्कृतो युवा परदारमनुप्रविशन् कुमारीं वा वाचा बाध्यः ॥ १८ ॥

यत्र परदारा आसते कुमारी वा पतिंवरा, तत्र युवा अलङ्कृतः अबुद्धिपूर्वमज्ञानादनुप्रविशन् वाता बाध्यः—अत्रेयमास्ते, माऽत्र प्रविशेति ॥ १८ ॥

अनु०—आभूषणों आदि से अलंकृत जो युवक अनजान में भी किसी ऐसे स्थान पर प्रवेश करता है जहाँ एक विवाहिता स्त्री या विवाहयोग्य कन्या बैठी हो उसे डाँट कर रोकना चाहिए ॥ १८ ॥

बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः ॥ १९ ॥

यस्तु जानन्नेव दुष्टभावः प्रलोभनार्थी प्रविशति स दण्ड्यो द्रव्यानुरूपमपराधानुरूपं च। दुष्टभावग्रहणमाचार्यादिप्रेषितस्य प्रवेशे दण्डो मा भूदिति।

अनु०—किन्तु यदि वह ऐसा बुरी नीयत से जानबूझकर करता है तो उसे (आर्थिक) दण्ड देना चाहिए ॥ १९ ॥

---

१. व. ध. १९. २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्निपाते वृत्ते शिश्नच्छेदनं सवृषणस्य ॥ २० ॥

सन्निपातो मैथुनं, तस्मिन् वृत्ते शिश्नच्छेदनं दण्डः। सवृषणस्येत्युपसर्जनस्यापि शिश्नस्य विशेषणम्। सवृषणस्य शिश्नस्य च्छेदनमिति ॥ २० ॥

अनु०—यदि उसने वस्तुतः ऐसी स्त्री से मैथुन किया हो तो उसका शिश्न अण्डकोषों के साथ कटवा दे ॥ २० ॥

कुमार्यां तु स्वान्यादाय नाश्यः ॥ २१ ॥

कुमार्यां तु सन्निपाते वृत्ते सर्वस्वहरणं कृत्वा देशान्निर्वास्यः, न शिश्नच्छेदः ॥ २१ ॥

अनु०—यदि उसने कुमारी कन्या के साथ मैथुन किया हो तो उसकी सम्पूर्ण सम्पत्ति का अपहरण कर उसे देश से निष्कासित कर देना चाहिए ॥ २१ ॥

अथ भृत्ये राज्ञा ॥ २२ ॥

अथ सन्निपातात्प्रभृति ते परदारकुमार्यौ राज्ञा भृत्ये ग्रासाच्छादनप्रदानेन भर्तव्ये ॥ २२ ॥

अनु०—उसके बाद ऐसी परस्त्री तथा कुमारी कन्या का भरण-पोषण राजा करें ॥ २२ ॥

रक्ष्ये चाऽत ऊर्ध्वं मैथुनात् ॥ २३ ॥

अतः प्रथमात् सन्निपातात् ऊर्ध्वं मैथुनाच्च रक्ष्ये यथा पुनः मैथुनं नाचरतस्तथा कार्ये ॥ २३ ॥

अनु०—उसके बाद राजा उनकी मैथुन किये जाने से रक्षा करें ॥ २३ ॥

निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत् ॥ २४ ॥

यदि ते एवं निरुद्धे निर्वेषणमभ्युपेतः अभ्युपगच्छतः तदा निर्वेषाभ्युपाये तु स्वामिहस्ते अवसृजेत दद्यात्। परदारं भर्त्रे श्वशुराय वा, कुमारीं पित्रे भ्रात्रे वा। अनभ्युपगमे तु प्रायश्चित्तस्य यावज्जीवं निरोधः ॥ २४ ॥

यदि वे विहित प्रायश्चित्त करें तो उन्हें उनके स्वमियों तथा संरक्षकों के हाथों में सौंप देना चाहिए ॥ २४ ॥

इत्यापस्तम्बधर्मसूत्रे द्वियीयप्रश्ने षट्विंशी कण्डिका ॥ २३ ॥

चरिते यथापुरं धर्माद्धि सम्बन्धः ॥ १ ॥

चरिते तु निर्वेषे यथापुरं यथापूर्वं, धर्मात्, तृतीयार्थे पञ्चमी। धर्मेण सम्बन्धो भवति। हिशब्दो हेतौ। यस्मादेवं तस्मात् अवश्यं प्रायश्चित्तं कारयितव्ये। ततो यज्ञविवाहादौ न कश्चिद्दोष इति ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—उन (स्त्रियों या कन्याओं) को प्रायश्चित कर लेने के बाद उसी प्रकार का मानना चाहिए जैस वे पहले मानी जाती थीं, कारण स्त्री पुरुष के सम्बन्ध धर्म के अनुसार होते हैं ॥ १ ॥

परदारप्रसङ्गादुच्यते—

सगोत्रस्थानीयां न परेभ्यस्समाचक्षोत ॥ २ ॥

योऽनपत्यः आत्मनश्शक्त्यभावं निश्चित्य क्षेत्रजं पुत्रमिच्छन् भार्यां[1] परत्र नियुङ्क्ते, मृते वा तस्मिन् तत्पित्रादयस्सन्तानकाङ्क्षिणः, तद्विषयमेतत्। कुलान्तरप्रविष्टा सगोत्रस्थानीया। सा हि पूर्वं पितृगोत्रा सती[2] भर्तृगोत्रधर्मैरधिक्रियेत। अतः भर्तृपक्ष्याणां सगोत्रस्थानीया भवति। भर्ता तु साक्षात्सगोत्रः। तां सगोत्रस्थानीयां न परेभ्योऽसगोत्रेभ्यस्समाचक्षीत—इयमनपत्या, अस्यामपत्यमुत्पाद्यतामिति। सगोत्रायैव तु सामाचक्षोत, तत्रापि देवराय, तदभावे[3] सपिण्डेभ्यः ॥ २ ॥

अनु०—पति के कुल में प्रवेश करने वाली (पति के गोत्र वाली) स्त्री को (क्षेत्रज पुत्र की इच्छा से) उस गोत्र से भिन्न गोत्र वाले पुरुष से नियोग के लिए सम्बन्ध नहीं कराना चाहिए। (अर्थात् पति के गोत्र के पुरुष से ही नियोग द्वारा पुत्र उत्पन्न करने की आज्ञा देनी चाहिए, उसमें भी भरसक देवर से नियोग होना चाहिए-हरदत्त) ॥ २ ॥

कः पुनस्सगोत्रस्य विशेषः ? तमाह—

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ॥ ३ ॥

हि यस्मात् स्त्री कन्या प्रदीयमाना कुलायैव प्रदीयत इत्युपदिशन्ति धर्मज्ञाः। तस्मात् सगोत्रायैव समाचक्षीतेति[4] ॥ ३ ॥

अनु०—क्योंकि कहा गया है कि कन्या एक कुल को दी जाती है (पति के कुल को दी जाती है, केवल पति को ही नहीं) ॥ ३ ॥

तमिमं नियोगं दूषयति—

तदिन्द्रियदौर्बल्याद्विप्रतिपन्नम् ॥ ४ ॥

यद्यप्येवं पूर्वे कृतवन्तः, तथाऽपि तदद्यत्वे विप्रतिपन्नं विप्रतिषिद्धम्।

---

१. परस्मै. इति. क. पु. २. भर्तृगोत्रधर्मैऽधिक्रियते।

३. सपिण्डाय. इति. च.पु.

४. "कुलाय कन्या क्वचिद्देशेषु दीयते। गोत्रजे न केनचिदप्यनुभूयते। उक्तं च बृहस्पतिना—अभर्तृका भ्रातृभार्या ग्रहणं चातिदूषितम्। कुले कन्या प्रदानं च देशेष्वन्येषु दृश्यते इति" इत्यधिकः पाठः घ. पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुतः ? इन्द्रियदौर्बल्यात् । दुर्बलेन्द्रिया ह्यद्यत्वे मनुष्याः । ततश्च शास्त्रव्याजेनापि भर्तृव्यतिक्रमेऽतिप्रसङ्गस्स्यादिति ॥ ४ ॥

अनु०—किन्तु यह नियोग का नियम अब निषिद्ध हो गया है क्योंकि पुरुषों की इन्द्रियाँ दुर्बल हो गई हैं (वे संयम नहीं करते) ॥ ४ ॥

सगोत्रविषयेऽपि यो विशेषस्सोऽपि नास्तीत्याह—

अविशिष्टं हि परत्वं पाणेः ॥ ५ ॥

येन पाणिना पूर्वमग्निसाक्षिकं पाणिगृहीतः कन्यायाः, तस्मात् पाणेरन्यो भवति सगोत्रस्याऽपि पाणिः । यस्मादेवं पाणेः परत्वमविशिष्टं समानम् ? तस्मादविशेष इति । अविशिष्टमित्यपपाठः ॥ ५ ॥

अनु०—जिस पुरुष के हाथ से विवाह के समय कन्या का ग्रहण किया जाता है उस पुरुष के हाथ को छोड़कर दूसरे व्यक्तियों के हाँथ (चाहे वे सगोत्री हों या परगोत्री) एक समान ही होते हैं ॥ ५ ॥

पाणिरन्यो भवतु, को दोषः ?

तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ॥ ६ ॥

तस्य पाणेर्व्यतिक्रमे उभयोर्दम्पत्योः नरको भवति । खलु पुनरिति प्रसिद्धिद्योतकौ निपातौ । अतः पत्याऽपि न स पाणिस्त्याज्यः यः पूर्वं गृहीतः । भार्ययाऽपि न स पाणिस्त्याज्यो येन पूर्वमात्मानः पाणिगृहीतः ॥ ६ ॥

अनु०—यदि विवाह के पाणिग्रहण के नियम का उल्लंघन होता है तो पति-पत्नी दोनों ही नरक प्राप्त करते हैं ॥ ६ ॥

नियमारम्भणो हि वर्षीयानभ्युदय एवमारम्भणादपत्यात् ॥७॥

आरभ्यतऽनेनेत्यारम्भणः योऽयं दम्पत्योः परस्परनियमः, स आरम्भणो यस्य स नियमारम्भणः । एवंभूतो योऽभ्युदयस्स एवं वर्षीयान् । वृद्धतरः । कस्मात् वर्षीयान् ? एवमुक्तप्रकारेण नियोगलक्षणेन यदपत्यमारभ्यते तस्मादेवमारम्भणादपत्याद्वर्षीयानिति । अपत्यादिति पाठः । आपत्यादिति प्रायेण पठन्ति ॥ ७॥

अनु०-—इस प्रकार नियोग द्वारा प्राप्त पुत्र की अपेक्षा वैवाहिक पवित्रता के नियम के निर्वाह करने का परलोक में प्राप्य फल श्रेयस्कर होता है ॥ ७ ॥

नाश्य आर्यश्शूद्रायाम् ॥ ८ ॥

आर्यस्त्रैवर्णिकः शूद्रायां परभार्यायां प्रसक्तो राज्ञा राष्ट्रान्नाश्यः निर्वास्यः ८

अनु०—यदि प्रथम तीन उच्च वर्णों का पुरुष शूद्र वर्ण की स्त्री से मैथुन करे तो उसे देश से निकाल देना चाहिए ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वध्यश्शूद्र आर्यायाम् ॥ ९ ॥

शूद्रस्तु त्रैवर्णिकस्त्रियां प्रसक्तो वध्यः। एतच्च योऽन्तःपुरादिष्वधि-कृतो रक्षकस्सन् स्वयं गच्छति,तस्य भवति। अन्यस्य तु पूर्वोक्तं शिश्नच्छेदनमेव। तथा च शूद्राधिकारे गौतमः [1]—'आर्यस्त्र्यभिगमने लिङ्गोद्धारः स्वहरणं च। गोप्ता चेद्वधोऽधिक'इति। याज्ञवल्क्येन प्रातिलोम्येन गमनमात्रे वध उक्तः—

"[2]सजातावुत्तमो दण्डः आनुलोम्ये तु मध्यमः।

प्रातिलोम्ये वधः [3]पुंसां स्त्रीणां नासादिकृन्तनम् ॥' इति। सोऽनुबन्धाभ्यासाद्यपेक्षो द्रष्टव्यः। तथा 'नाश्य आर्यश्शूद्रायामि'त्याचार्यवचनमप्यभ्यासापेक्षम्, ब्राह्मणादेः क्रमविवाहे या शूद्रा, तद्विषयं वा द्रष्टव्यम् ॥९॥

अनु०—जो शूद्र वर्ण का पुरुष प्रथम तीन उच्च वर्णों की स्त्री से मैथुन करता है वह मृत्युदण्ड का भागी होता है।

टिप्पणी—हरदत्त के अनुसार यह दण्ड उस शूद्र को दिया जाता है जो उच्चवर्ण की स्त्री का रक्षक बनाकर भेजा जाय और अवसर पाकर उसके साथ मैथुन करे, अन्यथा परस्त्री संभोग के लिए प्रजनेन्द्रियों के कटवा लेने का दण्ड पहले उल्लिखित हो है ॥ ९ ॥

दारं चाऽस्य कर्शयेत् ॥ १० ॥

अस्य शूद्रस्य या दारभूता तेन भुक्ता त्रैवर्णिकस्त्री तां च कर्शयेत् व्रतनियमोपवासैः। या प्रजाता न भवति तद्विषयमेतत्।

"ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण सङ्गताः।

अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥' इति स्मरणात् ॥१०॥

अनु०—उस शूद्र से मैथुन कराने वाली उच्चवर्ण की स्त्री को व्रत, नियम उपवास द्वारा कृश बना दे ॥ १० ॥

सवर्णायामन्यपूर्वायां सकृत्सन्निपाते पादः पततीत्युपदिशन्ति ॥ ११ ॥

अन्यः पूर्वः पतिः यस्यास्सा अन्यपूर्वा परभार्या, तस्यां सवर्णायां सकृद्गमने पादः पतति। पतितस्य द्वादशवार्षिकं प्रायश्चित्तम्। तस्य तुर्योऽशस्त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यमस्य प्रायश्चित्तम्। एतच्च श्रोत्रियभार्यायामृतुकाले कामतः प्रथम [5] दूषकस्य। तत्र गौतमः "[6]द्वे परदारे। त्रीणि श्रोत्रियस्ये'ति ॥ ११ ॥

---

१. गौ. ध. १२. २. ३ २. या. स्मृ. २. २८६

३. पुंसो नार्याः कर्णादिकर्तनम् इति विज्ञानेश्वराहृतः पाठः।

४. श्लोकोऽयं मानवे एकादशाध्याये १७८ श्लोकानन्तरं प्रक्षिप्ततया पठितः।

५. दूषकस्य ब्राह्मणस्य. इति ध. च. पु. ६. गौ. ध. २२. २९, ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—धर्मज्ञों ने उपदेश दिया कि जो ब्राह्मण अपने ही वर्ण की पर स्त्री से मैथुन करता है वह पतित व्यक्ति के लिए विहित प्रायश्चित्त का चतुर्थांश प्रायश्चित्त करे (अर्थात् पतित के लिए बारह वर्ष की प्रायश्चित्त की अवधि है, ऐसे ब्राह्मण को तीन वर्ष तक प्रायश्चित्त करना होता है ॥ ११ ॥

एवमभ्यासे पादः पादः ॥ १२ ॥

एवमभ्यासे प्रत्यभ्यासं पादः पादः पतति ॥ १२ ॥

अनु०—इसी प्रकार इस अपराध के पुनः-पुनः करने पर पतित के लिए विहित प्रायश्चित्त का चतुर्थांश प्रायश्चित्त और करे ॥ १२ ॥

चतुर्थे सर्वम् ॥ १३ ॥

अतः– चतुर्थे सन्निपाते सर्वमेव पतति । ततश्च पूर्णद्वादशवार्षिकं कर्तव्य- तृतीय नव वर्षाणि । द्वितीये षड्वर्षाणि । एतच्च प्रतियोगं स्त्रीभेदेन प्रथमदू । कषस्य । एकस्यामेव त्वभ्यासे कल्प्यम् । तत्र—

[1]"यत् पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ,

इति स्मरणात् स्त्रिया अपि प्रतिप्रयोगं पादः पादः पतति । तदनुरोधेन कल्प्यम् ॥ १३ ॥

अनु०—यदि यह अपराध चौथी बार करे तो पतित के लिए विहित सम्पूर्ण बारह वर्षों का प्रायश्चित्त करे ॥ १३ ॥

जिह्वाच्छेदनं शूद्रस्याऽऽर्यं धार्मिकमाक्रोशतः ॥ १४ ॥

शूद्रो द्विजातीनामन्यतमं धार्मिके[2]स्वकर्मस्थं यद्याक्रोशति निन्दति गर्हते, तदा तस्य जिह्वा छेत्तव्येति । मनुस्तु सामान्येनाह-

[3]'येनाङ्गेनावरो वर्णो ब्राह्मणस्याऽपराध्नुयात् ।
तदङ्गं तस्य छेत्तव्यं तन्मनोरनुशासनम् इति ॥

गौतमस्तु—[4]'शूद्रो द्विजातीनतिसन्धायाऽभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गं मोच्यो येनोपहन्या' दिति ॥ १४ ॥

अनु०—प्रथम तीन वर्णों के गुणवान् व्यक्ति की निन्दा करने या उसको अपशब्द कहने पर शूद्र की जीभ काट लेनी चाहिए ॥ १४ ॥

वाचि पथि शय्यायामासन इति समीभवतो दण्डताडनम् ॥ १५ ॥

यस्तु शूद्रो वागादिष्वार्यैस्समीभवति, न तु न्यग्भूतः, तस्य दण्डेन ताडनं कर्तव्यम् । स दण्डेन ताडयितव्यः । अयमस्य दण्डः ॥ १५ ॥

---

१. म. स्मृ ११. १७७
२. स्वधर्मस्थं इति च. पु.
३. म. स्मृ. ८. १७९
४. गौ. १२. २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—जो शूद्र प्रथम तीन वर्णों के पुरुषों के साथ वार्तालाप में, मार्ग में चलने में, शय्या पर, बैठने के आसन पर तथा अन्य कर्मों में समानता का व्यवहार करे उसे डण्डे से पीटने का दण्ड दिया जाना चाहिए ॥ १५ ॥

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः ॥ १६ ॥

भूम्यादानं परक्षेत्रस्य बलात्स्वीकारः, पुरुषवधादिषु निमित्तेषु शद्रस्सर्वस्वहरणं कृत्वा पश्चाद्वध्यः मारयितव्यः ॥ १६ ॥

अनु०—किसी पुरुष का वध करने पर, चोरी करने, भूमि पर बलपूर्वक कब्जा करने पर शूद्र की सम्पूर्ण सम्पत्ति का अपहरण कर लेना चाहिए तथा उसका बध कर देना चाहिए ॥ १६ ॥

चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य ॥ १७ ॥

ब्राह्मणस्य त्वेतेषु निमित्तेषु चक्षुषो निरोधः कर्तव्यः। पट्टबन्धादिना चक्षुषी निरोद्धव्ये' यथा यावज्जीवं न पश्यति। न तूत्पाटयितव्ये।

''न शारीरो ब्राह्मणदण्डः। अक्षतो ब्राह्मणो व्रजे'दिति स्मरणात्। 'चक्षुनिरोध' इति रेफलोपश्छान्दसः ॥ १७ ॥

अनु०—किन्तु यदि एक ब्राह्मण ये सब अपराध करे तो उसकी आखों को पट्ठबन्ध आदि से इस प्रकार बन्द करा देना चाहिए कि वह जीवन भर देख न सके ॥ १७ ॥

नियमातिक्रमिणमन्यं वा रहसि बन्धयेत् ॥ १८ ॥

यो वर्णाश्रमप्रयुक्तान्नियमानतिक्रामति तं नियमातिक्रमिणमन्यं वा प्रतिषिद्धानां कर्तारं रहसि निगलितं निरुन्ध्यात् ॥ १८ ॥

अनु०—नियमों का उल्लंघन करने वाले अथवा किसी अन्य प्रकार के अपराधी को एकान्त में बन्धन में रखे ॥ १८ ॥

आसमापत्तेः ॥ १९ ॥

यावदसौ नियमान् प्रतिपत्स्ये प्रतिषिद्धेभ्यो निवर्तिष्य इति ब्रूयात् ॥ १९ ॥

अनु०—जब तक वह अपराधी यह प्रतिज्ञा न करे कि मैं नियम का पालन करूंगा तथा निषिद्ध कर्मों से दूर रहूँगा तब तक उसे बन्धन में रखे ॥ १९ ॥

असमापत्तौ नाश्यः ॥ २० ॥

यद्यसौ दीर्घकालं निरुद्धोऽपि न समापद्येत, ततो नाश्यः निर्वास्यः ॥२०॥

अनु०—यदि वह इस प्रकार की प्रतिज्ञा नही करता तो उसे देश से निकाल देना चाहिए ॥ २० ॥

---

१. गौ. ध. १२. ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आचार्य ऋत्विक्स्नातको राजेति त्राणं स्युरन्यत्र वध्यात् ॥ २१ ॥

यदि दण्डे प्रवृत्तं राजानमाचार्यो ब्रूयात्—अहमेनमतः परं वारयिष्यामि मुच्यतामयमिति। अतोऽङ्गदण्डे प्राप्तेऽर्थदण्डम्, अर्थदण्डे प्राप्ते ताडनम्, ताडने प्राप्ते धिग्दण्डमिति कृत्वा तद्वशे विसृजेत्। एवमृत्विजि। ऋत्विगाचार्यौ राज्ञस्स्वभूतौ न दण्ड्यस्य। स्नातको विद्याव्रताभ्याम्। राजा अनन्तरादिः। सर्व, एते राज्ञस्सम्मान्याः। अतस्ते दण्ड्यस्य त्राणं स्युः। उक्तेन प्रकारेण रक्षका भवेयुः। नान्यः कश्चित्। तेऽप्यन्यत्र वध्यात् यस्य वधानुगुणोऽपराधः न तस्याऽऽचार्यादयोऽपि त्राणम्, हन्तव्य एव स इति ॥ २१ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने सप्तविंशो कण्डिका ॥ २७ ॥

अनु०—आचार्य, ऋत्विक् स्नातक और राजा किसी अपराधी को जिसे मृत्यु-दण्ड को छोड़कर कोई अन्य दण्ड मिला हो रक्षा कर सकते हैं (छुड़ा सकते हैं) ॥ २१ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने दशमः पटलः ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैकादशः पटलः

क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यस्समृद्धस्स भावि तदपहार्यः ॥ १ ॥

वैश्यो वैश्यवृत्तिर्वा परस्य क्षेत्रं कृष्यर्थं परिगृह्य यदि उत्थानं कृषिविषयं यत्नं न कुर्यात्, तदभावाच्च फलं न स्यात्, तत एतस्मिन्निमित्ते स कर्षकस्समृद्धश्चेत्तस्मिन् भोगे यद्भावि फलं तदपहार्यः अपहारयितव्यः। राज्ञा क्षेत्रस्वामिने दाप्यः ॥ १ ॥

अनु०—यदि कोई व्यक्ति दूसरे का खेत खेती करने के लिए लेकर उसमें खेती करने का यत्न नहीं करता, जिसके कारण उस खेत में फल नहीं उत्पन्न होता, तो यदि वह पुरुष धनी हो तो उससे संभावित फसल का मूल्य खेत के स्वामी को दिलाया जाय ॥ १ ॥

अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम् ॥ २ ॥

कीनाशः कर्षकः। तस्याऽवशिनः अस्वतन्त्रस्य निर्धनस्य कर्मन्यासे स चेत् कृषिकर्म न्यसेत् विच्छिन्द्यात् तस्य दण्डेन ताडनं कर्त्तव्यं स दण्डेन ताडयितव्यः। अर्थाभावान्नाऽर्थदण्डः।

अपर आह—अवशी अवश्यः अविधेयः यः क्षेत्रं परिगृह्याऽवशिनः कीनाशस्य कृषिकर्म न्यसेत् न स्वयं कुर्यात्, तदा स परिग्राहको दण्डेन ताडयितव्य इति। यदि वा अवशिन इति बहुव्रीहिः। यस्य कीनाशस्य वशी स्वतन्त्रः क्षेत्रवान्नास्ति, स यदि पूर्वकृष्टस्य क्षेत्रस्य कृषिकर्म न्यसेत् न कुर्यात्, तस्य दण्डताडनं दण्ड इति राजपुरुषस्योपदेशः ॥ २ ॥

अनु०—कृषि कर्म में जमीदार के वश में न रहकर बीच में काम छोड़ने वाले मजदूर को पीटना चाहिए।

टि०—इस सूत्र की दूसरी व्याख्या भी है कि जो मजदूर जमीदार की जमीन लेकर कृषि कर्म नहीं करता है और खेत वेकार पड़ा रहता है उस मजदूर को यदि उसके पास फसल का मूल्य देने के लिए धन न हो तो पीटना चाहिए ॥ २ ॥

तथा पशुपस्य ॥ ३ ॥

पशुपो गोपालः तस्याऽपि कर्मन्यासे पालनस्याऽकरणे दण्डेन ताडनं दण्डः ॥ ३ ॥

अनु०—इसी प्रकार का दण्ड गौ के उस चरवाहे को मिलना चाहिए जो कार्य छोड़ देता है ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अवरोधनं चाऽस्य पशूनाम् ॥ ४ ॥

ये चाऽस्य पशवो रक्षणाय समर्पितास्तेषां चाऽवेराधनमपहरणं कर्तव्यमन्यस्य गोपस्य समर्पणीया इति ॥ ४ ॥

अनु०—अथवा उसे रक्षार्थ जो पशु दिये गये हों उनका उपहरण करके उन्हें दूसरे गोप को देना चाहिए ॥ ४ ॥

हित्वा व्रजमादिनः कर्शयेत्पशून ॥ ५ ॥

ये पशवो व्रजे गोष्ठे निरुद्धास्तं व्रजं हित्वा आदिनस्सस्यादेर्भक्षयितारो भवन्ति; तान् कर्शयेत् बन्धनादिना कृशान् कुर्यात् । कः ? यत् भक्षितं तद्वान्, राजपुरुषो वा ॥ ५ ॥

अनु०—गोशाले में बंधे हुए पशु यदि तुड़ाकर या गोशाले से निकलकर किसी को फसल आदि खा लें तो (फसल का स्वामी अथवा राजा के पुरुष) उन पशुओं को घेरकर उन्हें कृश बना दें ॥ ५ ॥

नाऽतिपातयेत् ॥ ६ ॥

नाऽतिनिरोधं कुर्यात् न ताडयेद्वेति ॥ ६ ॥

अनु०—किन्तु उन्हें अत्यधिक कष्ट नहीं देना चाहिए ॥ ६ ॥

अवरुध्य (१) पशून्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ॥ ७ ॥

यदि पशुपः पशूनवरुध्य पालयितुं गृहीत्वा सभयस्थाने विसृज्योपेक्षया मारयेत् नाशयेद्वा । नाशनं चोरादिभिरपहरणम् । स स्वामिभ्यः पशूनवसृजेत् प्रत्यर्पयेत् पश्वभावे मूल्यम् ॥ ७ ॥

अनु०—यदि पशुओं का रखवाला पशुओं को निगरानी करके लिए लेकर उन्हें मर जाने दे या चोरों आदि से अपहृत हो जाने दे, तो वह ऊनका मूल्य स्वामी को चुकता करे ॥ ७ ॥

प्रमादादरण्ये पशूनुत्सृष्टान् दृष्ट्वा ग्राममानीय स्वामिभ्योऽवसृजेत् ॥८॥

यदि स्वामिनः प्रमादादरण्ये पशूनुत्सृजेयुः विना पालकेन ततस्तान् दृष्ट्वा ग्राममानीय स्वामिभ्यः अर्पयेत् । कः ? यस्तत्र रक्षकत्वेन राज्ञा नियुक्तः ॥८॥

अनु०—यदि राजा का पुरुष पशुओं के स्वामी द्वारा असावधानी से, विना रखवाले के वन में छोड़ गये पशुओं को देखे तो उन्हें ग्राम में लाकर स्वामी को सौंप दे ॥ ८ ॥

पुनः प्रमादे सकृदवरुध्य ॥ ९ ॥

१. 'पशून्मारयेन्नाशयेद्वा' इति छ. पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः प्रमादादुत्सृष्टेषु सकृदवरुध्य स्वामिभ्योऽवसृजेत् ॥ ९ ॥

अनु०--यदि पशुओं का स्वामी इसी प्रकार की असावधानी दुबारा करे तो पशुओं को कुछ दिन घेर कर रखे और फिर वापस कर दे ॥ ९ ॥

तत ऊर्ध्वं न सूर्क्षेत् ॥ १० ॥

ततो द्वितीयात् प्रयोगादूर्ध्वं 'ग्रामसमानीये' त्यादि यदुक्तं तन्न सूर्क्षेत् नाद्रियेत तस्मिन् विषये उपक्षेत ॥ १० ॥

अनु०–उसके बाद असावधानी करनेपर उन पशुओं पर ध्यान न दे ॥ १० ॥

परपरिग्रहमविद्वानाददान एधोदके मूले पुष्पे फले गन्धे ग्रासे शाक इति वाचा बाध्यः ॥ ११ ॥

एधाश्चोदकं च एधोदकम् । ग्रासो गवाद्यर्थो यवसादिः । सर्वत्र विषयसप्तमी । यः परपरिग्रहोऽयमित्यविद्वानजानन् एधादिकमादत्ते गृह्णाति, स तस्मिन्विषये तत्र नियुक्तेन राजपुरुषेण निष्ठुरया वाचा बाध्यः निवार्यः ॥११॥

अनु०–जो व्यक्ति इंधन, जल, मूल, फूल, फल गन्ध, घास, शाक आदि बिना यह जाने हुए कि वे किसी अन्य व्यक्ति के हैं ग्रहण करले उसे राजपुरुष वाणी से डाटकर रोके ॥ ११ ॥

विदुषो वाससः[1] परिमोषणम् ॥ १२ ॥

यस्तु विद्वानेवाऽऽदत्ते तस्य वाससोऽपहारः कर्तव्यः ॥ १२ ॥

अनु०–जो व्यक्ति जानबूझ कर ग्रहण कर लेता है उसके वस्त्र का अपहरण करं लेना चाहिए ॥ १२ ॥

अदण्ड्यः कामकृते तथा प्राणसंशये भोजनमाददानः ॥ १३ ॥

तथाशब्दस्य भोजनमित्यनेन सम्बन्धः । प्राणसंशयदशायामेधोदकादेरादाने कामकृतेऽप्यदण्ड्यः । तथा भोजनमप्याददानः प्राणसंशये न दण्ड्य इति॥१३॥

अनु०–किन्तु जो व्यक्ति प्राणोंका संकट होनेपर जानबूझकर दुसरेका भोजन ग्रहण कर लेता है, उसे दण्ड नहीं देना चाहिए॥ १३ ॥

प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनस्स्पृशति ॥ १४ ॥

प्राप्तं दण्डनिमित्तं यस्य तस्मिन् पुरुषे दण्डाकर्माणि दण्डस्याऽक्रियायां यदि दययाऽर्थलोभेन वा प्राप्तदण्डं न कुर्यात् तदा तदेनो राजानमेव स्पृशति ॥१४॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्नेऽष्टाविंशी कण्डिका ॥ २८ ॥

अनु०–यदि राजा किसी दण्ड्य अपराधीको दण्ड नहीं देता तो वह पाप उसीको मिलता है ॥ १४ ॥

---

१. परिमोक्षणम्, इति, क, पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ननु[1] शास्त्रफलं प्रयोक्तरि, तत्कथमन्यकृतमेनोऽन्यं स्पृशतीति,बहुविधत्वात् कर्तृभेदस्येत्याह—

प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनः ॥ १ ॥

धर्ममधर्मं वा प्रकुर्वाणं यः प्रयुंक्ते—इदमित्थं कुर्विति, स प्रयोजयिता । स चाऽनेकप्रकारः—आज्ञापकोऽभ्यर्थयिता अनुग्राहक इति । भृत्यादे-र्निकृष्टस्य प्रवर्तना आज्ञा । गुर्वादेराराध्यस्य प्रवर्तनाऽभ्यर्थना । अनुग्रहो द्विविधः— उपदेशस्तत्सधर्माचरणं चेति । तत्र य इत्थमर्थमुपदिशति त्वं शत्रुमित्थं व्यापादय, धर्मार्जनेऽयं तेऽभ्युपाय इति स उपदेष्टा । यः पुनः केनचिज्जि-घांसितं पलायमानं वा निरुणद्धि निरुद्धश्च हन्यते स निरोद्धाऽनुग्राहकः । मन्ता अनुमन्ता यस्याऽनुमतिमन्तरेणाऽर्थो न निवर्तते स राजादिको धर्माधर्मयोर-नुमन्ता । कर्त्ता साक्षात्क्रियाया निर्वर्तकः । एते त्रयोऽपि स्वर्गफलेषु नरकफलेषु च कर्मसु धर्मेष्वधर्मेषु च भागिनः फलस्यांशभागिनःअंशभाजः । सर्वेषां च यथाकथंचित् कर्तृत्वम् ॥ १ ॥

अनु०—जो कर्म करनेके लिए उत्तेजित करता है, जो कर्म करनेमें सहायक होता है तथा जो कर्म करता है व तीनों ही उसके फलोंके स्वर्ग या नरकमें समान रूपसे भागी होते हैं ॥ १ ॥

यो भूय आरभते तस्मिन् फलविशेषः ॥ २ ॥

तेषु प्रयोजकादिषु यो भूय आरभते यस्य व्यापारोऽर्थनिवृत्तावधिकमु-पयुज्यत तस्मिन् फलविशेषो भवति ॥२॥

अनु०—जो कर्मके सम्पादनमें सबसे अधिक योगदान देता है वह विशेष (अच्छे या बुरे) फलका भागी होता है ॥ २ ॥

यद्यप्येवम्—

कुटुम्बिनौ धनस्येशाते ॥ ३ ॥

कुटुम्बिनौ दम्पती । तौ धनस्य परिग्रहे विनियोगे च ईशाते । यद्यप्येवं, त-थापि भर्तुरनुज्ञया विना स्त्री न विनियोक्तुं प्रभवति । भर्ता तु प्रभवति । तदेतेन वेदितव्यं 'नहिभर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ती'ति (२.१४.२०) ।

अनु०—पति और पत्नी दोनोंका परिवारकी सम्पत्ति पर समान अधिकार होता है ।

तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ॥ ४ ॥

तयोर्दम्पत्योरनुमतेऽनुमतौ सत्यामन्येऽपि पुत्रादयः तयोरैहिकेष्वामुष्मिकेषु च हितेषु वर्तेरन् द्रव्यविनियोगेनाऽपि ॥ ४ ॥

---

१. पूर्वमीमांसासूत्रस्या (जै. सू ३. ७. १८) नुवादोऽयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनु०—उनकी आज्ञाके अनुसार परिवारके दूसरे सदस्यों को भी उन्हीं के कर्मों में संलग्न होना चाहिए ॥ ४ ॥

विवादे विद्याभिजनसम्पन्ना वृद्धा मेधाविनो धर्मेष्वविनिपातिनः ॥५॥

अर्थिप्रत्यर्थिनोर्विप्रतिषिद्धो वादो विवादः । तत्र विद्यादिगुणसंयुक्ता निर्णेतारस्स्युतिरि वाक्यशेषः । विद्या अध्ययनसम्पत्, अध्ययनसहितं शास्त्रज्ञानं वा । अभिजनः कुलशुद्धिः । वृद्धाः परिणतवयसः, मेधाविनः ऊहापोहकुशलाः । धर्मेषु वर्णाश्रमप्रयुक्तेषु अविनिपातिनः, विनिपातः प्रमादः तद्रहिताः ।

अनु०—अर्थी, प्रत्यर्थी के विवादमें विद्यासे सम्पन्न, कुलीन, वृद्ध, बुद्धिमान तथा धर्म पालनमें सावधान पुरुष ही निर्णायक होवें ॥ ५ ॥

सन्देहे लिङ्गतो दैवेनेति विचित्य ॥ ६ ॥

ते च निर्णयन्तस्सन्देहस्थलेषु लिङ्गतोऽनुमानेन दैवेन तप्तमाषादिना इतिशब्दः प्रकारे । यच्चान्यदेवं युक्त वचनव्याघातादि तेन च विचित्यार्थस्थितिमन्विष्य निर्णेतारस्स्युरित्यध्याहृतेन वाक्यपरिसमाप्तिः ॥ ६ ॥

अनु०—जो विषय सन्देहापन्न हों उन विषयोंमें उन्हें अनुमान, दैव परीक्षण आदि साधनोंसे तथ्यका निर्धारण करना चाहिए ॥ ६ ॥

अथ साक्ष्यविधिः—

पुण्याहे प्रातरग्नाविद्धेऽपामन्ते राजवत्युभयतस्समाख्याप्य सर्वानुमते मुख्यस्सत्यं प्रश्नं ब्रूयात् ॥ ७ ॥

पुण्याहो देवनक्षत्रम्, प्रातर्मध्याह्नादिषु अग्नाविद्धे अग्निमिध्वा तत्समीपे अपामन्ते उदकमुपनिधाय तत्समीपे राजवति राजाधिष्ठिते सदसि। राजग्रहणं प्राड्विवाकादेरुपलक्षणम् उभयतः उभयोरर्थिप्रत्यर्थिनोस्समाख्याप्य किमहं युवयोः प्रमाणभूतः साक्षीत्यात्मानं ख्यापयित्वा । यदि वा उभयतः उभयोरपि पक्षयोस्सत्यवचने च असत्यवचने च साक्षिणो यद्भावि फलं तत्,

सत्यं ब्रूह्यनृतं त्यक्त्वा सत्येन स्वर्गमेष्यसि ।
'अनृतेन महाघोरं नरकं प्रतिपत्स्यसे ॥

इत्यादिना प्रकारेण समाख्याप्य प्राड्विवाकादिभिः पृष्ट इति शेषः । सर्वानुमते अर्थिप्रत्यर्थिनोस्सभ्यानां चाऽनुमतौ सत्यां सभ्यो मुख्यः साक्षिगुणैरुपेतो दोषैश्च वर्जितस्साक्षी प्रश्नं पृष्टमर्थं सत्यं यथाऽऽत्मना ज्ञातं तथा ब्रूयात् ॥७॥

अनु०—किसी शुभ दिन को, प्रातःकाल, जलती हुई अग्नि के समक्ष, जल से भरे हुए कलश के निकट, राजा की उपस्थिति में, दोनों पक्षों की सहमति से उत्तमगुणों से सम्पन्न साक्षी को बुलाकर उससे निर्णायक सत्यभाषण की प्रतिज्ञा कराकर प्रश्न पूछे ।

---

१. उक्त्वाऽनृतं इति. ख पु.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनृते राजा दण्डं प्रणयेत ॥ ८ ॥

साक्षिणाऽनृतमुक्तमिति प्रतिपन्ने राजा [1]दण्डं प्रणयेत् ।

अत्र मनुः—

"[2]यस्य दृश्येत सप्ताहा[3]दुक्तसाक्ष्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणं [4]दाप्यो दण्डं च तत्समम् ॥" इति ॥ ८ ॥

न केवलमसत्यवचने राजदण्डः, किं तर्हि ?

अनु०—यदि साक्षीका असत्यभाषण करना सिद्ध हो तो राजा उसे दण्ड दे ॥ ८ ॥

नरकश्चाऽत्राधिकः साम्पराये ॥ ९ ॥

साम्परायः परलोकः, तत्र नरकश्च भवति, न तु,

"[5]राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलास्स्वर्गमायान्ति सन्तस्सुकृतिनो यथा ॥

इत्यस्यायं विषय इति ॥ ९ ॥

इसके अतिरिक्त यदि साक्षी असत्य भाषण करता है तो उसे मृत्युके बाद नरक मिलता है ॥ ९ ॥

सत्ये स्वर्गस्सर्वभूतप्रशंसा च ॥ १० ॥

सत्य उक्ते स्वर्गो भवति । सर्वाणि च भूतान्येन प्रशंसन्ति अपि देवाः ।

अनु०—सत्यभाषण करने पर साक्षीको स्वर्गकी प्राप्ति होती है और सभी लोग (देवता भी) उसकी प्रशंसा करते हैं ॥ १०

सा निष्ठा या विद्या स्त्रीषु शूद्रेषु च ॥ ११ ॥

स्त्रीषु शूद्रेषु च या विद्या सा निष्ठा समाप्तिस्तस्यामप्यधिगतायां विद्याकर्म परितिष्ठतीति ॥ ११ ॥

अनु०—जो विद्या स्त्रियों और शूद्रों में होती है वही विद्या की अन्तिम सीमा है। उसका ज्ञान प्राप्त करने परही सभी विद्याओं का ज्ञान पूरा होता है ॥ ११ ॥

आथर्वणस्य वेदस्य शेष इत्युपदिशन्ति ॥ १२ ॥

अथर्वणा प्रोक्तमधीयते ये ते आथर्वणिकाः । वसन्तादिभ्यष्ठक् । तेषां समाम्नायः । "आथर्वणिकस्येकलोपश्च" आथर्वणः । तस्य वेदस्य शेष इत्युपदिशन्ति धर्मज्ञाः—या विद्या स्त्रीषु शूद्रेषु चेति ॥ १२ ॥

अनु०—धर्मज्ञों का कथन है कि स्त्रियों और शूद्रों की विद्याएँ अथर्ववेदको ज्ञान का परिशिष्ट अंश होती है ॥ १२ ॥

---

१. तं दण्डयेत् इति क. पु. २. म. स्मृ. ८. १०८. ३. उक्तावाक्यस्य इति च. पु.
४. ऋणं दाप्यो दमं च सः इति. च. पु. मुद्रितपुस्तकेपु च । ५. म. स्मृ. ८. ३१८.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृच्छ्रा धर्मसमाप्तिस्समाम्नानेन लक्षणकर्मणा तु समाप्यते ॥ १३ ॥

समाम्नानं प्रतिपदपाठः। तेन धर्मसमाप्तिः कृच्छ्रा न शक्या कर्तुम्। किं तु लक्षणकर्मणा समाप्यते येन सामान्येन भिन्नानामप्यधिगमो भवति तल्लक्षणं, तस्य कर्मणा करणेन समाप्यते। कर्मणात्त्विति द्वितकारपाठोऽयमार्षः। आदिति वा निपातस्य प्रश्लेषः। स च सद्य इत्यस्यार्थे द्रष्टव्यः ॥ १३ ॥

अनु०—वेदके अक्षरोंका ज्ञान प्राप्त कर लेने भरसे धर्मका बोध करना कठिन है, किन्तु उसके द्वारा लक्षित कर्मों के आचरणसे धर्मका पालन सरलतासे होता है।

तत्र लक्षणम् ॥ १४ ॥

सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत एवमुभौ लोकावभिजयति ॥ १५ ॥

पूर्वेण गतम् ॥ १५ ॥

अनु०—इन सन्देहास्पद विषयों के लक्षण इस प्रकार हैं ॥ १४ ॥

अनु०—सभी जनपदों में अपने आचार्योंके प्रति सम्यक् विनीत रहने वाले वृद्ध, इन्द्रियोंका संयम करने वाले, लोभ तथा पाखण्डसे दूर रहने वाले तीन उच्चवर्णोंके आर्यों द्वारा जो आचरण सबकी सहमतिसे मान्य हो उसीके अनुसार आचरण करना चाहिए। इस प्रकार कर्म करने वाला इस लोक तथा परलोक-दोनोंका फल प्राप्त करता है ॥ १५ ॥

स्त्रीभ्यस्सर्ववर्णेभ्यश्च धर्मशेषान्प्रतीयादित्येक इत्येके ॥ १६ ॥

उक्तव्यतिरिक्ता ये धर्मास्ते धर्मशेषास्तान् स्त्र्यादीनामपि सकाशात् प्रतीयादित्येके मन्यन्ते। ते च प्रतिजनपदं प्रतिकुलं च भिन्नास्तथैव प्रतिपत्तव्याः। तत्र द्राविडाः कन्यामेषस्थे सवितर्यादित्यपूजामाचरन्ति भूमौ मण्डलमालिख्य, इत्यादीन्युदाहरणानि। द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ १६ ॥

अनु०—कुछ धर्मज्ञो का मत है कि जिन अवशिष्ट नियमों का विधान नहीं किया गया है उन कर्मो का ज्ञान स्त्रियोंसे तथा सभी वर्णके पुरुषोंसे प्राप्त करना चाहिए।

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकोनत्रिंशी कण्डिका ॥ २९ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ श्रीहरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने एकादशः पटलः ॥ ११ ॥

समाप्तमिदमुज्ज्वलोज्ज्वलितमापस्तम्बधर्मसूत्रम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूत्र में आये हुए नामों एवं विषयों की अनुक्रमणिका

अग्नि, अपवित्र होने पर ११५, परिव्राजक के लिए नहीं ३३९, आधान ३४३, उप-समाधान २२८, २५४ परित्यागी का अन्न अभोज्य १४१ में प्रवेश १८७, १८८, २०१ की पूजा ३४, ३५६ अग्निहोत्र १०३ हवन ३०९, स्पर्श ३३१, पञ्चाग्नि ३२३, बीच से जाना वर्जित २८४, अग्नीषोमीयसंस्था १४०

अग्रांश, भिक्षुक के लिए २४४

अङ्गभङ्ग, प्रायश्चित्त १९१

अजिन, उत्तरीय २४, वैश्य के लिए २२

अणिक, पुत्र से पढ़ने वाला १४२

अतिथि, राजा २६१, पूजा १०३, ११०, २२५, भोजन २४५

अदिवास्वापी, ब्रह्मचारी १९

अध्यात्म, १५८

अध्यापन, वर्जित २२० ब्राह्मण के लिए २०५

अनडुह्, बैल, मांस भक्ष्य १३१, १३२, हत्या का प्रायश्चित्त १८९

अनध्याय, ४५, २८७

अनुपेत, का प्रायश्चित्त १३

अनुवाक, का अध्ययन वसन्त से निषिद्ध ८३

अन्तेवासी, ६५, ३१९

अन्न, विक्रय १५२

अनूप, भक्षण १२१

अप्राकृतिक, यौनाचार १९१

अभिशस्त, आत्मघाती २०१, २३४

अभिवादन, गुरु का ४१, वर्णों के लिए ४२, विधि १०५, १०७, २४३

अमेध्य, १२४, १२६

अयस्, मेखला में २१

अलङ्कार, पत्नी का धन ३०४

अवकीर्णी, १९२

अवभृथ, शुद्धि के लिए १८४ अतिथि पूजा २६०

अवि, आविक चर्म २३

अशुचिकर, कर्म १५६, २०७

अश्वमेध, का स्नान १८४

आङ्गिरस, मन्त्र १४

आचमन, ३५, ५१, ११०, ११७-१२०, १२५, २३७, २५०, ३३०

आचार्य, योग्यता ८, परिभाषा ९ आदेश १८, भिक्षान्न का देवता ३०, २८, के समीप जाना ६५, बैठना ६२, त्याज्य ६६, मृत्यु पर उपवास ३०७, अनध्याय ७६, ७४, पादोपसंग्रहण ४४, शिष्य द्वारा उद्बोधन ३६, कुल में निवास १६, ३३६, १०२, ब्राह्मण, राजन्य, वैश्य २४८, मधुपर्क का अधिकारी २६५, की पत्नी के प्रति आदर ५७, ५८, पत्नी का अभिवादन १०७, आचार्य को धन ३०३ दण्ड ३६८, शुश्रूषा १०४

आत्मदाह, २०१

आत्मलाभ, १६२, १६४, १६७

आत्मा, का रूप १६८–१७२

आत्रेयी, स्त्री की हत्या १८१

आथर्वण, वेद ३७४

आपद्धर्म, १३६, १५१

आम, चावल १३५

आर्य, प्रमाण १५०, सम्पर्क २०१

आवीसूत्र, मेखला २१

इन्द्रधनु, ८६, २१७

इन्द्रियसंयम, २५३

इष्टि, शुद्धि के लिए १९४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उग्र, वर्णसंकर से दक्षिणार्थ धन ५६
उच्छिष्ट, ५१, ५७, २१९, ३२७, गुरु का ३०, आचार्य पुत्र का ५८, पिता और भाई का ३३, स्त्री का २६९
उत्सर्जन, कर्म २५३
उपनयन, ६, १२, ३३६, आचार्य की योग्यता ८, उपेत का निवास १६, शूद्र के लिए निषिद्ध ५
उपवास, गृहस्थ के लिए २२६ वैश्वदेव में २३९, ३३४
उपसंग्रहण, ५०, ५७, ७७, ५४, २४९, ६३, भाई बहनों का १०५
उपाकर्म, ६७, ८०, ८१, २५२
उपानह, ५९, निषिद्ध ५३
उल्कापात, अनध्याय का निमित्त ८५
ऋतुकाल, में पत्नीगमन २३०, २५२, २८९
ऋत्विक्, दण्ड से रक्षा ३६८, गुण २७३, मधुपर्क २६५
ऋषि, कलियुग में अभाव ३९
ओंकार, महत्व ९८
ओषधि, सूँघने का निषेध ५२, भक्षण ८१
औदुम्बर, चमस ३२९, दण्ड २२
कण्व, १९८, १४३, १४४
कन्या, का दोष कथन निषिद्ध २१६
कम्बल, ब्रह्मचारी का २४
करग्रहण, ३६० आदि
कान्चुकी, ५९
काण्ड, उपाकर्म, समापन ८०, ८१
काम, के लिए हवन १९३ मन्त्र २४२
काम्य, कर्म १०
काषाय, वस्त्र २२
कीनाश, कृषित्याग ३६९
कुक्कुट, मांस १३२
कुमारी, मैथुन ३६२, दोषकथन २१६
कुमालनाय, २२३
कृच्छ्र, व्रत, १९५, १९६, १८७
कृषि, त्याग का दण्ड ३६९
कृष्ण, वर्ण, शूद्र १९७ वस्त्र २१२
केशवपन, वैश्वदेव में २३७
कौत्स, १४३, १४४, १९८
क्रय, विवाह में २९३
क्रोधादि, दोष १७६, २१९
क्लीव का, अन्न अग्राह्य १४१, १४६ उत्तराधिकार नहीं २९४
क्षत्रिय, ४, अन्न अग्राह्य १३७, अभिवादन १०८, उपनयन की अवधि ११, धर्म २७२ हत्या का प्रायश्चित्त १७८
क्षार, निषिद्ध १९, ३१
क्षौमवस्त्र, राजन्य का २२
खड्ग, (गैंडा) मांस ३१८
गन्ध, का त्याग २०
गर्दभ, का यान २२४, की ध्वनि से अनध्याय ७७
गुरु, अभिवादन, ४१, की प्रसन्नता ४०, समीप बैठने का नियम ४८, की प्रदक्षिणा ५२, चरणसेवा ४५, गुरुतल्पग १५५, १८५, २०१ गुरुपत्नी का आदर ५७
गृहमेध, ३५६
गृहमेधी, २२५, २२९, २३८
गृहस्थ, के भोजन की मात्रा २७०
गो, रक्षा, प्रायश्चित्त १८३, दान, १७९, मधुपर्क में २६५, मांस भक्ष्य १३१, ३१७, दक्षिणा अतिथि के लिए २६५, स्पर्श वर्जित २१५
गोत्र, नियोग में ३६३, विवाह में २७९, आचार्य के निकट ५०
ग्रीष्म, क्षत्रिय का उपनयन १०
चन्द्र, परिवेष ८६, अनध्याय ८५, २१८
चमस, ३२९
चाण्डाल, की उपस्थिति में अनध्याय ७०, अतिथि २६८, स्पर्श २३४, २३५
चातुर्मासी, अनध्याय ७२
चारी, गुप्तचर का अन्न अग्राह्य १४१
छत्र, निषिद्ध ५३
जटा, ब्रह्मचारी के लिए २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जप, १९३, १९४
तप, परिभाषा ३८, तपस्वी को कर से मुक्ति ३६०
तामली, मेखला २२
तिल, दान ३३२, भक्षण का प्रायश्चित्त १९३, १९४, विक्रय १५२
तिष्य तैष्या ६७
त्रिमधु, त्रिसुपर्ण, त्रिणाचिकेत, ३२३
त्रिश्रावण, ९९
त्रिस्सहवचन, ९९
त्रैविद्यक ब्रह्मचर्य, ११
दक्षिणा, ५६, ३१९, २१५, गुरु के लिए ३१, अतिथिपूजा में २६०, के लिए भिक्षा २७१
दण्ड, ब्रह्मचर्य का २२, अपराध में २७५, ३६५ आदि
दधि, मधुपर्क में २६५
दन्तप्रक्षालन, निषिद्ध ६०
दह्न, ७१
दान, श्राद्ध में ३१७
दाय, २८९
दास, का भोजन २७०, का विनिमय १५२
दासी, द्वारा लाया गया भोजन १२५
दीक्षित, का अन्न १४०
दीवितृ, जुआ खेलने वाले ३५७
देशकुलधर्म, ३०६
द्यूत, ३५७
द्रोण, मात्रा ३३२
धन, दक्षिणार्थ शूद्र से ५६, उग्र से ५६, समावृत्त का ५५
धर्म, का उद्देश्य १४८, का स्रोत ३७५
धर्मप्रह्लाद, २२३
धेनुभव्या, २१६
नगरप्रवेश, वर्जित २२२
नग्न, न रहने का आदेश ११२
नदी, संतरण का निषेध २२४
नरक, ९४
नियोग, ३६३
निर्ऋति, १९२
नीहार, कुहरा, अनध्याय ८४, ८६
नृत्यगीत, ३५८
न्यग्रोध, का दण्ड २२
पक्षी, नाम १३२, मांस १३२, हत्या का प्रायश्चित्त, १८९ वार्ध्राणस ३१८
पंक्तिपावन, ३२३
पण्य, अपण्या १५१
पण्डित, १७३
पतनीय कर्म, १५४, १८
पतित, के समीप अनध्याय ६९, १५४, के लिए मार्ग त्याग २७६
पतिता, माता के प्रति कर्त्तव्य २००
पत्नी, पत्नीगमन ऋतुकाल में २५२, २८९, अलंकरण २२०, परित्याग २०२, गुरुजनों के समक्ष पत्नी से व्यवहार २५१, का धन ३०४, से बँटवारा नहीं ३०५, की मृत्यु पर उपवास ३०७
पय, पशुओं का १२९-१३०
परिवेष, सूर्य चन्द्र का ८६
परिवापन, केशवपन ७४
परिव्राज, ३३७
पर्व, पर केशवपन २३७, उपवास २२६
पलाश, का दण्ड २२
पशु, ध्वनि पर अनध्याय ७७, का दूध १३०, अभक्ष्य १३१, मांस भक्षण अशुचिकर १५६, मूल्य के रूप में १३६, १३८, मांस, श्राद्ध में ३१७
पशुनाश, ३७०
पशुप, चरवाहा ३६८
पाणिग्रहण, २२५, ३०५, ३६४
पादुका, वर्जित, २२१
पादुकी, ५९
पावमानी, मन्त्र १४, १५
पिण्याक, खाद्य पदार्थ ३२४
पिता, के लिए भिक्षण २७१, की मृत्यु पर उपवास ३०७, से आचार्य श्रेष्ठ ९, मृत्यु पर अनध्याय ७४, शुश्रूषा १०४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्र, की उत्पत्ति २०६ ज्येष्ठ का धन २९४
पुत्री, का धन ३०३
पुराण, से उद्धरण १४५, ३४९
पुरुष, के वध का दण्ड ३६७
पुष्करसादि, का मत १४४, १९८
पौल्कस, वर्णसंकर २३४
प्रजापति, ३५२, ३५३
प्रदक्षिणा, ५२, २८५
प्राचीनावीती, २४३
प्राणायाम, १९३, २८६
प्रायश्चित्त, 'श्मशान' के लिए १५, ब्राह्मण के लिए १३७
प्रेङ्ख, २१७
फल, आदि का ग्रहण ३०१, वृत्ति ३४२, ३४७
बलि, वैश्वदेव २३९ आदि
बस्ताजिन, बकरे का चर्म २३
ब्रह्म, वेद ३८, १००, ४०, १०२
ब्रह्मचर्य, त्रैविद्यक ११, विधि १८
ब्रह्मचारी, के गुण २५, यज्ञ ३१, सिद्धि ४१, निवास १६, १८, भोजन २७०, नैष्ठिक ३३७
ब्रह्मविद्, ३१८
ब्रह्मसदन, २४२
ब्रह्महण, १२
ब्राह्मण, ४, उपनयन की ऋतु १०, उपनयन की अवधि ११, की मेखला २१, का पलाशदण्ड २२, का वस्त्र २२, का भिक्षाचरण २७, की अभिवादनविधि ४२, ही आचार्य २४८, से संभाषण ६९, २३५, का अन्न १३७, शस्त्रधारण का निषेध २०४, का स्पर्श २१५, की सेवा १९७, की गौ की रक्षा १८३, की हत्या का प्रायश्चित्त १८१, वाणिज्य निषिद्ध १५०, का निवासस्थान ११६, चोर २३४, के प्रति अनादर २४६, को चोरी ३५८, भोजन ३२८, क्षत्रिय कर्म ३२२, के बीच जाना २८४, अपराधी २७४, के कर्म २७२, के लिए मार्ग २७६
भविष्यपुराण, ३५९
भिक्षा, के निमित्त २७१, अभिशस्त के लिए १८२, गुरु के लिए ५५, अन्न की प्रशंसा ३०, ब्राह्मण ब्रह्मचारी के लिए २७, राजन्य, वैश्य का २७
भिषक्, चिकित्सक, का अन्न अभोज्य १३९, १४६
भूत, बलि ९५, २४४
भूतदाही, दोष १७५, २१९
भूमिचलन, अनध्याय का निमित्त ८५
भोजन, ब्रह्मचारी का १९, मात्रा २७०, 'श्मशान' के यहाँ वर्जित १५
भोज्य, वस्तुएँ १२८
भ्रूणहा, २०३
मत्स्य, अभक्ष्य १३३, शतवलि ३१८
मद्य, अपेय १२९
मधु, अतिथि के लिए २५९, ग्राह्य १३५, वर्जित १९, ३१, १२८, ३२५
मधुपर्क, २६५
मनु, ३०४, ३५०
मनुष्य, का विनिमय १५२
मन्यु, देवता १९३
महायज्ञ, ९५, सत्र ९५
माञ्जिष्ठ, वस्त्र २३
मांस, गो का ३१७, भैंस का ३१७, गर्दभ का १९२, स्वशरीर का हवन के लिए १८८, पक्षियों का १३२, अतिथि के लिए २५९, भक्षण अशुचिकर १५६, विक्रय १५१, ग्राह्य १३५, वर्जित १९, ३१, १२१, १२८, १३१, २५२, ३२५, अनध्याय ८०, उत्तम भोजन ३३१
माता, की सेवा २००, शुश्रूषा १०४, की मृत्यु पर उपवास ३०७, अनध्याय ७४, के पास खाली हाथ न जाना ६४, समावृत्त की ५५, से आचार्य श्रेष्ठ ९, का आशौच ३०७, के लिए भिक्षा २७१, आयु कम होना ३२९
मुनि, का धर्म ३३९, ३४२, भोजन २७०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृत्यु, की कथा २२३
मेखला, २१, २२
मैथुन, वर्जित, २०, २१३, २२०, २२८, २३०, २३०, २५२, परस्त्री गमन २८९, ३२२, कुमारी से ३६२
मौञ्जी, मेखला २१
यजुष्पवित्र मन्त्र, १४
यज्ञ, १९४, पात्र की शुद्धि १२७, अतिथि पूजा २५९
यज्ञोपवीत, ११०, २४७, ३३१
यान, निषिद्ध ५३
योग, १५८
रजस्वला, भाषण निषिद्ध ६९
राजन्य, उपनयनकाल १०, मेखला २१, दण्ड २२, वस्त्र २२, २३, मृगचर्म २३, भिक्षा २७, अभिवादन ४२, १०७, २४६, चोर २३४, आचार्य २४८, अतिथि २६१
राजा, के लिए मार्ग २७६, मधुपर्क २६५, उत्तराधिकारी ३०३, का धर्म ३५५
रुद्र, २१८, २४७, मन्त्र २४३
रोहिणी, ६७, ७१
रौरव, रुरुमृग का चर्म २३
लवण, वर्जित १९, ३१, १२८, १९७, २००, २३८, ३१०
वचन, का संयम १९३
वयस्य, का अभिवादन १०८
वर्ण, श्रेष्ठता का विचार ४, का ध्वंस २३४
वसन्त, ब्राह्मण का उपनयन १०, अनुवाक का अध्ययन निषिद्ध ८३
वस्त्र, ब्रह्मचारी का ४८, कांचुकी ५९, उत्तरीय २४७, स्त्रीवास २३२, स्नातक का २१२,
वाजसनेयक, मांसभक्षण विहित १३२
वाजसनेयिब्राह्मण, ९०, ९२
वाणिज्य, निषिद्ध १५०, की वस्तुएँ १५१
वानप्रस्थ, ३४२
वार्ध्राणस, पक्षी ३१८
वार्धुषिक, का अन्न अभोज्य १३९
वार्ष्यायणि, का मत १४३, १४४, १९८
वास, ब्रह्मचारी का वस्त्र २२
विद्या, का विनिमय १५२, से उपनयन में जन्म ९
विद्युत, अनध्याय का हेतु ७१
विनिमय, अन्नादि का १५२
विवाह, प्रकार २८२, के लिए भिक्षा २७१, सवर्णा से २८९, में दान २९३, दूसरा निषिद्ध २७७, ब्राह्मण के यहाँ निषिद्ध १२, 'श्मशान' के यहाँ वर्जित १५
विष्णुक्रम, अतिथिपूजा में २६०
वृत्ति, अभिशस्त की १८३
वेद, प्रमाण ३४९, ३, छ अंग २६५, से सावित्री की श्रेष्ठता ७, अध्ययनकाल १७, अध्ययन की दक्षिणा ५६
वेश्म, राजप्रासाद ३५५
वैण, नट २३४
वैभीतक, द्यूत की गोटी ३५७
वैरमण, अध्ययन का उत्सर्जन ७३
वैश्य, ४, उपनयनकाल १०, अवधि ११, मेखला २१, दण्ड २२, वस्त्र २२, २३, ब्रह्मचारी की भिक्षा २८, अभिवादन की विधि ४२, १०७, १०८, २४६, आचार्य २४८, के कर्म २७२, हत्या का प्रायश्चित्त १७९, चोर २३४
वैश्वदेव कर्म, २३६
व्याहृति, द्वारा सिंचन १४
व्रात्य, २६१
शण, शाणीवस्त्र २२
शतबलि, मत्स्य ३१८
शरद्, में वैश्य का उपनयन १०
शम्या, ७१
शय्या, ब्रह्मचारी की १९
शव, रहने पर अनध्याय ७०, होने पर भोजन निषिद्ध १२२, शवशिरध्वज १८१
शास्त्र, अनुमान द्वारा ९४
शिखा, वपन के विषय में ७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिल्पाजीव, १३९
शुल्क, ३६०
शुश्रूषा, १०४
शूद्र, ४, उपनयन नहीं ५, सेवाकर्म ६, कृष्ण वर्ण १९७, अतिथि २४६, रसोइया २३६, की विद्या ३७४, वध्य ३६५, दण्ड ३६६, कर से मुक्ति ३६९, के लिए गर्दभ का मांस १९२, का प्रायश्चित्त १९०, हत्या का प्रायश्चित्त १७९, यौनसंबन्ध १५६, द्वारा लाया गया अन्न १२३, १२५, अभिवादन १०८, के समीप अनध्याय ६९, से दक्षिणार्ध धन ५६, उच्छिष्ट भिक्षा का दान २९
शूद्रा, को देखने पर अनध्याय ६९, मैथुन का प्रायश्चित्त १९१, १९६, ३६४
श्मशान, कई पीढ़ी से अनुपेत १५, में अनध्याय ६८
श्राद्ध, ३१३ भोजन से अनध्याय ७९, ८४, का अन्न वर्जित २५२
श्रावणी, ६७, १९४
श्रुति, श्रेष्ठता ३२, २११, ३४९
श्रोत्रिय, १४२, ३२३, ३५३, वध का प्रायश्चित्त १८४, अतिथि २६३, में कामुकता ३०४, को भिक्षानिवेदन २८, मृत्यु पर अनध्याय ७६, का अभिवादन १०९, को मधुपर्क २६५
श्वेतकेतु, ३९, १०२
संस्कर्ता, की योग्यता ८
सचेल, स्नान ११४
सत्र, में शिखावपन ७५, महासत्र ९५
सपिण्ड, उत्तराधिकारी २९५
सब्रह्मचारी, के प्रति आदर ५८
समय, पुरुष कृत व्यवस्था १, ९२, शुश्रूषा ९९
समावृत्त, ५५, ९८, १०४, २४९, का आचार ५८, परिवापन निषिद्ध ७५
समिध्, का आहरण ३४
सर्पिष, उत्तम भोजन ३३१, अतिथि के लिए २५९
सलावृक्ष्य, ८६
सवन, अतिथिपूजा में २६०
सामयाचारिक, धर्म १
सामपवित्र, मन्त्र १४
सामगान, पर अनध्याय ७७
सावित्री, की श्रेष्ठता ७, काल बीतने का प्रायश्चित्त ११, जप १९३, १९४
सिलोञ्छ, २७२, ३४४
सुरापान, का प्रायश्चित्त १८६
सुवर्ण, की चोरी का प्रायश्चित्त १८६, मूल्य ११८
सूतक, में भोजन त्याज्य १२२
सूप, २४१
सूर्मि, लोहे की स्त्री प्रतिमा १८६, २०१
सूर्य, ग्रहण ८५, परिवेष ८६, चन्द्रमा के साथ २१८
सैरी, मेखला २२
स्तनयित्नु, ७१, ८४
स्तेन, १८६, १९८, २३४, ३५९
स्त्री, तथा ब्रह्मचारी २५, कन्या का दोष-कथन २१६, विशिष्ट वस्त्र २३२, की विद्या ३७४, को दण्ड ३६५, कुमारी से मैथुन ३६२, कुल के लिए ३६३, शूद्रा से मैथुन ३६४, द्वारा होम निषिद्ध ३१०, सवर्णा २८९, का उच्छिष्ट वर्जित २६९, के लिए मार्ग २७६, विवाह योग्य कन्या से छेड़खानी का दण्ड ३६१, कर से मुक्ति ३६०, परस्त्रीगमन ३२३, गर्भिणी को भोजन २४५, द्वारा पति का त्याग २०२, के लिए प्रायश्चित्त १९०, हत्या का प्रायश्चित्त १८०, आत्रेयी १८१, उच्च वर्णों की १५६, स्पर्श के बाद आचमन १२०, सूंघना वर्जित ५३, अकारण स्पर्श वर्जित ५४, देखने पर अनध्याय ६९, नग्न न देखना ५२, अभिवादन १०७, १०९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थालीपाक, २२८, ३३१, ३३२
स्नातक, २०९, २१०, ३०४, २६५, दण्ड से रक्षा ३६८
स्नान, की विधि ब्रह्मचारी के लिए २०
स्वर्ग, ४२, २४४, २६०, ३२५, ३५१, ३७४
स्वाध्याय, ४१, ३४६
हरिण, का चर्म २३
हारिद्र, वस्त्र २३
हारीत, १४५, १००, १९८, १९९, २०१, २०७, २०८
होम, ३१०, ३४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धर्मशास्त्र-कर्मकाण्ड-ग्रन्थाः—

१ कृत्यकर्मदीपकः। म. म. नित्यानन्दपन्तपर्वतीयकृतः ४-००
२ कात्यायनश्रौतसूत्रम्। कर्कभाष्यसहितम्। १२ से २६ अध्याय १४-००
३ कृत्यतत्त्वसंग्रहः। दैवज्ञ तुफानी शर्मप्रणीतः ८-००
४ कृत्यसारसमुच्चयः। गंगाधरमिश्रकृत टिप्पणी सहितः ५-००
५ गौतमधर्मसूत्राणि। हरदत्तकृत मिताक्षरा तथा हिन्दी व्याख्या सहित १०-००
६ चतुर्विंशतिमतसंग्रहः। श्रीभट्टोजदीक्षितकृतः ६-००
७ तन्त्रसारः। म० म० श्रीकृष्णानन्दवागीश भट्टाचार्य कृत ३-००
८ तिथिनिर्णयः। भट्टोजिदीक्षितकृतः, नागोजिभट्टकृतश्च ३-००
९ त्रिपुरारहस्य-ज्ञानखण्डम्। हिन्दी व्याख्या सहित १३-००
१० दुर्गासप्तशती। (सांगोपांग, सचित्र) 'सरला' हिन्दी व्याख्या ४-००
११ धर्मसिन्धुः। 'धर्मदीपिका' हिन्दीव्याख्या 'सुधा' टिप्पणी सहित २५-००
१२ पाराशरस्मृतिः। 'प्रकाश' हिन्दीव्याख्योपेता २-००
१३ पितृकर्मनिर्णयः। (संग्रह निबन्ध) पं० त्रिलोकनाथ मिश्र ३-००
१४ प्रायश्चित्तप्रदीप-कृत्यप्रदीप-शुद्धिप्रदीप। कृष्णमिश्र प्रणीत ३-००
१५ बौधायनधर्मसूत्रम्। श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् २०-००
१६ मनुस्मृतिः। 'मणिप्रभा' हिन्दी व्याख्या विमर्श सहित ५-००
१७ मन्त्र और मातृकाओं का रहस्य। डा० शिवशंकर अवस्थी १६-००
१८ [illegible] 'मिताक्षरा' सं० हि० व्याख्या २०-००
१९ याज्ञवल्क्यस्मृतिः। [illegible] २३-००
२० लाट्यायनश्रौतसूत्रम्। [illegible] सटिप्पण ४-००
२१ वात्यताप्रायश्चित्तनिर्णयः। (महान लघुश्च) [illegible] भट्ट विरचितः ३-००
२२ विष्णुस्मृतिः। 'वैजयन्ती' [illegible] टिप्पणी सहिता १०-००
२३ व्रतकृत्यदीपकः। म० म० श्रीनित्यानन्दपन्तपर्वतीय विरचित १०-००
२४ वीरमित्रोदयः। म. म. श्री मित्रमिश्र कृतः आह्निक प्रकाश २४-००
२५ श्राद्धकल्पलता। श्रीनन्दपण्डितकृता ९-००
२६ श्राद्धविवेकः। म. म. रुद्रधरकृतः। सटिप्पणः २-५०
२७ श्राद्धचन्द्रिका। भारद्वाज दिवाकरभट्टनिर्मिता ५-००
२८ श्राद्धप्रयोगदीपिका। संपादक पं० गोपाल शास्त्री नेने १-२५
२९ श्रौतसूत्रम्। कात्यायनप्रणीतं 'देवयाज्ञिकपद्धति'सहितम् १-८ खण्ड २४-००
३० षडशीतिः। शुद्धिचन्द्रिका व्याख्यया समलंकृता। ६-००
३१ संस्कारदीपकः। म० म० श्रीनित्यानन्दपन्त विरचितः। संपूर्ण १०-००
३२ संस्कारगणपतिः। पारस्करगृह्यसूत्रस्यातिविस्तृतव्याख्यानम् २५-००
३३ स्मृतिसारोद्धारः। अत्युत्तमोऽयं धर्मशास्त्रग्रन्थः १२-००

प्राप्तिस्थानम्— चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu